# महाभाष्यदिशा योगविभागसमीक्षा

यादवपुरविश्वविद्यालयस्य संस्कृतविभागे **पि-एइच्.डि.** (Ph.D.)
इत्युपाधिलाभाय समर्प्यमाणशोधप्रबन्धः


गवेषकः

**बुलेट्-मण्डलः**

यावदपुरविश्वविद्यालयस्थसंस्कृतविभागीयः

पञ्जिकरणसंख्या – A00SA1401121

मार्गदर्शकः

**प्राध्यापकः ड. तपनशङ्करभट्टाचार्यः**

यावदपुरविश्वविद्यालयस्थसंस्कृतविभागीयः



संस्कृतविभागः

यादवपुरविश्वविद्यालयः

यादवपुरम्, कलिकाता, ७०००३२

२०२५

# **Mahābhāṣyadiśā Yogavibhāgasamīkṣā**

Thesis Submitted to the Department of Sanskrit, Jadavpur University for the Degree of Doctor of Philosophy

Submitted by:

**Bulet Mandal**
Department of Sanskrit
Jadavpur University
Registration No – A00SA1401121

Supervisor:

**Professor Dr. Tapan Sankar Bhattacharyya**
Department of Sanskrit
Jadavpur University

Department of Sanskrit
Jadavpur University
Jadavpur, Kolkata-700032
2025

# Certified that the Thesis entitled

'महाभाष्यदिशा योगविभागसमीक्षा' submitted by me, for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my own work carried out under the Supervision of Professor Dr. Tapan Sankar Bhattacharyya, Professor, Department of Sanskrit, Jadavpur University, and that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/ elsewhere.

T. S. Bhattacharyya.

Countersigned by the Supervisor:
Prof. Tapan Sankar Bhattacharyya
Date: 25.06.2025

Ex- Professor
Department of Sanskrit
Jadavpur University
Kolkata - 700032

Bulet Mandal

Signature of the Candidate:
Bulet Mandal
Date: 25.06.2025

# कृतज्ञतानिवेदनम्

आदावेव यस्य कृपाकटाक्षात् पङ्गुरपि पर्वतारोहणे समर्थो भवति तमीश्वरं वन्दे। **महाभाष्यदिशा योगविभागसमीक्षा** इति शीर्षकोपेतस्यास्य शोधप्रबन्धस्य लेखने बहूनां परामर्शकानां तथा अनेकप्रतिष्ठानानां साहाय्यं सश्रद्धं स्मरणीयम्। यादवपुरविश्वविद्यालयस्य संस्कृतविभागे पि-एइच्.डि. (Ph.D.) इत्युपाधये सर्वथा मे मार्गनिर्देशनं कृतवद्भ्यः सर्वदा च स्नेहाशिषा प्रवृत्तिं विदधद्भ्यः अध्यापकवर्येभ्यो ड. तपनशङ्करभट्टाचार्यमहोदयेभ्यः कार्तज्ञ्यं विज्ञापयामि। तथा च यादवपुरविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य प्रत्यक्षाप्रत्यक्षतया सहायकेभ्यः सर्वेभ्यः अध्यापकेभ्यः कृतज्ञतां समर्पयामि। रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागे अध्यापकानां ड. राकेशदाश-महाभागानां, ड. नीरजकुमारभार्गवमहाभागानां तथा च ड. गोपीकृष्णन्-रेघुमहाभागानां स्नेहगर्भं साहाय्यमपि अनुस्मर्तव्यम्। तान् प्रत्यप्यहं कृतज्ञतां निवेदयामि।

पित्रोराशिषा शोधप्रबन्धोऽयं समाप्तः इति तयोः चरणारविन्दे मे प्रणामाञ्जलिं विनिवेदयामि। मम अनुजायाः सख्याख्यायाः प्रियशावन्याश्च सर्वदा ऐकान्तिकी उत्साहप्रदानप्रचेष्टा उल्लेखार्हा। तासां निरामयशरीरं दीर्घसुखञ्च ईश्वरं प्रार्थये। अपि च कार्येऽस्मिन् सस्नेहं निरतं सहायीभूतेभ्यः

मम अग्रजतुल्येभ्यः निलाद्रिघारा, विष्णुपदपालः, अरिन्दममण्डलः, पिण्टुराउलः, लक्ष्मीकान्तमुर्मुः, जयदेवदिन्दा, कार्तिकमेटे, त्रिदिवरायमण्डलः, सौमित्र-आचार्यः इत्येतेभ्यः तथा च साहाय्यं कृतवद्भ्यः मित्रतुल्यसहपाठिभ्यः विवेकानन्दलक्ष्मणः, मलयमाइति, स्वागतविश्वासः, मलयदलुई, सुखदेवसाउ, पङ्कजराउलः, सुकान्तप्रामानिकः इत्येतेभ्यः तथा च साहाय्यं कृतवद्भ्यः अनुजेभ्यः वासुदेवघोडाई, उत्तमघोषः, शान्तनुनायेकः, प्रीतमबेरा, प्रलयनन्दी इत्यादिभ्यः धन्यताभावसुरभितं कार्तज्ञ्यं समर्पयामि। शोधप्रबन्धस्य अस्य रचनाय यादवपुरविश्वविद्यालयस्य संस्कृतविभागस्य तथा रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागस्य ग्रन्थागारस्य ग्रन्थानां निर्बाधं समास्वादनं कृतमिति तत्रत्येभ्यः अध्यक्षेभ्यः तथा सहायकेभ्यः सर्वेभ्यः कृतज्ञतां विनिवेदयामि। एवञ्च शोधकार्यनिर्माणे प्रत्यक्षाप्रत्यक्षारूपेण सहायकेभ्यः सर्वेभ्यः पौनःपुन्येन कार्तज्ञ्यं विनिवेदयामि।

इत्थं विनीतः

दिनाङ्कः – ___/___/ 2025

बुलेट्-मण्डलः

# प्रस्तावना

मानवाः शब्देनैव स्वमनोगतभावान् प्रकटयन्ति। तत्र विविधेषु स्थानेषु विविधाः भाषाः विद्यन्ते। भाषागतशब्दानां नियन्त्रणार्थं च विद्यन्ते नियमाः। शब्दानुशासनञ्च क्रियते व्याकरणद्वारा। तदुक्तं व्याक्रियन्ते शब्दा अनेन इति व्याकरणम्। लौकिकशब्दानां तथा वैदिकशब्दानाम् अनुशासनार्थं भगवता पाणिनिना अष्टाध्यायी इत्याख्यः ग्रन्थः रचितः। कालप्रवाहात् भाषागतशब्दानां मध्ये परिवर्तनं जायते। नूतनशब्दानामपि व्यवहारः दृश्यते। पाणिनिना सूत्रं रचितम्। तदनन्तरं कात्यायनेन वार्त्तिकं रचितम्। तदनन्तरं पतञ्जलिः महाभाष्यं रचितवान्। 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति महाभाष्यवचनानुसारं व्याकरणस्य मुख्यप्रयोजनेषु अन्यतमं हि लाघवम्। सर्वेषु पाणिनीयव्याकरणेतरव्याकरणशास्त्रेषु लाघवसाधकाः केचन उपायाः दृश्यन्ते। पाणिनीयव्याकरणेऽपि संक्षेपेण पदसिद्धिनिमित्तं बहवः उपायाः स्वीकृताः। तेषु उपायेषु अन्यतमो हि योगविभागरूपोपायः। येषां शब्दानां सिद्धिप्रक्रिया पाणिनीयसूत्रेण न सिध्यति तेषां शब्दानां सिद्ध्यर्थं योगविभागाद्युपायाः आश्रियन्ते। योगविभागाद् इष्टसिद्धिः इत्येका परिभाषा अस्ति। तेन इष्टस्य शब्दस्य साधुत्वप्रतिपादनार्थमेव योगविभागः स्वीक्रियते न त्वनिष्टस्य सिद्धये। महाभाष्यकारेण भगवता पतञ्जलिना बहुत्र सूत्रेषु योगविभागः स्वीकृतः। योगविभागज्ञानं विना व्याकरणशास्त्रे परा गतिः नैव

सिध्यति। यद्यपि तत्र तत्र प्रसङ्गेषु योगविभागविषये आचार्यैः उक्तं तथापि महाभाष्यान्तर्गतानां योगविभागानामेकत्र विस्तरेण समीक्षा नैव कृता। अतः विषयोऽयं मम अस्य शोधप्रबन्धस्य विषयत्वेन स्वीकृतः। इतः पूर्वं किशोरचन्द्रपाढीमहोदयेन पाणिनीयव्याकरणे योगविभागविमर्शः इति नामकः लघुग्रन्थः चरितः। तस्मिन् ग्रन्थे महाभाष्यकारोक्तयोगविभागाः प्रसङ्गप्राप्त्या संक्षेपेण उल्लिखिताः। मया त्वत्र शोधप्रबन्धे महाभाष्यकारस्वीकृतयोगविभागानां सविमर्शं विशद्विवरणं विहितमिति न पिष्टपेषणशङ्कावसर इति विशेषः। तत्र प्रत्येकं योगविभागस्य पर्यालोचनायाम् आदौ आक्षेपः उत्थापितः, ततः योगविभागेन आक्षेपस्य समाधानं प्रतिपादितम्। ततः परं योगविभागस्य आवश्यकता अस्ति न वेति समीक्षितम्। शास्त्रीयसिद्धान्तविषये विदुषां मतपार्थक्यं भवति एव, तत्रापि पुनः वैयाकरणसिद्धान्तविषये। अन्ते च काशिकाकारादीनां मतमपि आलोचितम्। तेन योगविभागविषये आचार्याणां मतज्ञानपुरस्सरं स्पष्टप्रतिपत्तिः भविष्यति। 'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। तत्र उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र व्याकरणसम्प्रदायानां

सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, त्रिमुनीनां सामान्यपरिचयः, महाभाष्यग्रन्थस्य परिचयः, सूत्रक्रमः प्रक्रियाक्रमः इत्येते केचन विषयाः संक्षेपेण आलोचिताः। 'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इत्यभिधेये प्रथमे अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः संज्ञाकरणादयः अष्ट मुख्या उपायाः वर्णिताः। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः। 'समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा' इति नामके द्वितीये अध्याये समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागः समीक्षितः। ततः प्रत्ययाधिकारस्थानां त्रयोदशसूत्राणां योगविभागः आलोचितः। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता। 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति नामके तृतीये अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः। 'पदाधिकारस्थानां योगविभागानां समीक्षा' इत्यभिधेये चतुर्थे अध्याये सप्तसूत्राणां योगविभागः आलोचितः। 'अवशिष्टानां योगविभागानां समीक्षा' इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागः अत्र समीक्षितः। एवञ्च मम शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागाः आलोचिताः।

एतावता पञ्चसु अध्यायेषु आलोचिताः विषयाः उपसंहारे संक्षेपेण वर्णिताः। शोधप्रबन्धस्य अन्ते एका परिशीलितग्रन्थपञ्जी प्रदत्ता।

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचो विन्यासवैचित्र्यमात्रमत्र विचार्यताम्॥

अतः 'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति' इति भाष्यवचनं मनसि निधाय व्याकरणशास्त्रस्य अध्ययनाध्यापने अयं शोधप्रबन्धः सहायको भवतु इति वाग्देव्याः स्वीकृतिः नितरां प्रार्थिता। एवञ्च अत्यल्पमतिना मया शोधपत्रमिदं विरचितम्। एतच्च कियत्साफल्यमेति तत्र विद्वांसः एव प्रमाणमिति शिवम्।

# सङ्केताक्षरसूची

| | |
|---|---|
| अ.को. | - अमरकोशः। |
| ऋ.त.प्रा. | - ऋक्तन्त्रप्रातिशाख्यम्। |
| क्र.सं. | - क्रमसंख्या। |
| त.बो. | - तत्त्वबोधिनी। |
| तै.सं. | - तैत्तिरीयसंहिता। |
| दे.भा. | - देवीभागवतम्। |
| धा.सं. | - धातुसंख्या। |
| प.उ.पु. | - पराशर-उपपुराणम्। |
| प.भा.शे. | - परिभाषेन्दुशेखरः। |
| प.ल.म. | - परमलघुमञ्जूषा। |
| पा.का.भा. | - पाणिनिकालीन भारत। |
| पा.शि. | - पाणिनीयशिक्षा। |
| पा.सू. | - पाणिनीयसूत्रम्। |
| पृ.सं. | - पृष्ठासंख्या। |
| फि.सू. | - फिट्सूत्रम्। |
| बा.म.र. | - बालमनोरमा। |
| ल.श.शे. | - लघुशब्देन्दुशेखरः। |
| वा.प. | - वाक्यपदीयम्। |
| वा.पु. | - वायुपुराणम्। |

| | |
|---|---|
| वि.पु. | - विष्णुपुराणम्। |
| वै.सि.कौ. | - वैयाकरणसिद्धान्तकौमुदी। |
| व्या.द.इति. | - व्याकरण् दर्शनेर् इतिहास्। |
| व्या.म.भा. | - व्याकरणमहाभाष्यम्। |
| श.कौ. | - शब्दकौस्तुभः। |
| श.प.ब्रा. | - शतपथब्राह्मणम्। |
| श्लो.सं. | - श्लोकसंख्या। |
| सं.व्या.इति. | - संस्कृतव्याकरणेर् इतिहास। |
| सम्पा. | - सम्पादकः। |

# संक्षिप्तसूचीपत्रम्


| क्रमः | विषयः | पत्राङ्कः |
|---|---|---|
| i) | प्रमाणपत्रम् | i |
| ii) | कृतज्ञतानिवेदनम् | ii |
| iii) | प्रस्तावना | iv |
| iv) | सङ्केताक्षरसूची | viii |
| **०.०.** | **उपोद्घातः** | **१ – ३२** |
| **१.०.** | **प्रथमोऽध्यायः –** पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः | **३३ – ६२** |
| **२.०.** | **द्वितीयोऽध्यायः –** समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा | **६३ – १३१** |
| **३.०.** | **तृतीयोऽध्यायः –** अङ्गाधिकारस्थानां योगविभागानां समीक्षा | **१३२ – १९६** |
| **४.०.** | **चतुर्थोऽध्यायः –** पदाधिकारस्थानां योगविभागानां समीक्षा | **१९७ – २२५** |
| **५.०.** | **पञ्चमोऽध्यायः –** अवशिष्टानां योगविभागानां समीक्षा | **२२६ – २६४** |
| **६.०.** | **उपसंहारः** | **२६५ – २७१** |
| **७.०.** | **परिशीलितग्रन्थपञ्जी** | **२७२ – २८३** |

# सूचीपत्रम्

| क्रमः | विषयः | पत्राङ्कः |
|---|---|---|
| i) | प्रमाणपत्रम् | i |
| ii) | कृतज्ञतानिवेदनम् | iii |
| iii) | प्रस्तावना | v |
| iv) | सङ्केताक्षरसूची | ix |
| **०.०.** | **उपोद्घातः** | **१ – ३२** |
| **०.१.** | **व्याकरणसम्प्रदायानां सामान्यपरिचयः** | **२** |
| **०.२.** | **पाणिनीयव्याकरणस्य सामान्यपरिचयः** | **४** |
| ०.२.१. | पाणिनिः | ६ |
| ०.२.२. | कात्यायनः | ७ |
| ०.२.३. | पतञ्जलिः | १० |
| ०.२.४. | महाभाष्यस्य परिचयः | ११ |
| १.२.५. | सूत्रक्रमः | १३ |
| ०.२.६. | प्रक्रियाक्रमः | १३ |
| **०.३.** | **सूत्रस्य परिचयः** | **१४** |
| ०.३.१. | सूत्रभेदाः | १७ |
| ०.३.१.१. | संज्ञासूत्रम् | १७ |
| ०.३.१.२. | परिभाषासूत्रम् | १९ |
| ०.३.१.३. | विधिसूत्रम् | २२ |
| ०.३.१.४. | नियमसूत्रम् | २३ |
| ०.३.१.५. | अतिदेशसूत्रम् | २५ |
| ०.३.१.६. | अधिकारसूत्रम् | २७ |
| **१.०.** | **प्रथमोऽध्यायः – पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः** | **३३ – ६२** |

**१.१. संज्ञाकरणम्** **३३**
**१.२. अनुबन्धकरणम्** **३६**
**१.३. स्थान्यादेशभावः** **३८**
**१.४. सिद्धासिद्धव्यवस्था** **४०**
**१.५. उत्सर्गापवादभावः** **४३**
**१.६. अन्तरङ्गबहिरङ्गभावः** **४५**
**१.७. ज्ञापनम्** **४७**
१.७.१. सूत्रेण ज्ञापनम् ४७
१.७.२. सूत्रस्थपदेन ज्ञापनम् ४९
१.७.३. पाणिनेः आचारेण ज्ञापनम् ५१
**१.८. प्रश्लेषः** **५३**
**१.९. योगविभागः** **५५**
१.९.१. योगशब्दस्य अर्थः ५६
१.९.२. योगविभागस्य सामान्यपरिचयः ५९
**२.०. द्वितीयोऽध्यायः – समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा** **६३ – १३१**
**२.१. सह सुपा (पा.सू. २.१.४)** **६४**
२.१.१. आक्षेपः ६४
२.१.२. योगविभागेन समाधानम् ६५
२.१.३. समीक्षणम् ६७
**२.२. तृतीया तत्कृतार्थेन गुणवचनेन (पा.सू. २.१.३०)** **७०**
२.२.१. आक्षेपः ७३
२.२.२. योगविभागेन समाधानम् ७३
२.२.३. समीक्षणम् ७४
**२.३. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः (पा.सू. २.१.३६)** **७६**
२.३.१. आक्षेपः ७८

२.३.२. योगविभागेन समाधानम् ७८

२.३.३. समीक्षणम् ७९

**२.४. श्लिष आलिङ्गने (पा.सू. ३.१.४६) ८१**

२.४.१. आक्षेपः ८१

२.४.२. योगविभागेन समाधानम् ८३

२.४.३. समीक्षणम् ८४

**२.५. सुपि स्थः (पा.सू. ३.२.४) ८५**

२.५.१. आक्षेपः ८५

२.५.२. योगविभागेन समाधानम् ८६

२.५.३. समीक्षणम् ८७

**२.६. तौ सत् (पा.सू. ३.२.१२७) ८८**

२.६.१. आक्षेपः ८९

२.६.२. योगविभागेन समाधानम् ९१

२.६.३. समीक्षणम् ९२

**२.७. लृट् शेषे च (पा.सू. ३.३.१३) ९३**

२.७.१. आक्षेपः ९४

२.७.२. योगविभागेन समाधानम् ९५

२.७.३. समीक्षणम् ९६

**२.८. अनद्यतने लुट् (पा.सू. ३.३.१५) ९७**

२.८.१. आक्षेपः ९७

२.८.२. योगविभागेन समाधानम् ९८

२.८.३. समीक्षणम् ९९

**२.९. क्रियासमभिहारे लोट् लोटो...(पा.सू. ३.४.२) ९९**

२.९.१. आक्षेपः १००

२.९.२. योगविभागेन समाधानम् १०२

२.९.३. समीक्षणम् १०४

**२.१०. युष्मदस्मदोरन्यतरस्यां खञ् च (पा.सू. ४.३.१)** **१०४**
२.१०.१. आक्षेपः १०५
२.१०.२. योगविभागेन समाधानम् १०६
२.१०.३. समीक्षणम् १०७
**२.११. तस्मिन्नणि च युष्माकास्माकौ (पा.सू. ४.३.२)** **१०८**
२.११.१. आक्षेपः १०९
२.११.२. योगविभागेन समाधानम् ११०
२.११.३. समीक्षणम् १११
**२.१२. संज्ञायां कुलालादिभ्यो वुञ् (पा.सू. ४.३.११७)** **१११**
२.१२.१. आक्षेपः ११२
२.१२.२. योगविभागेन समाधानम् ११२
२.१२.३. समीक्षणम् ११४
**२.१३. विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् (पा.सू. ५.१.२४)** **११४**
२.१३.१. आक्षेपः ११६
२.१३.२. योगविभागेन समाधानम् ११६
२.१३.३. समीक्षणम् ११७
**२.१४. तत्र च दीयते कार्यं भववत् (पा.सू. ५.१.९६)** **११८**
२.१४.१. आक्षेपः ११९
२.१४.२. योगविभागेन समाधानम् ११९
२.१४.३. समीक्षणम् १२१
**२.१५. किमिदम्भ्यां वो घः (पा.सू. ५.२.४०)** **१२२**
२.१५.१. आक्षेपः १२२
२.१५.२. योगविभागेन समाधानम् १२३
२.१५.३. समीक्षणम् १२३
**२.१६. एतदोऽन् (पा.सू. ५.३.५)** **१२४**
२.१६.१. आक्षेपः १२५

२.१६.२. योगविभागेन समाधानम् १२५

२.१६.३. समीक्षणम् १२६

**३.०. तृतीयोऽध्यायः – अङ्गाधिकारस्थानां योगविभागानां समीक्षा १३२ – १९६**

**३.१. अज्झनगमां सनि (पा.सू. ६.४.१६) १३३**

३.१.१. आक्षेपः १३४

३.१.२. योगविभागेन समाधानम् १३५

३.१.३. समीक्षणम् १३६

**३.२. जनसनखनां सञ्झलोः (पा.सू. ६.४.४२) १३७**

३.२.१. आक्षेपः १३८

३.२.२. योगविभागेन समाधानम् १३९

३.२.३. समीक्षणम् १३९

**३.३. यस्य हलः (पा.सू. ६.४.४९) १४०**

३.३.१. आक्षेपः १४१

३.३.२. योगविभागेन समाधानम् १४२

३.३.३. समीक्षणम् १४३

**३.४. अयामन्ताल्वाय्येत्न्विष्णुषु (पा.सू. ६.४.५५) १४४**

३.४.१. आक्षेपः १४५

३.४.२. योगविभागेन समाधानम् १४५

३.४.३. समीक्षणम् १४६

**३.५. एरनेकाचोऽसंयोगपूर्वस्य (पा.सू. ६.४.८२) १४६**

३.५.१. आक्षेपः १४९

३.५.२. योगविभागेन समाधानम् १४९

३.५.३. समीक्षणम् १५१

**३.६. उतश्च प्रत्ययादसंयोगपूर्वात् (पा.सू. ६.४.१०६) १५१**

३.६.१. आक्षेपः १५३

३.६.२. योगविभागेन समाधानम् १५३
३.६.३. समीक्षणम् १५४
**३.७. अल्लोपोऽनः (पा.सू. ६.४.१३४) १५५**
३.७.१. आक्षेपः १५५
३.७.२. योगविभागेन समाधानम् १५६
३.७.३. समीक्षणम् १५७
**३.८. आतो धातोः (पा.सू. ६.४.१४०) १५८**
३.८.१. आक्षेपः १५९
३.८.२. योगविभागेन समाधानम् १५९
३.८.३. समीक्षणम् १६०
**३.९. आत्मनेपदेष्वनतः (पा.सू. ७.१.५) १६१**
३.९.१. आक्षेपः १६२
३.९.२. योगविभागेन समाधानम् १६३
३.९.३. समीक्षणम् १६३
**३.१०. षड्भ्यो लुक् (पा.सू. ७.१.२२) १६४**
३.१०.१. आक्षेपः १६५
३.१०.२. योगविभागेन समाधानम् १६६
३.१०.३. समीक्षणम् १६७
**३.११. णलुत्तमो वा (पा.सू. ७.१.९१) १६८**
३.११.१. आक्षेपः १६८
३.११.२. योगविभागेन समाधानम् १६९
३.११.३. समीक्षणम् १७०
**३.१२. णेरध्ययने वृत्तम् (पा.सू. ७.२.२६) १७०**
३.१२.१. आक्षेपः १७१
३.१२.२. योगविभागेन समाधानम् १७१
३.१२.३. समीक्षणम् १७२

**३.१३. आर्धधातुकस्येड् वलादेः (पा.सू. ७.२.३५)** **१७३**
३.१३.१. आक्षेपः १७३
३.१३.२. योगविभागेन समाधानम् १७४
३.१३.३. समीक्षणम् १७५
**३.१४. उपदेशेऽत्वतः (पा.सू. ७.२.६२)** **१७६**
३.१४.१. आक्षेपः १७७
३.१४.२. योगविभागेन समाधानम् १७९
३.१४.३. समीक्षणम् १८०
**३.१५. बहुवचने झल्येत् (पा.सू. ७.३.१०३)** **१८१**
३.१५.१. आक्षेपः १८१
३.१५.२. योगविभागेन समाधानम् १८२
३.१५.३. समीक्षणम् १८३
**३.१६. ह्रस्वस्य गुणः (पा.सू. ७.३.१०८)** **१८४**
३.१६.१. आक्षेपः १८४
३.१६.२. योगविभागेन समाधानम् १८६
३.१६.३. समीक्षणम् १८७
**३.१७. ऋदृशोऽङि गुणः (पा.सू. ७.४.१६)** **१८७**
३.१७.१. आक्षेपः १८८
३.१७.२. योगविभागेन समाधानम् १८९
३.१७.३. समीक्षणम् १८९
**३.१८. हलादिः शेषः (पा.सू. ७.४.६०)** **१९०**
३.१८.१. आक्षेपः १९१
३.१८.२. योगविभागेन समाधानम् १९२
३.१८.३. समीक्षणम् १९३
**४.०. चतुर्थोऽध्यायः – पदाधिकारस्थानां योगविभागानां समीक्षा**
**१९७ – २२५**

**४.१. सामान्यवचनं विभाषितं विशेषवचने (पा.सू. ८.१.७३) १९८**
४.१.१. आक्षेपः १९९
४.१.२. योगविभागेन समाधानम् २००
४.१.३. समीक्षणम् २०१
**४.२. उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पा.सू. ८.२.४) २०२**
४.२.१. आक्षेपः २०४
४.२.२. योगविभागेन समाधानम् २०५
४.२.३. समीक्षणम् २०६
**४.३. झलां जशोऽन्ते (पा.सू. ८.२.३९) २०७**
४.३.१. आक्षेपः २०८
४.३.२. योगविभागेन समाधानम् २०९
४.३.३. समीक्षणम् २१०
**४.४. रदाभ्यां निष्ठातो नः पूर्वस्य च दः (पा.सू. ८.२.४२) २११**
४.४.१. आक्षेपः २१२
४.४.२. योगविभागेन समाधानम् २१३
४.४.३. समीक्षणम् २१४
**४.५. रायो हलि (पा.सू. ७.२.८५) २१४**
४.५.१. आक्षेपः २१५
४.५.२. योगविभागेन समाधानम् २१६
४.५.३. समीक्षणम् २१७
**४.६. विभाषा पृष्टप्रतिवचने हेः (पा.सू. ८.२.९३) २१७**
४.६.१. आक्षेपः २१८
४.६.२. योगविभागेन समाधानम् २१९
४.६.३. समीक्षणम् २२०
**४.७. कुप्वोः ≍क≍पौ च (पा.सू. ८.३.३७) २२०**
४.७.१. आक्षेपः २२२

४.७.२. योगविभागेन समाधानम् २२२
४.७.३. समीक्षणम् २२३

**५.०. पञ्चमोऽध्यायः – अवशिष्टानां योगविभागानां समीक्षा २२६ – २६४**

**५.१. अदसो मात् (पा.सू. १.१.१२) २२६**
५.१.१. आक्षेपः २२८
५.१.२. योगविभागेन समाधानम् २२९
५.१.३. समीक्षणम् २३०

**५.२. तृतीयासमासे (पा.सू. १.१.३०) २३२**
५.२.१. आक्षेपः २३३
५.२.२. योगविभागेन समाधानम् २३४
५.२.३. समीक्षणम् २३५

**५.३. न पदान्तर्द्विवचनवरेयलोप...(पा.सू.१.१.५८) २३८**
५.३.१. आक्षेपः २३९
५.३.२. योगविभागेन समाधानम् २४०
५.३.३. समीक्षणम् २४०

**५.४. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (पा.सू. २.३.१७) २४१**
५.४.१. आक्षेपः २४१
५.४.२. योगविभागेन समाधानम् २४२
५.४.३. समीक्षणम् २४३

**५.५. कृत्यानां कर्तरि वा (पा.सू. २.३.७१) २४४**
५.५.१. आक्षेपः २४५
५.५.२. योगविभागेन समाधानम् २४५
५.५.३. समीक्षणम् २४६

**५.६. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा.सू. २.४.२) २४७**
५.६.१. आक्षेपः २४७
५.६.२. योगविभागेन समाधानम् २४८

५.६.३. समीक्षणम् २४८

**५.७. उपसर्गादृति धातोः (पा.सू. ६.१.९१) २४९**

५.७.१. आक्षेपः २५०

५.७.२. योगविभागेन समाधानम् २५१

५.७.३. समीक्षणम् २५२

**५.८. अमि पूर्वः (पा.सू. ६.१.१०६) २५२**

५.८.१. आक्षेपः २५३

५.८.२. योगविभागेन समाधानम् २५४

५.८.३. समीक्षणम् २५४

**५.९. कुरुगार्हपत...दासीभाराणां च (पा.सू. ६.२.४२) २५५**

५.९.१. आक्षेपः २५५

५.९.२. योगविभागेन समाधानम् २५६

५.९.३. समीक्षणम् २५७

**५.१०. अट्कुप्वाङ्नुम्व्यवायेऽपि (पा.सू. ८.४.२) २५७**

५.१०.१. आक्षेपः २५७

५.१०.२. योगविभागेन समाधानम् २५८

५.१०.३. समीक्षणम् २५९

**५.११. स्तोः श्चुना श्चुः (पा.सू. ८.४.४०) २६०**

५.११.१. आक्षेपः २६१

५.११.२. योगविभागेन समाधानम् २६१

५.११.३. समीक्षणम् २६३

**६.०. उपसंहारः २६५ – २७१**

**७.०. परिशीलितग्रन्थपञ्जी २७२ – २८३**

# उपोद्घातः

इह जगति मनुष्याः शब्देनैव स्वमनोगतभावान् प्रकटयन्ति। तत्र विविधेषु स्थानेषु विविधाः भाषाः विद्यन्ते। भाषागतशब्दानां नियन्त्रणार्थं च विद्यन्ते नियमाः। व्याक्रियन्ते शब्दा अनेन इति व्युत्पत्त्यनुसारं व्याकरणेनैव शब्दानुशासनं क्रियते । संस्कृतभाषायाः बहूनि व्याकरणानि सन्ति। तेषु व्याकरणेषु पाणिनीयं व्याकरणं मूर्धन्यस्थानं भजते। अस्मिन् व्याकरणे लौकिकशब्दानां वैदिकशब्दानाञ्च अनुशासनं दृश्यते। अतः इदं व्याकरणं सर्वव्यापि भवति। वेदान्तादिशास्त्रस्य यथा स्मृतिशास्त्रत्वमस्ति तथैव व्याकरणशास्त्रस्यापि स्मृतिशास्त्रत्वमस्ति। किञ्च वेदान्तादिशास्त्रं वेदस्य उपाङ्गेषु अन्तर्भवति, व्याकरणं तु वेदस्य साक्षादङ्गम्। तदुक्तं पाणिनीयशिक्षायां –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ [१] इति।

महाभाष्येऽपि भणितं – 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः इति। प्रधानं च षट्सु अङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान्भवति।' [२] इति। ज्ञानार्थकाद् दृश्-धातोः निष्पन्नः दर्शनशब्दः। दृश्यते अनेन इति दर्शनमिति व्युत्पत्त्या दर्शनशब्दस्य अर्थो भवति

ज्ञानकरणमिति। व्याकरणस्यापि शब्दब्रह्मविषयकज्ञानकरणत्वमस्त्येव। तदुक्तं भर्तृहरिणा –

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षते॥[३] इति।

व्याकरणेन शब्दज्ञाने सति शब्दब्रह्म अधिगम्यते। शब्दब्रह्मणि अधिगते परब्रह्म अधिगम्यते। तथाहि श्रुतिः – 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।' इति।

**०.१. व्याकरणसम्प्रदायानां सामान्यपरिचयः**

एवं हि श्रुयते बृहस्पतिः इन्द्राय शब्दपारायणम् प्रोवाच। दिव्यं वर्षसहस्रपर्यन्तम् इन्द्रस्य अध्ययनकालः आसीत्। तथापि शब्दपारायणस्य अध्ययनं न समाप्तम्। एतावान् महान् विस्तरः शब्दपारायणस्य। तथाहि उक्तं भगवता पतञ्जलिना – 'बृहस्पतिः इन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्च अध्येता, दिव्यं वर्षसहस्रम् अध्ययनकालः, न चान्तं जगाम' इति।[४] देवानां मनसि शब्दज्ञानस्य इच्छा जाता। परन्तु शब्दपारायणं क्रियते चेत् महान् कालः आवश्यकः। तदा देवाः इन्द्रं प्रार्थितवन्तः। देवानां प्रार्थनां श्रुत्वा इन्द्रः सर्वप्रथमम् एकैकस्य शब्दस्य प्रकृतिप्रत्ययेषु विभाजनं

कृतवान्। तदा अल्पेन कालेन अनायासेन च शब्दज्ञानं, शब्दव्याकरणं ज्ञातुं शक्यम् अभवत्। इत्थं संस्कृतभाषायाः व्याकरणस्य आरम्भः जातः। तथाहि श्रुतिः – 'वाग्वै परावागव्याकृतावदत् ते देवा इदमब्रुवन् इमां नो वाचं व्याकुर्विति... तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। ...तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्।'[५] इति। इन्द्रः कस्माद् अधीतवान्, कान् पाठितवान् इति विषये ऋक्तन्त्रे व्याकरणस्य परम्परा इत्थं वर्णिता – 'ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिः इन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयः ब्राह्मणेभ्यः, तं खलु इमम् अक्षरसमाम्नायम् इत्याचक्षते।'[६] इति। अर्थात् व्याकरणस्य प्रथमाचार्यः ब्रह्मा, द्वितीयाचार्यः बृहस्पतिः, तृतीयाचार्यः इन्द्रः, चतुर्थः भरद्वाजः, पञ्चमाः ऋषयः इति। एवं व्याकरणस्य परम्परायां पाणिनिः अन्यतमः।

व्याकरणवाङ्मये ऐन्द्रं व्याकरणं प्राचीनतममित्यत्र तु नास्ति मतपार्थक्यम्। तदनन्तरं नैके वैयाकरणाः व्याकरणशास्त्रं चरितवन्तः। अतः नैके व्याकरणसम्प्रदायाः सञ्जाताः। इन्द्रादारभ्य अद्य प्रभृति आहत्य कति वैयाकरणाः अभवन् इति तु निश्चयरूपेण वक्तुं नैव शक्यते। पाणिनिना अष्टाध्यायीग्रन्थे दशवैयाकरणानां नामनिर्देशपूर्वकोल्लेखः कृतः। तेषां नामानि हि – १) आपिशलिः (पा.सू. ६.१.९२), २) काश्यपः (पा.सू.

१.२.२५), ३) गार्ग्यः (पा.सू. ८.३.२०), ४) गालवः (पा.सू. ७.१.७४), ५) चाक्रवर्मणः (पा.सू. ६.१.१३०), ६) भारद्वाजः (पा.सू. ७.२.६३), ७) शाकटायनः (पा.सू. ३.४.१११), ८) शाकल्यः (पा.सू. १.१.१६), ९) सेनकः (पा.सू. ५.४.११२), १०) स्फोटायनः (पा.सू. ६.१.१२३) चेति। एतान् अतिरिच्य अपि बहूनां वैयाकरणानां नामानि प्राचीनग्रन्थेषु प्राप्यन्ते। आधुनिकवैयाकरणैः अष्टौ व्याकरणसम्प्रदायाः मुख्यतया स्वीक्रियन्ते। तदुक्तं बोपदेवेने स्वकीये कविकल्पद्रुमाख्ये ग्रन्थे –

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥ इति।

इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनेन्द्रः इत्येते अष्टौ वैयाकरणाः स्वस्वसम्प्रदायस्य प्रवर्तकाः। एमष्टौ व्याकरणसम्प्रदायाः प्रसिद्धाः सन्ति।

**०.२. पाणिनीयव्याकरणस्य सामान्यपरिचयः**

अष्टौ व्याकरणसम्प्रदायेषु पाणिनिसम्प्रदायः अन्यतमः। पाणिनिमुनिः महेश्वरस्य तीव्रं तपः कृतवान्। तस्य तपसा शिवः प्रसन्नः जातः। तदा शिवः आविर्भूय चतुर्दशवारं ढक्कां नादितवान्। स एव ढक्कानादः अक्षरसमाम्नायः, चतुर्दशसूत्री, माहेश्वरसूत्राणि इति कथ्यते। एतानि सूत्राणि

अवलम्ब्य भगवता पाणिनिना अष्टाध्यायीनामको ग्रन्थः रचितः। ग्रन्थेऽस्मिन् अष्टौ अध्यायाः सन्ति। प्रति अध्यायं चत्वारः पादाः सन्ति। प्रति पादं सूत्राणि सन्ति। तत्र प्रथमाध्यायद्वये पदानां भेदाः, वाक्ये पदानां परस्परसम्बन्धाश्च आलोचिताः सन्ति। तृतीयाध्याये तिङन्तशब्दानां प्रकृतिप्रत्ययविभागः दृश्यते। चतुर्थाध्याये तथा पञ्चमाध्याये सुबन्तशब्दानां प्रकृतिप्रत्ययविभागः दृश्यते। षष्ठाध्याये तथा सप्तमाध्याये आगमादेशादिद्वारा शब्दानां निष्पत्तिप्रक्रिया वर्णिता अस्ति। अष्टमाध्याये सन्धिविषये स्वरविषये च चर्चा दृश्यते। पाणिनिकृतसूत्राणामर्थं विशदीकर्तुं कात्यायनमुनिः वार्त्तिकानि रचितवान्। पाणिनिमुनिना उक्तस्य अनुक्तस्य दुरुक्तस्य च चिन्ता तेषु वार्त्तिकेषु वर्तते। कालप्रवाहेण पाणिनीयव्याकरणे बहुषु स्थलेषु अनेके पूर्वपक्षाः समुत्पन्नाः। तेषां पूर्वपक्षाणां समाधानाय भगवान् पतञ्जलिः महाभाष्यं रचितवान्। महाभाष्ये पतञ्जलिना पाणिनीयसूत्राणां कात्यायनकृतवार्त्तिकानाञ्च व्याख्या कृता। महाभाष्ये विषयप्रतिपादनशैली अत्यन्तं सरला किन्तु विषयः अतीव गभीरः अस्ति। पाणिनिः कात्यायनः पतञ्जलिः इति मुनित्रयम्। मुनित्रयस्य प्रयत्नेन समृद्धं व्याकरणमेव त्रिमुनिव्याकरणमिति प्रथितम्।

## ०.२.१ पाणिनिः

पाणिनिमुनिः कस्मिन् कालखण्डे जनिमलभत इति विषये विद्वज्जनेषु नास्ति मतैक्यम्। २८०० ईसपूर्वाब्दतः ५०० ईसपूर्वाब्दपर्यन्तं यः कालखण्डः तस्मिन्नेव कालखण्डे पाणिनेः जन्म अभवदिति वयं स्वीकर्तुं शक्नुमः।[७] अष्टाध्यायीग्रन्थे वैदिकशब्दानामपि शासनं क्रियते। तेन ज्ञायते यत् तदा वैदिकभाषाया अपि प्रचारः आसीत्। वस्तुतः तदा संस्कृतभाषा एव सामाजिकव्यवहारस्य प्रधानीभूता भाषा आसीदिति पाणिनेः अष्टाध्यायीग्रन्थादेव ज्ञायते। संस्कृतभाषया एव जनाः तेषां व्यवहारं सम्पादयन्ति स्म। संस्कृतभाषायाः व्यवहारः गौतमबुद्धस्य प्रागेव आसीत्। यतो हि गौतमबुद्धस्य समये संस्कृतस्य एतादृशः प्रचारः नासीत्। पाणिनेः जन्मस्थानं पश्चिमभारतस्य शलातुर इति ग्राम आसीत्। अतः शालातुरीयः इत्यपि पाणिनेः नाम अस्ति। पाणिनेः गुरोः नाम उपवर्ष आसीत्। पितुः नाम पणिनः, मातुः नाम दाक्षी इति आसीत्। पाणिनेः प्राक् नैके वैयाकरणाः आसन्। तेषां ग्रन्थान् परिभाव्य, तेषां मतभेदं परिशील्य च अष्टाध्यायीनामकं ग्रन्थं विरचितवान्। अष्टाध्यायीग्रन्थे शाकटायनः, शाकल्यः, भारद्वाजः, गार्ग्यः, सेनकः, आपिशलिः, गालबः, स्फोटायनः प्रभृतयः आचार्याः पाणिनिना स्मृताः। तेषां मतानामपि उल्लेखः दृश्यते।

अष्टाध्याय्यां वैदिकशब्दानां लौकिकशब्दानाञ्च अनुशासनं कर्तुं सूत्राणि पठितानि। गणपाठः, धातुपाठः, उणादिसूत्रं, लिङ्गानुशानं, फिट्सूत्रम् इत्येतान् ग्रन्थान् आधारीकृत्य पाणिनिना अष्टाध्यायी रचिता।

### ०.२.२ कात्यायनः

पाणिनिः तदानीन्तनकाले विद्यमानान् संस्कृतशब्दान् सम्यक् परिशील्य सूत्रं विरचितवान्। पाणिनेः समये संस्कृतभाषा एव व्यावहारिकी भाषा आसीत्। कालप्रवाहेण केषाञ्चित् शब्दानां रूपे परिवर्तनं परिलक्ष्यते। केषाञ्चित् नूतनशब्दानाञ्च व्यवहारः दृश्यते। तेषां शब्दानाम् अनुशासनार्थं पाणिनिना नियमः नैव कृतः। किञ्च पाणिनिः पश्चिमभारतीयः, कात्यायनः दक्षिणभारतीयः आसीत्। तेन स्थानभेदात् शब्दानां प्रायोगिकभेदः स्वाभाविकः आसीत्। अतः पाणिनीयसूत्रान् अवलम्ब्य समीक्षात्मकरूपेण परिशिष्टात्मकरूपेण वा आचार्येण कात्यायनेन वार्त्तिकानि विरचितानि। तदुक्तं पाराशरोपपुराणे –

> उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
> तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा मनीषिणः॥[८] इति।

अर्थात् यत्र उक्तानुक्तदुरुक्तानां चर्चा क्रियते तदेव वार्त्तिकमिति उच्यते वार्त्तिकज्ञैः इत्यर्थः। कात्यायनरचितवार्त्तिकानि प्रायः १४०० सन्ति। परन्तु

न कश्चित् पृथक् ग्रन्थः उपलभ्यते यत्र एतानि वार्त्तिकानि उपलभ्यन्ते। अपि तु भगवता पतञ्जलिना महाभाष्ये एतानि वार्त्तिकानि सप्रसङ्गं उद्धृतानि। कात्यायनप्रणीतानि वार्त्तिकानि त्रिविधानि सन्ति। तथाहि –

१) उक्तचिन्ताप्रवर्तकं वार्त्तिकम्। अर्थात् पाणिनिसूत्रस्थपदविषय-चिन्ता यत्र वर्तते तद्वार्त्तिकम् उक्ताचिन्ताप्रवर्तकं वार्त्तिकमिति उच्यते। उदाहरणं यथा 'नदीसञ्ज्ञायामाख्याग्रहणं स्त्रीविषयार्थम्' इति वार्त्तिकम्। तथाहि – 'यू स्त्र्याख्यौ नदी' (पा.सू. १.४.३) इति सूत्रेण नदी संज्ञा विधीयते। अस्मिन् सूत्रे आख्याशब्दग्रहणस्य आवश्यकता अस्ति न वेति आशङ्कायामिदं वार्त्तिकम्। पाणिनीयसूत्रे आख्याशब्दः उक्त एव अस्ति। तद्विषये एव प्रकृते वार्त्तिके चर्चा क्रियते। अतः इदं वार्त्तिकम् उक्तचिन्ताप्रवर्तकमस्ति।

२) अनुक्तचिन्ताप्रवर्तकं वार्त्तिकम्। अर्थात् पाणिनीयसूत्रे यदनुक्तम् अथवा यदुक्तं तदपर्याप्तमस्ति तद्विषये चर्चा यत्र वर्तते तद्वार्त्तिकम् अनुक्तचिन्ताप्रवर्तकमिति उच्यते। उदाहरणं यथा – 'केलिमर उपसंख्यानम्' इति वार्त्तिकम्। तथाहि – 'कृत्याः' इत्यधिकारस्थेन 'तव्यत्तव्यानीयरः' (पा.सू. ३.१.९६) इति सूत्रेण तव्यत्प्रत्ययः, तव्यप्रत्ययः

तथा अनीयर्-प्रत्ययः इत्येते त्रयः प्रत्ययाः विधीयन्ते। प्रकृतवार्त्तिकेन केलिमर इत्येकः अपरः प्रत्ययः विधीयते। तेन पचेलिमाः, भिदेलिमाः इत्यादि रूपाणि सिध्यन्ति।

३) दुरुक्तचिन्ताप्रवर्तकं वार्त्तिकम्। पाणिनीयसूत्रैः विधीयमानकार्येषु कदाचित् अतिव्याप्तिदोषः अव्याप्तिदोषो वा दृश्यते। तद्वारणाय यद्वार्त्तिकं तद् दुरुक्तचिन्ताप्रवर्तकमिति उच्यते। उदाहरणं यथा – 'समासप्रत्ययविधौ प्रतिषेधः' इति वार्त्तिकम्। तथाहि – 'येन विधिस्तदन्तस्य' (पा.सू. १.१.७२) इति सूत्रेण तदन्तविधिः विधीयते। तेन 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (पा.सू. २.१.२४) इति सूत्रेण यथा कष्टं श्रितः इत्यादौ समासः भवति तथैव कष्टं परमश्रितः इत्यादावपि समासः प्राप्नोति। तदा प्रकृतवार्त्तिकेन समासविधौ संज्ञाविधौ च तदन्तविधेः प्रतिषेधः क्रियते। तेन 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' इत्यत्र समासविधौ तदन्तविधिः न भवति। अतः कष्टं परमश्रितः इत्यादौ न समासः।

### ०.२.३ पतञ्जलिः

महर्षिपतञ्जलिः पाणिनीयव्याकरणस्य प्रामाणिकः आचार्यः अस्ति। पतञ्जलेः समयोऽपि विवादग्रस्तोऽस्ति। पाश्चात्यविद्वांसः अस्य समयः १५० ईसपूर्वाब्दः इति स्वीकुर्वन्ति। युधिष्ठिरमीमांसकेन पाश्चात्यविदूषां मतं निरस्य १००० ईसपूर्वाब्दः स्वीकृतः।[९] एतत्तु निश्चितं यत् पाणिनेः बहुवर्षेभ्यः परं कात्यायनः आसीत्। कात्यायनमुनेः बहुवर्षेभ्यः परं पतञ्जलिः आसीत्। पतञ्जलेः जन्मस्थानं कश्मीरप्रदेशः आसीदिति युधिष्ठिरमीमांसकेन स्वीकृतः।[१०] बलदेव-उपाध्यायः पतञ्जलेः जन्मस्थानं काशी इति स्वीकृतवान्। पतञ्जलेः समये पाणिनेः नियमाः यथा प्रचलिताः आसन् तथैव अपाणिनीयाः अपि शब्दाः व्यवह्रियन्ते स्म। एतादृशशब्दानां साधुत्वप्रतिपादनाय पतञ्जलिना इष्टयः आश्रिताः। शास्त्रीयनियमापेक्षया लोकव्यवहारस्य प्राधान्यं स्वीकृतम्। उदाहरणं यथा भाष्ये – 'किं च भो इष्यत एतद्रूपम्? वाढमिष्यते। एवं हि कश्चिद् वैयाकरण आह – कोऽस्य रथस्य प्रवेतेति। सूत आह – अहमायुष्मन्नस्य रथस्य प्राजितेति। वैयाकरण आह – अपशब्द इति। सूत आह – प्राप्तिज्ञो देवानां प्रियः, न त्विष्टिज्ञः। इष्यते – एतद्रूपमिति।'[११] एवमेव बहुत्र भगवता पतञ्जलिना लोकव्यवहारमवलम्ब्य शब्दस्य साधुत्वं स्वीकृतम्।

### ०.२.४ महाभाष्यस्य परिचयः

विभिन्नशास्त्राणां व्याख्याग्रन्थाः भाष्यशब्देन व्यवह्रियन्ते। भाष्यस्य स्वरूपमुक्तं –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥[१२] इति।

पतञ्जलिना विरचितं भाष्यं महाभाष्यमिति कथ्यते। अत्र कारणं हि भाष्यस्यास्य माहात्म्यम्। अपरमेकं कारणं हि पतञ्जलेः पूर्वमपि बहवः भाष्यग्रन्थाः विद्यमानाः आसन्, प्रायः तेभ्यः अस्य भेदप्रदर्शनार्थं महाभाष्यमिति उच्यते। पाणिनेः अष्टाध्यायीग्रन्थस्थसूत्राणां कात्यायनविरचितवार्त्तिकानाञ्च व्याख्या महर्षिणा पतञ्जलिना महाभाष्यग्रन्थे कृता। अस्मिन् ग्रन्थे शब्दानुशासनार्थं कृतानां नियमानां विचारः कृतः। सूत्रविचारकाले तत्र तत्र सन्दर्भे व्याकरणस्य शब्दनित्यत्ववादः, स्फोटवादः इत्यादीनां दार्शनिकतत्त्वानामपि विचारः दृश्यते। भर्तृहरिणा स्वकीये वाक्यपदीयग्रन्थे एतानि दार्शनिकतत्त्वानि विस्तरेण प्रतिपादितानि। अत एवोक्तं भर्तृहरिणा –

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥ इति।[१३]

महाभाष्ये न सर्वेषां पाणिनीयसूत्राणां व्याख्या कृता अपि तु प्रमुखानामेव सूत्राणां व्याख्या कृता। महाभाष्यस्य विशिष्टा व्याख्यानशैली अस्ति। संशयास्पदस्थले आदौ पूर्वपक्षस्य चर्चा दृश्यते अनन्तरम् उत्तरपक्षस्य। महाभाष्यस्य व्याख्याक्रमः अष्टाध्यायीस्थसूत्रक्रमानुसारमेव अस्ति। अत्र ८५ आह्निकानि विद्यन्ते। अह्ना निवृत्तम् आह्निकम् इति व्युत्पत्त्या एकस्मिन् दिवसे चर्चितः विषयः यत्र संगृहीतः तद् आह्निकमिति उच्यते।

बहुभिः विद्वज्जनैः महाभाष्यस्य व्याख्या कृता। ज्येष्ठकलशः, मैत्रेयरक्षितः, पुरुषोत्तमदेवः, धनेश्वरः, शेषनारायणः, विष्णुमित्रः, नीलकण्ठः, शेषविष्णुः, शिवरामेन्द्रसरस्वती, प्रयागवेङ्कटाद्रिः, तिरुमलयज्वा, कुमारतातयः, राजन्सिहः, नारायणः, सर्वेश्वरदीक्षितः, गोपालकृष्णशास्त्री इत्येते विद्वांसः महाभाष्यस्य संस्कृतव्याख्यां कृतवन्तः। भर्तृहरेः महाभाष्यदीपिकाख्या व्याख्या उपलभ्यमानासु व्याख्यासु प्राचीनतमा। कैय्यटकृता प्रदीपव्याख्या, भट्टोजिदीक्षितकृता शब्दकौस्तुभव्याख्या च अपि प्रसिद्धा। कैय्यटस्य प्रदीपव्याख्यामवलम्ब्य नागेशेन उद्योतनामिका व्याख्या कृता।

### ०.२.५ सूत्रक्रमः

पाणिनीयव्याकरणस्य अध्ययनाध्यापनस्य प्रकारद्वयमस्ति। सूत्रक्रमः प्रक्रियाक्रमश्चेति। अष्टाध्यायीग्रन्थे पाणिनिमुनिना येन क्रमेण सूत्राणि रचितानि तेनैव क्रमेण सूत्राणां व्याख्यानम्, अध्ययनम्, अध्यापनं वा भवति चेत् स सूत्रक्रमः इति कथ्यते। सूत्रक्रममाश्रित्य रचितग्रन्थेषु अन्यतमो ग्रन्थः महर्षिपतञ्जलेः महाभाष्यम् इति ग्रन्थः। महाभाष्यस्य आशयं प्रकटयितुं प्रदीपः नाम टीका कैयटेन लिखिता। प्रदीपटीकामाश्रित्य उद्योतः नाम टीका नागेशेन लिखिता। अष्टाध्यायीग्रन्थमवलम्ब्य काशिकानामकं ग्रन्थं वामनजयादित्यौ द्वौ जनौ लिखितवन्तौ। काशिकायाः टीकाद्वयं प्रसिद्धं, हरदत्तस्य पदमञ्जरीटीका, जिनेन्द्रबुद्धेः न्यासटीका चेति। सम्प्रति अपि भारते आर्यसमाजीयाः सूत्रक्रमेण अध्ययनाध्यापनादिकं कुर्वन्ति। विदुषी पुष्पादीक्षित अपि स्वशिष्यान् सूत्रक्रमेणैव पाठयति।

### ०.२.६ प्रक्रियाक्रमः

अष्टाध्यायीग्रन्थे येन क्रमेण सूत्राणि लिखितानि तेन क्रमेण शब्दनिष्पत्तिप्रक्रिया नास्ति। शब्दनिर्माणप्रक्रियायां बहूनि सूत्राणि विशिष्टक्रमेण अपेक्षितानि भवन्ति। तेन शब्दनिर्माणस्य प्रक्रियायां येन क्रमेण सूत्राणि अपेक्षितानि तेनैव क्रमेण सूत्राणि पठितानि कैश्चन

वैयाकरणैः। सूत्राणामध्ययनस्य अयं क्रमः प्रक्रियाक्रमः इति उच्यते। प्रक्रियाक्रमस्य सर्वादृतः ग्रन्थः विद्यते भट्टजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुदी। वैयाकरणसिद्धान्तकौमुदीग्रन्थे पाणिनेः सर्वाणि सूत्राणि प्रक्रियाक्रमेण आलोचितानि सन्ति। ग्रन्थस्यास्य प्रसिद्धटीकाः – भट्टोजिदीक्षितस्यैव टीका प्रौढमनोरमा, वासुदेवदीक्षितस्य बालमनोरमा, ज्ञानेन्द्रसरस्वतीरचिता तत्त्वबोधिनी, नागेशभट्टस्य लघुशब्देन्दुशेखरः इति। बालानां व्याकरणशास्त्रे अनायासेन प्रवेशार्थं वरदराजार्यैः मध्यसिद्धान्तकौमी, लघुसिद्धान्तकौमुदी, सारसिद्धान्तकौमुदी चेति ग्रन्थान् प्रणीतवान्। एतेषु लघुसिद्धान्तकौमुदी इति ग्रन्थः प्रारम्भिकस्तरे अत्यन्तम् उपयोगी इति बहूनां मतम्।

### ०.३. सूत्रस्य परिचयः

'सूत्र वेष्टने विमोचने ग्रन्थने च'[१४] इति ण्यन्तात् धातोः 'एरच्' (पा.सू. ३.३.५६) इति सूत्रेण अच्प्रत्यये सूत्रशब्दः निष्पद्यते। एरच् इति सूत्रस्य अर्थः तावत् – इवर्णान्ताद् धातोः भावे, अकर्तरि च कारके संज्ञायामच् प्रत्ययो भवतीति। प्रकृते सूत्र इति धातुः अदन्तोऽस्ति। तर्हि एरच् इति सूत्रेण सूत्रधातोः कथम् अच्प्रत्ययो भवति इति जिज्ञासायामुच्यते – 'भयादीनामुपसंख्यानां कर्तव्यम्' इति एरच्सूत्रस्थवार्त्तिकेन अत्र अच्प्रत्ययो

भवति। इदं वार्त्तिकं नपुंसके क्तादिनिवृत्त्यर्थं प्रारभ्यते। 'एरजण्यन्तानाम्' इति वचनसामर्थ्यात् तु अण्यन्तादेव धातोः अच्प्रत्ययो भवति। तर्हि सूत्र इति ण्यन्ताद् धातोः कथम् अच्प्रत्ययः इति जिज्ञासानिवारणार्थमुच्यते – 'एरजण्यन्तानाम् इति वचनम् अनार्षमस्ति' इति। केचन सूत्रधातोः घञ्प्रत्ययस्यापि विधानमिच्छन्ति। परन्तु तन्न समीचिनम्। यतो हि 'घञ् जपः पुंसि' इति पुंस्त्वनिर्णयात् घञ्प्रत्ययान्तशब्दानां सर्वदा पुंलिङ्गान्तप्रयोगः विधीयते। परन्तु सूत्रशब्दस्य प्रयोगः नपुंसकलिङ्गे इष्यते। अतः अत्र घञ्प्रत्ययो नेष्टः। सूत्रस्य लक्षणविषये वायुपुराणे उक्तम् –

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥[१५] इति।

अर्थात् यत् अल्पाक्षरम् असन्दिग्धं सारवत् विश्वतोमुखम् अस्तोभम् अनवद्यं च भवति तत् सूत्रम् इति सूत्रविदः वदन्ति। विवक्षितमर्थं यावद्भिरक्षरैः प्रतिपादयितुं शक्यं तावन्मात्राक्षरोपेतं भवति सूत्रम्। अर्थात् सूत्रे यथासम्भवमल्पानि अक्षराणि भवन्ति। तदर्थं सूत्रम् अल्पाक्षरं भवति। सूत्रं स्वकीयम् अर्थं बोधयेत्, अपि च सन्देहं न जनयेत्। सन्धिकारणात् कदाचित् सूत्रस्य स्वरूपविषये सन्देहः जायते तस्मात् क्वचित् क्वचित् सूत्रे सन्धिं न करोति सूत्रकारः। क्वचित् समासकारणात् अर्थः दुर्बोधः स्यात्

तदर्थं कदाचित् समासं त्यजति सूत्रकारः। एवं सन्देहं विना अर्थं बोधयति तत् सूत्रमसन्दिग्धं भवति। सूत्रं सारवत् भवति। अर्थात् सूत्रकर्ता यमर्थं वक्तुमिच्छति सूत्रं तदर्थं स्पष्टतया बोधयति। अतः सूत्रं सारवत् भवति। एकेन सूत्रेण बहुषु स्थलेषु कार्यं भवति। अर्थात् सूत्रकारेण सूत्रद्वारा यत् कार्यं विधीयते तत् कार्यं न केवलमेकस्मिन् स्थले भवति। अपि तु तस्य कार्यस्य क्षेत्रं यथासम्भवम् अधिकं व्यापकञ्च भवति। एकमेव सूत्रं बहुषु स्थानेषु कार्यं करोति अतः सूत्रं विश्वतोमुखं भवति। मन्त्रादिषु केवलं पादपूरणाद्यर्थः वर्णविशेषः स्तोभः इत्युच्यते। सामवेदस्य गाने बहुत्र अधिकध्वनीनामुपयोगः क्रियते। एतेषां ध्वनीनां कोऽपि विशेषोऽर्थः न भवति। परन्तु गाने माधुर्यं जनयति। एवं ध्वनिः स्तोभः कथ्यते। सूत्रेषु तादृशध्वनीनाम् प्रयोगः न भवति। अतः सूत्रम् अस्तोभम् इति कथ्यते। सूत्रम् अनवद्यं भवति। अर्थात् सूत्रम् अर्थदोषरहितं भवति। वेदान्तशांकरभाष्ये भामतिटीकायामपि समाना एव सूत्रलक्षणप्रतिपादिका अपरा कारिका दृश्यते –

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥इति।

महर्षिवररुचिः सूत्रस्य लक्षणमेवं प्रतिपादितवान् –

अल्पाक्षरमसन्दिग्धं सारवद् गुढनिर्णयम्।

निर्दोषं हेतुमतथ्यं सूत्रमित्युच्यते बुधैः॥ इति।

### ०.३.१ सूत्रभेदाः

सूत्रैः किमपि विधेयं विधीयते। विधेयदृष्ट्या एव पाणिनीयसूत्राणि षड्विधानि सन्ति। तानि हि – १) संज्ञासूत्रम्, २) परिभाषासूत्रं, ३) विधिसूत्रं, ४) नियमसूत्रम्, ५) अतिदेशसूत्रम्, ६) अधिकारसूत्रञ्चेति। तदुक्तं –

संज्ञा च परिभाषा च विधिर्नियम एव च।

अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥ इति।

#### ०.३.१.१ संज्ञासूत्रम्

वयं किमपि पदमुच्चारयामश्चेत् कस्यचित् अर्थस्य बोधः भवति। पदस्य अर्थप्रत्यायनसामर्थ्यमस्ति। तदेव पदस्य शक्तिः इति कथ्यते। कस्य पदस्य शक्तिः कस्य अर्थस्य बोधने सामर्था अस्ति इति वयं व्यवहारादितः जानीमः। संज्ञासूत्रं पदस्य शक्तिं बोधयति। यथा 'अदेङ्गुणः' (पा.सू. १.१.२) इति संज्ञासूत्रमस्ति। अनेन सूत्रेण गुणः इति संज्ञा विधीयते। अत्र अत् एङ् च संज्ञिनः। अत्र गुणः इति विधेयः अस्ति। अत् एङ्ग उद्देश्यः अस्ति। उद्देश्यस्य उच्चारणं पूर्वं भवति, विधेयस्य उच्चारणमनन्तरं भवति। तथापि केषुचित् स्थलेषु विपरीतक्रमः दृश्यते। तदा व्याख्यानात् तद्बोध्यम्। गुणः

इति पदस्य शक्तिः अदेङः बोधने समर्था अस्ति इति प्रकृतसूत्रं प्रतिपादयति। अत एव संज्ञासूत्रविषये वैयाकरणैः उक्तं 'साक्षाच्छक्तिग्राहकत्वं संज्ञासूत्रत्वम्' इति। भगवता पतञ्जलिनापि उक्तं 'लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते – देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्ये अपि जानन्ति इयमस्य संज्ञेति। वेदे याज्ञिकाः संज्ञां कुर्वन्ति – स्फ्यो यूपश्चषाल इति। तत्रभवतामुपचारादन्येऽपि जानन्ति – इयमस्य संज्ञेति। एवमिहापि। इहैव तावत्केचिद्व्याचक्षणा आहुः – वृद्धिशब्दः संज्ञा, आदैचः संज्ञिन इति।... तेन मन्यामहे – यया प्रत्यायन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिन इति।'[१६] उक्तञ्च भर्तृहरिणा –

> व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्।
> नित्य एव हि सम्बन्धो डित्थादिषु गवादिवत्॥
> वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः।
> अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवत्॥[१७] इति।

अर्थात् शब्दनिष्ठा अर्थप्रतिपादिका या शक्तिः अस्ति सा अनेकेषाम् अर्थानां बोधने समर्था। उदारहरणं यथा – अष्टवसु इति शब्दश्रवणे द्रोणः, प्राणः, ध्रुवः, अर्कः, अग्निः, दोषः वास्तुः, विभावसुः चेति अष्टवसूनां बोधः

भवति। एवं सति कस्मिंश्चित् विशेषार्थे तस्याः शब्दशक्तेः नियन्त्रणकरणं हि संज्ञाकरणम्। अतः शब्दार्थसम्बन्धस्य नित्यत्वेऽपि न विरोधः। तदुक्तं कैयटेन प्रदीपटीकायां शब्दार्थसम्बन्धस्य नित्यत्वप्रतिपादनप्रसङ्गे 'सर्वार्थाभिधानयोग्यशब्दस्य शक्तिनियमनमात्रं संज्ञाकरणम्' इति। पाणिनेः अष्टाध्यायीग्रन्थे प्रायः सप्ताशीतिसंख्यकानि संज्ञाविधायकानि सूत्राणि सन्ति।

### ०.३.१.२ परिभाषासूत्रम्

षड्विधेषु पाणिनीयसूत्रेषु अन्यतमं भवति परिभाषासूत्रम्। परिभाषाविषये उच्यते – 'अनियमे नियमकारिणी या सा परिभाषा' इति। अर्थात् यत्र अनियमः भवति तत्र येन सूत्रेण नियमः क्रियते तत्सूत्रं परिभाषासूत्रमिति उच्यते। व्यवहारेऽपि कदाचित् अनियमः भवति। यथा कश्चित् जनः प्रथमतया कुत्रचित् गच्छति। गमनकाले कुत्रचित् मार्गद्वयमस्ति। तदा तस्य मनसि संशयो भवति यत् केन मार्गेण गन्तव्यमिति। तदा तत्र अनियमो भवति। अनेनैव मार्गेण गन्तव्यमिति निश्चयः न भवति। तदा सः कस्मैचित् जनाय पृच्छति। तस्मात् ज्ञात्वा तस्य निश्चयो भवति यत् अनेनैव मार्गेण गन्तव्यमिति। तदा नियमो भवति द्वयोः मार्गयोः अयं मार्गः ग्राह्यः इति। एवमेव शब्दशास्त्रेऽपि कदाचित् अनियमो

भवति। अर्थात् संशयो भवति यत् कार्यमिदं कथं करणीयं कुत्र वा करणीयमिति। तदा अनियमे सति नियमस्य आवश्यकता भवति। एकमुदाहरणं यथा – 'इदितो नुम् धातोः' (पा.सू. ७.१.५८) इति सूत्रम्। अनेन सूत्रेण यस्य धातोः औपदेशिकावस्थायाम् इकारः इत्संज्ञकः अस्ति तस्य धातोः नुमागमः भवति। यथा 'वदि अभिवादनस्तुत्योः' इति धातोः इकारः इत्संज्ञकः अस्ति। अतः प्रकृतसूत्रेण अस्य धातोः नुमागमः भवति। परन्तु अत्र संशयो भवति यत् नुमागमः धातोः कुत्र भवति। अर्थात् धातोः आदौ भवति, उत धातोः परं भवति अथवा धातोः अन्तः भवतीति अनियमो भवति। अत्र अनियमस्य निराकणाय 'मिदचोऽन्त्यात्परः' (पा.सू. १.१.४७) इति सूत्रमागच्छति। अनेन सूत्रेण नियमः क्रियते यत् यस्य आगमस्य मकारः इत् अस्ति अर्थात् यः आगमः मित् अस्ति सः स्थानिनः अन्तिमस्वरवर्णात् परं भवतीति। अत्र नुम् इति आगमः मित् अस्ति। अतः अयम् आगमः वद्-धातोः अन्तिमस्वरवर्णात् परम् अर्थात् वकारोत्तराकारात् परं भविष्यति। अतः 'मिदचोऽन्त्यात्परः' इति नियमकरणात् परिभाषासूत्रमस्ति। एवमेव शास्त्रे यत्र यत्र संशयो भवति तत्र तत्र विद्वांसः परिभाषामाश्रयन्ति। अत एव परिभाषासूत्रस्य लक्षणमुच्यते – 'साक्षाद् विधिशास्त्रतात्पर्यग्राहकशास्त्रत्वं परिभाषासूत्रत्वम्' इति।

परिभाषाशब्दस्य व्युत्पत्तिः भवति – परितः सर्वतः भाष्यतेऽनया इति परिभाषा। तदुक्तं भावशर्मणा स्वकीये कातन्त्रे परिभाषावृत्तिनामके ग्रन्थे – 'भाष्यन्ते परितो यस्मात् परिभाषास्ततः स्मृताः।' इति। परिभाषायाः माहात्म्यविषये उच्यते –

दीपो यथा प्रभाद्वारा सर्वगेहप्रकाशकः।
परिभाषा तथा बुध्या सर्वशास्त्रोपकारिका॥ इति।

परिभाषाः त्रिविधाः – १) ज्ञापकसिद्धा। काश्चन परिभाषाः पाणिनेः निर्देशात् ज्ञायन्ते। यथा – 'संज्ञापूर्वको विधिरनित्यः' इति। २) न्यायसिद्धा। काश्चन परिभाषाः लौकिकन्यायात् सिध्यन्ति। यथा – 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' इति। ३) वाचनिकी चेति। वाचनिक्यः परिभाषाः साक्षात् सूत्रादिरूपेण पठिताः सन्ति। यथा – 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इत्यादयः परिभाषाः। पाणिनिमुनिना अष्टाध्याय्यां स्वकण्ठतः ३६ परिभाषाः उक्ताः। तदुक्तं नागेशभट्टेन स्वकीये परिभाषेन्दुशेखरनामके ग्रन्थे – 'प्राचीनवैयाकरणतन्त्रे वाचकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि, भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते' इति।

### ०.३.१.३ विधिसूत्रम्

वयं जानीमः यत् सूत्रैः किमपि कार्यं विधीयते। कानिचन सूत्राणि साक्षात्कार्यं कुर्वन्ति, कानिचन मुख्यकार्यस्य उपकारकाणि भवन्ति। मुख्यकार्याणि बहुविधानि भवन्ति। यथा – १)आदेशरूपाणि कार्याणि। उदाहरणं यथा – 'ङेर्यः' (पा.सू. ७.१.१३) इति सूत्रेण अदन्तादङ्गात्परस्य ङेः स्थाने यकारादेशो विधीयते। २) आगमरूपकार्याणि। उदाहरणं यथा – 'इदितो नुम् धातोः' (पा.सू. ७.१.५८) इत्यनेन सूत्रेण यस्मिन् धातौ औपदेशिकावस्थायामिकारः इत्संज्ञकः अस्ति तस्य धातोः नुमागमो विधीयते। ३) लोपरूपकार्याणि। उदाहरणं यथा – 'लोपः शाकल्यस्य' (पा.सू. ८.३.१९) इत्यनेन सूत्रेण पदस्य व्योः अपूर्वयोः अशि परे शाकल्याचार्यस्य मते लोपो विधीयते। ४) निषेधरूपकार्याणि। उदाहरणं यथा – 'न ङिसम्बुद्ध्योः' (पा.सू. ८.२.८) अनेन सूत्रेण प्रातिपदिकान्तं यत् पदं तदन्तस्य नकारस्य ङिप्रत्यये परे सम्बुद्धिसंज्ञके प्रत्यये च परे लोपस्य निषेधः विधीयते। एवं लोपः, आगमः, आदेशः, प्रत्ययः, वर्णविकारः, स्वरादिधर्माः इत्येतेषां विधानमेव मुख्यकार्यमिति उच्यते। एतानि कार्याणि यत्र भवन्ति तत् लक्ष्यं कथ्यते। तत्तत् कार्यविधायकानि सूत्राणि लक्षणम् इति कथ्यते। लक्ष्ये लोपादिना यत् परिवर्तनं क्रियते तत् लक्ष्यस्य संस्कारः

इति उच्यते। लक्ष्यसंस्कारात्परं साधुशब्दस्य बोधो भवति। तेन वयं वक्तुं शक्नुमः यत् येन सूत्रेण साक्षात् लक्ष्यस्य संस्कारः क्रियते किञ्च येन साधुशब्दस्य बोधः भवति तत् विधिसूत्रम्। अत एव विधिसूत्रस्य लक्षणम् उक्तं वैयाकरणैः 'अत्यन्ताप्राप्तार्थप्रतिपादकत्वे सति साक्षात् साधुत्वविधायकशास्त्रत्वं विधिसूत्रत्वम्' इति। अर्थात् विधिसूत्रेण यत् कार्यं विधीयते तत् न केनापि अन्येन उपायेन विधातुं शक्यते। अतः लक्षणे अप्राप्तार्थप्रतिपादकत्वे सति इति भागः उक्तः।

### ०.३.१.४ नियमसूत्रम्

नियमसूत्रस्य लक्षणम् उक्तं वैयाकरणैः – 'साक्षादितरव्यावर्तकशास्त्रत्वं नियमसूत्रत्वम्' इति। अर्थात् यत् कार्यं केनचित् सूत्रेण पूर्वमेव विहितम्, अनन्तरं तस्यैव कार्यस्य नियमनं अन्येन केनापि सूत्रेण क्रियते तदा तत् सूत्रं नियमसूत्रम् उच्यते। तदुक्तं रामतर्कवागीशेन – 'सामान्यप्राप्तस्य विशेषावधारणं नियमः' इति। सामान्यविधेः प्राप्तौ यः विशेषविधिः प्रवर्तते स नियमविधिरित्यर्थः। तदुक्तं 'सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्पते' इति। अयं नियमविधिः द्विविधः – १) प्रकृतिनियमः। २) प्रत्ययनियमश्चेति। प्रकृतिनियमः अस्ति उत प्रत्ययनियमोऽस्तीति एवशब्दद्वारा ज्ञातुं शक्यते। अर्थात् यत्र नियमे प्रत्ययात् परम् एव शब्दः तत्र

प्रत्ययनियम। यत्र च प्रकृतेः परम् एवशब्दः दृश्यते तत्र प्रकृतिनियमः अस्तीति बोध्यम्। मीमांसकैः उक्तं –

> विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
> तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥ इति।

अर्थात् यत्र पाक्षिकप्राप्तिः तत्र यः विधिः स नियमविधिः। यत्र च युगपत्प्राप्तिः तत्र यः विधिः सः परिसंख्याविधिः इति मीमांसकानामशयः। परन्तु वैयाकरणैः पाक्षिकप्राप्तिः युगपत्प्राप्तिः इति प्राप्तेरवान्तरभेदं नैव स्वीक्रियते। अतः व्याकरणशास्त्रे परिसंख्याविधिरपि नियमविधिरेव। अर्थात् पाक्षिकप्राप्ते युगपत्प्राप्ते वा यः विधिः सः नियमविधिरेव इति बोध्यम्। उदाहरणं यथा – 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (पा.सू. १.२.४५) अनेन सूत्रेण विधीयमाना प्रातिपदिकसंज्ञा देवदत्तः ग्रामं गच्छति इति वाक्यस्य किञ्च नीलकण्ठः इति समासस्य प्रातिपदिकसंज्ञा प्राप्नोति। यतो हि वाक्यं समासबद्धं पदञ्च धातुभिन्नः प्रत्ययभिन्नश्चास्ति, किञ्च अर्थवदपि अस्ति। तत्र 'कृत्तद्धितसमासाश्च' (पा.सू. १.२.४६) इति सूत्रे समासग्रहणं नियमार्थमस्ति। यतो हि समासस्य प्रातिपदिकसंज्ञा पूर्वसूत्रेणैव सिद्धा आसीत्। अतः 'सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्पते' इत्यनुसारमत्र समासग्रहणेन नियमः क्रियते यत् यदि अर्थवतः

शब्दसमुदायस्य प्रातिपदिकसंज्ञा स्यात् तर्हि समासस्यैव न तु अन्यस्य इति। अतः देवदत्तः ग्रामं गच्छति इति यद्यपि अर्थवान् समुदायः अस्ति तथापि तस्य प्रातिपदिकसंज्ञा न भवति। अत्र वाक्यस्य या प्रातिपदिकसंज्ञा प्राप्ता आसीत् तस्याः निवृत्तिर्जाता। अतः 'कृत्तद्धितसमासाश्च' इति नियमसूत्रमस्ति।

### ०.३.१.५ अतिदेशसूत्रम्

अति उपसर्गपूर्वकात् दिश-अतिसर्जने इति धातोः भावेऽर्थे 'भावे' (पा.सू. ३.३.१८) इति सूत्रेण घञ्प्रत्यये अतिदेशः इति शब्दः निष्पद्यते। अतिदेशशब्दस्य अर्थो भवति कस्यचित् एकस्य धर्मस्य अन्यत्र आरोपणम्। तदुक्तं दुर्गादासेन 'अन्यधर्मस्यान्यत्रारोपणमतिदेशः' इति। वैयाकरणैः अप्युच्यते 'साक्षात्सादृश्यग्राहकशास्त्रत्वमतिदेशसूत्रत्वम्' इति। कुत्रचित् किमपि कार्यमुद्दिश्य विहितस्य धर्मस्य प्रक्रियायाः वा अन्यत्र प्राप्तिः भवति तदा पुनः न विधीयते अपि तु पूर्ववत् कार्यं भवति इत्येवमुच्यते। तदेव अतिदेशः इति कथ्यते। यथा गुरुवत् गुरुपुत्रे वर्तितव्यम् इति। अत्र यथा गुरुं प्रति भक्तिभावादयः प्रदर्श्यन्ते तथैव गुरोः अनुपस्थितौ गुरुपुत्रे अपि गुरुवत् भक्तिभावादयः प्रदर्शनीयाः। गुरुपुत्रं प्रति कीदृशः व्यवहारः करणीयः इति सविस्तरमनुक्त्वा केवलं गुरुवत् प्रवर्तितव्यमिति

सङ्केतमात्रमुक्तम्। गुरुं प्रति कीदृशः व्यवहारः करणीयः इति तु अन्यत्र सविस्तरं वर्णितमस्ति। अतः गुरुवत् गुरुपुत्रे वर्तितव्यमिति अतिदेशः उच्यते। अतिदेशः प्रायः इव वत् इत्यादिशब्दैः विधीयते। अतिदेशस्य प्रयोगः प्रायः सर्वस्मिन् शास्त्रे दृश्यते। व्याकरणशास्त्रे अपि अतिदेशस्य व्यवहारः दृश्यते। पाणिनिना प्रणीतेषु सूत्रेषु अन्यतमं सूत्रं भवति अतिदेशसूत्रम्। पाणिनीयव्याकरणे चतुर्विधाः अतिदेशाः दृश्यन्ते। ते हि – १) कार्यातिदेशः २) निमित्तातिदेशः ३) संज्ञातिदेशः ४) रूपातिदेशः चेति। तत्र 'कर्मवत् कर्मणा तुल्यक्रियः' (पा.सू. ३.१.८७) 'पुंवत् कर्मधारयजातीयदेशीयेषु' (पा.सू. ६.३.४२) इत्यादिसूत्रं कार्यातिदेशस्य उदाहरणम्। 'गोतो णित्' (पा.सू. ७.१.९०) इति सूत्रं निमित्तातिदेशस्य उदाहरणम्। यद्यपि प्रकृतसूत्रे इव अथवा वत् शब्दः न दृश्यते तथापि सूत्रमिदम् अतिदेशसूत्रमेवास्ति। एतस्मिन् प्रसङ्गे महाभाष्यकारेण उक्तं – 'स तर्हि वतिनिर्देशः कर्तव्यो, न ह्यन्तरेण वतिमतिदेशो गम्यते। अन्तरेणापि वतिमतिदेशो गम्यते, तद्यथा – एष ब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह तेन मन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाऽप्यणितं णिदित्याह। णिद्वदिति गम्यते।'[१८] इति। 'बहुगणवतुडति संख्या' (पा.सू. १.१.२३) इति सूत्रं संज्ञातिदेशस्य उदाहरणम्। 'इणो गा लुङि' (पा.सू. २.४.४५) इति

सूत्रस्थं 'इण्वदिकः' इति वार्त्तिकं रूपातिदेशस्य उदाहरणम्। मीमांसाशास्त्रस्य शास्त्रातिदेशः कार्यातिदेशे एव अन्तर्भवति। अत एव 'तृज्वत् क्रोष्टुः' इति सूत्रस्य व्याख्यायां कैयटेनोक्तं – 'कार्यातिदेशस्तु शास्त्रातिदेशादभिन्नत्वात् पृथक् नोपन्यस्तः' इति। 'आतिदेशिकमनित्यम्' इति परिभाषाबलात् अतिदेशलब्धं कार्यमनित्यम्। अतः कदाचित् शिष्टप्रयोगे अतिदेशलब्धं कार्यं न प्रवर्तते। यथा 'इण्वदिकः' इति वार्त्तिकानुसारेण इक्धातोः कार्यं सर्वत्र इण्धातुवद् भवति। परन्तु भट्टिकाव्ये अधीयन् इति प्रयोगः दृश्यते। यथा –

> सूतोऽपि गङ्गासलिलैः पवित्वा सहाश्वमात्मानमनल्पमन्युः।
> ससीतयो राघवयोरधीयञ्छ्वसन् कदुष्णं पुरमाविवेश॥ इति।
> (३.१८)

अत्र अधीयन् इत्यत्र 'आतिदेशिकमनित्यम्' इति परिभाषानुसारं शतृप्रत्यये परे सत्यपि इक्धातोः स्थाने य-आदेशः न जातः। यादेशे सति अधियन् इति रूपं स्यात्।

### ०.३.१.६ अधिकारसूत्रम्

षड्विधेषु पाणिनीयसूत्रेषु अन्यतमं भवति अधिकारसूत्रम्। अधिकारसूत्रस्य लक्षणमुच्यते 'लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति

विधिशास्त्रैकवाक्यतापन्नलक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वमधिकारसूत्रत्व' मिति। अर्थात् अधिकारसूत्रं स्वदेशे किमपि कार्यं न विधीयते परन्तु विधिसूत्रैः सह एकवाक्यतापन्नं सत् विधिसूत्रेण विधीयमानं कार्यमेव विधीयते। तेन विधिसूत्रस्य सहायकं भवति अधिकारसूत्रमिति वक्तुं शक्यते। उक्तञ्च 'पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवर्तनमधिकारः' इति। कलापव्याकरणस्य विल्वेश्वरटीकायाम् उक्तं 'वक्ष्यमाणार्थसंक्षेपाय कार्यिकार्यनिमित्तानां यदुदीरणं सोऽधिकारः' इति। मुग्धबोधस्य टीकायां दुर्गादासेन उक्तं 'पूर्वसूत्रस्थिपदस्य परसूत्रेषु उपस्थितिरधिकारः' इति। अधिकारः त्रिविधः। तेषु कश्चिद् अधिकारः सुप्रज्वलितः प्रदीपवद् भवति। अर्थात् प्रदीपः यथा एकस्मिन् स्थाने तिष्ठति परन्तु तस्य प्रकाशः सर्वतः गच्छति। तथैव कश्चिदधिकारः शास्त्रस्य एकस्मिन् देशे तिष्ठति परन्तु तदधिकारस्य स्वार्थः शास्त्रस्य सर्वत्र गच्छति। उदाहरणं यथा – 'षष्ठी स्थानेयोगा' (पा.सू. १.१.४९) इति सूत्रम्। त्रिविधेषु अधिकारेषु कश्चिदधिकारः श्रृङ्खलबद्धकाष्ठवद् भवति। अर्थात् अयसा बद्धं काष्ठं यथा अनुकृष्यते तद्वत् प्रसङ्गविशेषमनुकृष्यते। उदाहरणं यथा – 'अभिनिविशश्च' (पा.सू. १.४.४७) इति सूत्रस्थचकारलब्धाधिकारः। अनेन 'आधारोऽधिकरणम्' (पा.सू. १.४.४५) इति सूत्रस्थम् आधारपदमनुकृष्यते।

त्रिविधेषु अधिकारेषु कश्चिदधिकारः अनिर्धारितसम्बन्धविशेषं निरूपयति। उदाहरणं यथा – 'पूर्वत्रासिद्धम्' (पा.सू. ८.२.१) इति सूत्रम्। तदुक्तं महाभाष्यकारेण – 'अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति। यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति। अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते।'[१९] इति। मुग्धबोधव्याकरणस्य टीकायां दुर्गादासेन अधिकारस्य प्रकारविषये एका प्रसिद्धा कारिका उद्धृता। सा कारिका तावत् –

सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च।
गङ्गास्रोत इति ख्यातो ह्यधिकारास्त्रयो मताः॥ इति।

कलापव्याकरणे चतुर्विधाः अधिकाराः वर्णिताः। तत्र पूर्वोक्तान् त्रीन् अधिकारान् अतिरिच्य गोयूथनामकः कश्चिदपरः अधिकारः स्वीकृतः। महर्षिणा पतञ्जलिनापि महाभाष्ये उक्तं – 'गोयूथवदधिकाराः। तद्यथा गोयूथमेकदण्डप्रघट्टितं सर्वं समं घोषं गच्छति, तद्वदधिकाराः।'[२०] इति।

एवञ्च आचार्येण पाणिनिना षड्विधसूत्राणि रचितानि। किञ्च पदसिद्ध्यर्थं नैके उपायाः आश्रिताः। तेषु उपायेषु अन्यतमः अस्ति योगविभागः। 'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः

उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। अस्मिन् उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र व्याकरणसम्प्रदायानां सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, त्रिमुनीनां सामान्यपरिचयः, महाभाष्यग्रन्थस्य परिचयः, सूत्रक्रमः, प्रक्रियाक्रमः, सूत्राणां भेदाः इत्येते केचन विषयाः संक्षेपेण आलोचिताः। 'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इत्यभिधेये प्रथमे अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः संज्ञाकरणादयः अष्ट मुख्या उपायाः वर्णिताः। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः। 'समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा' इति नामके द्वितीये अध्याये समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागः समीक्षितः। ततः प्रत्ययाधिकारस्थानां त्रयोदशसूत्राणां योगविभागः आलोचितः। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता। 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति नामके तृतीये अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः।

'पदाधिकारस्थानां योगविभागानां समीक्षा' इत्यभिधेये चतुर्थे अध्याये सप्तसूत्राणां योगविभागः आलोचितः। 'अवशिष्टानां योगविभागानां समीक्षा' इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागः अत्र समीक्षितः। एवञ्च मम शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागाः आलोचिताः। एतावता पञ्चसु अध्यायेषु आलोचिताः विषयाः उपसंहारे संक्षेपेण वर्णिताः। अन्ते च एका परिशीलितग्रन्थपञ्जी प्रदत्ता।

मम शोधप्रबन्धे निर्दिष्टा काचित् शोधपद्धतिः अवलम्बिता। शोधप्रबन्धस्य शीर्षकचयनादनन्तरं शोधप्रबन्धोपयोगितथ्यसंग्रहः कृतः। अतः शोधप्रबन्धस्यास्य प्राथमिकपर्याये संग्रहात्मिका शोधपद्धतिः अङ्गीकृता। योगविभागालोचनावसरे विश्लेषणात्मिका तुलनात्मिका च शोधपद्धतिः अनुसृता। अयं शोधप्रबन्धः सरलसंस्कृतभाषया देवनागरीलिप्या 'Sanskrit 2003' इति सङ्गणकीयफण्ट्-सहायेन निबद्धः। सर्वेषाम् अनायासेन बोधाय मार्गनिर्देशकस्य अनुमतिमादाय सरला परिशीलितग्रन्थपञ्जीशैली चाङ्गीकृता।

१ पा.शि., श्लो.सं ४१,४२
२ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. २३
३ वा.प., १.१४
४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. ५४
५ तै.सं., ६.४.७
६ ऋ.त.प्रा., १.४
७ पा.भा., सम्पा. वासुदेव शरण अग्रवाल, अध्याय ८
८ पा.उ.पु., १८.१९
९ सं.व्या.इति., प्रथमभागः, पा.सू. ३२९
१० तदेव, पा.सू. ३१५-१६
११ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ५५७
१२ पा.उ.पु., १८.१५
१३ वा.प., २.४८६
१४ चुरादिः, धा.सं. ४५०
१५ वा.पु., ४९.१४२
१६ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. १५८
१७ वा.प., २.३६५, ३६६
१८ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. ८०
१९ तदेव, प्रथमभागः, पृ.सं. ४१०
२० तदेव, चतुर्थभागः, पृ.सं. १८०

* * *

# प्रथमोऽध्यायः

## पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः

लौकिकशब्दानां तथा वैदिकशब्दानां निरूपणार्थं पाणिनिः अष्टाध्यायीनामकग्रन्थं विरचितवान्। 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'[१] इति महाभाष्यवचनानुसारं व्याकरणस्य मुख्यप्रयोजनेषु अन्यतमं हि लाघवम्। सर्वेषु पाणिनीयव्याकरणेतरव्याकरणशास्त्रेषु लाघवसाधकाः केचन उपायाः दृश्यन्ते। पाणिनीयव्याकरणेऽपि संक्षेपेण पदसिद्धिनिमित्तं बहवः उपायाः स्वीकृताः। 'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इति नामकेऽस्मिन् प्रथमाध्याये केचन मुख्याः उपायाः वर्णिताः। तदनन्तरं योगविभागरूपोपायः विस्तरेण आलोचितः।

### १.१. संज्ञाकरणम्

वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम्।
अथेद्वाग्बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह॥[२]

इति आगमानुसारं सर्वं परिदृश्यमानं जगत् शब्दब्रह्मणः एव विवर्तः अस्ति। तदुक्तं भर्तृहरिणा वाक्यपदीयस्य मङ्गलश्लोके –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ इति।

शब्दब्रह्मणः विवर्तरूपमिदं जगत् नामरूपम्, अर्थरूपं चेति द्विधा विभक्तमिति वक्तुं शक्यते। तत्र नाम विना अर्थात् संज्ञां विना व्यवहारः नैव

प्रचलति। न केवलं सामाजिकव्यवहारः अपि तु शास्त्रीयव्यवहारोऽपि संज्ञां विना असम्भवः। यस्य वस्तुनः व्यवहारः क्रियते तस्य कापि संज्ञा अवश्यं करणीया। लौकिकव्यवहारवद् व्याकरणशास्त्रेऽपि संज्ञायाः आवश्यकता अस्त्येव। किञ्च संज्ञां विना व्याकरणस्य लाघवरूपं मुख्यं वैशिष्ट्यम् अपि न सम्पद्यते। यतो हि अर्थविशेषे शब्दशक्तेः नियमनमेव संज्ञाविधानम्। संज्ञाशब्दव्यवहारेण लाघवं समाजे अभिव्यञ्जितमेव अस्ति। तदुक्तं महाभाष्यकारेण – 'संज्ञा च नाम यतो न लघीयः'[३] इति। कैयटेनापि महाभाष्यप्रदीपटीकायामुक्तं – 'शब्दव्यवहारो लघुस्ततोऽपि लघीयो नाम'[४] इति। अर्थात् शब्दव्यवहारः लाघवार्थं क्रियते परन्तु संज्ञाशब्दः ततोऽपि लाघवः भवति। अत एव यथा समाजे तथा शास्त्रेऽपि संज्ञाशब्दस्य प्रयोगः दरीदृश्यते। ईप्सितविषयस्य बोधनाय लघुतमः उपायो भवति संज्ञाशब्दस्य उपयोगः। व्याकरणशास्त्रस्य तु मुख्यप्रयोजनेषु अन्यतमं भवति लाघवम्। संज्ञाशब्दं विना व्याकरणशास्त्रे लघुभूतोपायेन कार्यविधानं प्रायः असम्भवम्। पाणिनीयव्याकरणेऽपि बहुविधाः संज्ञाः दृश्यन्ते। तत्र आदौ संज्ञाः द्विविधाः भवन्ति। यथा – कृत्रिमसंज्ञा, अकृत्रिमसंज्ञा चेति। तत्र याः संज्ञाः पाणिनिना कृताः ताः कृत्रिमसंज्ञाः इति उच्यन्ते। उदाहरणं यथा – घु-टि-भ्वादयः कृत्रिमाः संज्ञाः। याश्च संज्ञाः पाणिनिना न कृताः अपि तु

पाणिनेः प्रागपि पूर्वाचार्यैः व्यवहृताः ताः अकृत्रिमाः संज्ञाः इति उच्यन्ते। उदाहरणं यथा – गुण-वृद्धि-सवर्ण-प्रातिपदिकादयः संज्ञाः अकृत्रिमाः संज्ञाः। पुनश्च संज्ञायाः शब्दगतगौरवलाघवानुसारं संज्ञा द्विविधा भवति – लघ्वीसंज्ञा महतीसंज्ञा चेति। तत्र अल्पाक्षरविशिष्टा संज्ञा भवति लघ्वीसंज्ञा। उदाहरणं यथा – टिसंज्ञा, घिसंज्ञा इत्यादयः संज्ञाः। याः संज्ञाः अधिकाक्षरविशिष्टाः भवन्ति ताः संज्ञाः महतीसंज्ञाः उच्यन्ते। उदाहरणं यथा – प्रातिपदिकसंज्ञा, सर्वनामसंज्ञा इत्यादयः महतीसंज्ञाः। अत्र प्रश्नः उदेति यत् संज्ञा तु लघ्वर्थं क्रियते तर्हि अधिकाक्षरविशिष्टा महतीसंज्ञा किमर्थं क्रियते। अत्र उच्यते अन्वर्थसंज्ञाविधानार्थं महती संज्ञा क्रियते। तदुक्तं महाभाष्यकारेण – 'तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्। अन्वर्थसंज्ञा यथा विज्ञायेत। सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वेषां नामानीति चातः सर्वनामानि'[५] इति। अर्थात् संज्ञाभूतशब्दस्य व्युत्पत्तिगतार्थेनापि संज्ञा दृढा भवति। एवञ्च कदाचित् विशेषकार्यसिद्ध्यर्थम् आचार्यैः महतीसंज्ञा क्रियते। 'आदिरन्त्येन सहेता' (पा.सू. १.१.७१) इति सूत्रेण 'अण्, अच्, हल्' इत्यादयः संज्ञाः क्रियन्ते। अनेन सूत्रेण कृताः अणादयः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते। बहूनां

वर्णानां निर्देशः एकेनैव प्रत्याहारेण कर्तुं शक्यते। अतः अणादयः प्रत्याहाराः पाणिनीयव्याकरणस्य लाघवसाधकेषु उपायेषु अन्यतमाः।

## १.२. अनुबन्धकरणम्

पाणिनीयव्याकरणे अनुबन्धकरणं पाणिनेः सूक्ष्मेक्षिकायाः द्योतकमस्ति। कार्यविशेषसम्पादनार्थमेव अनुबन्धग्रहणं कृतम् आचार्येण पाणिनिना। ते एव वर्णाः अत्र अनुबन्धशब्देन उच्यन्ते ये वर्णाः प्रकृतिप्रत्ययादेशागमादिभिः सह युज्यन्ते तथा अनन्तरं येषां लोपः विधीयते। पाणिनीयव्याकरणे प्रवृत्त्यर्थं प्रत्याहारस्य ज्ञानमावश्यकम्। प्रत्याहारसिद्ध्यर्थञ्च अनुबन्धवर्णानाम् अर्थात् इत्संज्ञकवर्णानाम् आवश्यकता अस्ति। तदुक्तं महाभाष्यकारेण – 'अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्तव्यः। अनुबन्धानासङ्क्ष्यामीति। न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम्। स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च। वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्। प्रत्याहारो वृत्त्यर्थः'[६] इति।

पाणिनिना अनुबन्धस्य लक्षणं न कृतम्। परन्तु व्याकरणशास्त्रे 'इत्संज्ञकत्वमनुबन्धत्वम्। इत्संज्ञायोग्यत्वमनुबन्धत्वम्।' इति स्वीक्रियते। अर्थात् इत्संज्ञकवर्णाः तथा इत्संज्ञायोग्यवर्णाः अनुबन्धशब्देनोच्यन्ते

इत्यर्थः। 'उपदेशेऽजनुनासिक इत्' (पा.सू. १.३.२) इत्यादिभिः सप्तभिः सूत्रैः उपदेशावस्थायां वर्णानाम् इत् इति संज्ञा विधीयते। कः उपदेशः इति चेदुच्यते – 'उपदेशः आद्योच्चारणम्' इति। के उपदेशाः इति जिज्ञासायामुच्यते –

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशाः उपदेशाः नव प्रकीर्तिताः॥ इति।

सर्वेषामेतेषामुपदेशानाम् अनुनासिकाज्वर्णानां तथा विशेषवर्णानाम् इत्संज्ञा सप्तभिः सूत्रैः विधीयते। वर्णसमाम्नाये पञ्चदशानुबन्धवर्णाः सन्ति। एतैः इत्संज्ञकैः अनुबन्धवर्णैः प्रत्याहारः निर्मीयते। ते एव प्रत्याहाराः पाणिनीयव्याकरणस्य आधारभूताः सन्ति।

'तस्य लोपः' (पा.सू. १.३.९) इति सूत्रेण इत्संज्ञकवर्णानां लोपः विधीयते। यतो हि अनुबन्धाः निमित्तरूपेण कार्यं कुर्वन्ति। अर्थात् शब्दनिष्पत्तिप्रक्रियायाम् अनुबन्धाः एव कार्यस्य निमित्तकारणरूपेण तिष्ठन्ति। तेन अनुबन्धानुसारेणैव कार्याणि भवन्ति। स्वरवर्णाः, व्यञ्जनवर्णाः उभयविधवर्णाः अपि अनुबन्धरूपेण स्वीकृताः। अष्टाध्याय्याः सर्वस्मिन् प्रकरणे अनुबन्धस्य प्रयोगः दृश्यते। वस्तुतः अनुबन्धकरणं विना व्याकरणस्य शब्दनिष्पत्तिप्रक्रिया नैव सम्भवति। यतो हि अनुबन्धद्वारा

व्याकरणस्य नैकानि प्रयोजनानि सिध्यन्ति। अनुबन्धमाध्यमेनैव समानस्वरूपविशिष्टप्रत्ययाः भिन्नं भिन्नम् अर्थं बोधयति। यथा कृत्प्रत्ययप्रकरणे यत्प्रत्ययः तथा ण्यत्प्रत्ययः अनुबन्धलोपानन्तरं समानस्वरूपविशिष्टः अस्ति। यतो अनुबन्धलोपात् परम् उभयोः स्वरूपं 'य' इत्येव भवति। परन्तु अनुबन्धभिन्नत्वात् भिन्नं भिन्नं रूपं निष्पद्यते। गुणवृद्धिविधानं, गुणवृद्धिनिषेधः, सम्प्रसारणविधानम्, अनुनासिकविधानं, लोपविधानम्, आदेशविधानम्, आगमविधानं, विकरणविधानं, स्वरादिविधानम् इत्यादिकार्यविधानार्थम् अनुबन्धाः प्रयुज्यन्ते। पाणिनीयव्याकरणस्य लाघवसाधकतत्त्वेषु अन्यतमम् अस्ति अनुबन्धकरणम्। वैयाकरणैः न केवलं लघ्वर्थम् अनुबन्धग्रहणं कृतम्, अपि तु भाषायाः वैज्ञानिकी व्यवस्था अनायासेन प्रतिपादनार्थञ्च अनुबन्धानां ग्रहणं कृतम्।

### १.३. स्थान्यादेशभावः

यः विधीयते सः आदेशः। यस्य स्थाने आदेशः विधीयते सः स्थानी। पाणिनीयव्याकरणशास्त्रे शब्दानुशासनार्थम् आश्रितेषु उपायेषु अयं स्थान्यादेशभावरूपः उपायः अन्यतमः। अस्य उदाहरणं यथा – चर्तुर्थ्येकवचनस्य 'ङे' इति एकेनैव प्रत्ययेन रामाय, सर्वस्मै, सर्वस्यै, जगते,

मालायै, इत्यादीनि रूपाणि सिध्यन्ति। तथाहि 'ङ्याप्प्रातिपदिकात्' (पा.सू. ४.१.१) इत्यधिकारस्थेन 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्य-स्ङसोसाम्ङ्योस्सुप्' (पा.सू. ४.१.२) इत्यनेन सूत्रेण प्रातिपदिकाद् एकविंशतिस्वादिप्रत्ययानां विधानं क्रियते। परन्तु प्रयोगावस्थायाम् एतेषां प्रत्ययानां नैकानि रूपाणि दृश्यन्ते। यथा – चतुर्थ्येकवचनस्य प्रत्ययः भवति 'ङे' इति। परन्तु प्रयोगावस्थायां रामाय, सर्वस्मै, सर्वस्यै, ज्ञानिने, वाचे, जगते, मालायै, नद्यै, कवये, भानवे, तुभ्यम्, मह्यम्, इत्येवं नैकानि रूपाणि दृश्यन्ते। अत्र प्रश्नः भवति यत् एकस्यैव ङे इति प्रत्ययस्य य, स्मै इत्यादीनि रूपाणि कथं भवन्ति। अत्र उत्तरं हि – पाणिनिमुनिना अत्र स्थान्यादेशभावः आश्रितः। तथाहि – राम इति अदन्तात् प्रातिपदिकात् चतुर्थ्येकवचने ङे इति प्रत्यये 'ङेर्यः' (पा.सू. ७.१.१३) इति सूत्रेण ङेः स्थाने य इति आदेशः विधीयते। तेन रामाय इति रूपं सिध्यति। एवमेव सर्व इति सर्वनामसंज्ञकात् अदन्तात् प्रातिपदिकात् चतुर्थ्येकवचने ङे इति प्रत्यये 'सर्वनाम्नः स्मै' (पा.सू. ७.१.१४) इति सूत्रेण ङेः स्थाने स्मै इत्यादेशे सर्वस्मै इति रूपं सिध्यति। एवमेव युष्मद् इति प्रातिपदिकात् परस्य ङेः स्थाने 'ङे प्रथमयोरम्' (पा.सू. ७.१.२८) इति सूत्रेण अम् इत्यादेशे प्रक्रियाकार्ये तुभ्यम्

इति रूपं सिध्यति। एवञ्च स्थान्यादेशकल्पनया संक्षेपेण बहूनि रूपाणि सिध्यन्ति।

## १.४. सिद्धासिद्धव्यवस्था

आचार्येण पाणिनिना अष्टाध्यायीग्रन्थनिर्माणसमये बहूनि कौशलानि अवलम्बितानि। तेषु सिद्धासिद्धव्यवस्थारूपं कौशलम् अन्यतमम्। 'पूर्वत्रासिद्धम्' (पा.सू. ८.२.१) इत्यनेन सूत्रेण सिद्धासिद्धव्यवस्था प्रतिपादिता। तथाहि अस्मिन् सूत्रे पदद्वयं वर्तते। पूर्वत्र इत्यव्ययपदम्। असिद्धम् इति प्रथमैकवचनान्तं पदम्। सूत्रमिदम् अधिकारसूत्रमस्ति। अधिकारोऽयम् प्रकृतसूत्रात् आरभ्य अष्टाध्याय्याः परिसमाप्तिपर्यन्तम् अस्ति। अस्य सूत्रस्य अर्थः उक्तः सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन – 'अधिकारोऽयम्। तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्'[७] इति। वस्तुतः प्रकृतसूत्रेण अष्टाध्यायी द्विधा विभज्यते। तत्र प्रकृतसूत्रात् पूर्वं विद्यमानानि यानि सूत्राणि सन्ति तेषां प्रथमः भागः। अत्र सप्त अध्यायाः, तथा अष्टमाध्यायस्य प्रथमपादस्य सर्वाणि सूत्राणि आगच्छन्ति। अयं भागः सपादसप्ताध्यायी इति उच्यते। सप्तानाम् अध्यायानां समाहारः इति सप्ताध्यायी। पादेन सह सप्ताध्यायी इति सपादसप्ताध्यायी। सपादसप्ताध्यायीस्थानां सूत्राणां कृते अष्टाध्याय्याः

त्रिपादीस्थानि सूत्राणि असिद्धानि भवन्ति। प्रकृतसूत्रादनन्तरं विद्यमानानि यानि सूत्राणि सन्ति तेषां द्वितीयो भागः। अत्र अष्टमाध्यायस्य अन्तिमत्रयाणां पादानां सर्वाणि सूत्राणि आगच्छन्ति। अयं भागः त्रिपादी इति उच्यते। त्रयाणां पादानां समाहारः इति त्रिपादी। त्रिपादीस्थस्य प्रत्येकं सूत्रस्य कृते तदनन्तरं विद्यमानानि सूत्राणि असिद्धानि भवन्ति। सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा इत्यस्य उदाहरणं यथा – अर्जुन उवाच इत्यादि। अत्र यकारलोपः 'लोपः शाकल्यस्य' (८.३.१९) इत्यनेन त्रिपादीस्थेन सूत्रेण कृतः। 'आद्गुणः' इत्यस्य सपादसप्ताध्यायीस्थसूत्रस्य दृष्ट्या 'लोपः शाकल्यस्य' इति त्रिपादीस्थसूत्रम् असिद्धम्। अतः तेन सूत्रेण कृतः यलोपः असिद्धः। अतः यलोपस्य असिद्धत्वात् अत्र गुणो न भवति। त्रिपाद्यमपि पूर्वं प्रति परं शास्त्रमसिद्धम् इत्यस्य उदाहरणं यथा – प्रशान् इत्यादि। प्रशाम् इति प्रातिपदिकस्य प्रथमैकवचनस्य रूपसिद्धौ 'मो नो धातोः' (पा.सू. ८.२.६४) इत्यनेन मकारस्य नकारादेशः भवति। अत्र 'मो नो धातोः' इति नकारादेशविधायकशास्त्रं 'नलोपः प्रातिपदिकान्तस्य' (पा.सू. ८.२.७) इति नलोपविधायकशास्त्रदृष्ट्या असिद्धमस्ति। यतो हि 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रापेक्षया 'मो नो धातोः' इति परसूत्रमस्ति। अतः अत्र नकारस्य असिद्धत्वात् तस्य लोपो न भवति।

'असिद्धवदत्राभात्' (पा.सू. ६.४.२२) इत्यनेन अधिकारसूत्रेणापि सिद्धासिद्धव्यवस्था प्रतिपादिता। सूत्रेणानेन असिद्धवदतिदेशः क्रियते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र असिद्धवत् इति अव्ययपदम्, अत्र इत्यपि अव्ययपदम्, आभात् इति पञ्चम्येकवचनान्तं पदमस्ति। आभात् इति पदस्य अर्थः – 'भस्य' (पा.सू. ६.४.१२९) इति अधिकारस्य परिसमाप्तिपर्यन्तमिति। अर्थात् षष्ठाध्यायस्य परिसमाप्तिपर्यन्तमिति बोध्यम्। अत्र इति पदस्य अर्थः अस्ति समानाश्रये कर्तव्ये इति। अत्र आश्रयशब्देन मूलस्थानी, निमित्तानि च गृह्यन्ते। तेन सूत्रार्थो भवति – प्रकृतसूत्रादारभ्य षष्ठाध्यायस्य चतुर्थपादस्य समाप्तिपर्यन्तं यानि सूत्राणि सन्ति तानि सूत्राणि समानाश्रये कर्तव्ये असिद्धानि भवन्तीति। अर्थात् ययोः सूत्रयोः मध्ये समानाश्रयः वर्तते, ते परस्परयोः विषये असिद्धे भवतः। उदाहरणं यथा – आयन् इत्यादि। तथाहि – इण्-गतौ इति अदादिगणीयात् धातोः लङि प्रथमपुरुषबहुवचनविवक्षायाम् इ झि इति स्थिते 'झोऽन्तः' (पा.सू. ७.१.३) इति सूत्रेण झ्-इत्यस्य अन्त्-आदेशे, शपि शपः लुकि, इ अन्ति इति जाते 'इणो यण्' (पा.सू. ६.४.८१) इति सूत्रेण इणः इकारस्य यणादेशे य् अन्ति इति जाते 'आडजादीनाम्' इति आडागमः न प्राप्नोति अनजादित्वात्। 'असिद्धवदत्राभात्' इति सूत्रबलादत्र आडागमः भवति।

यतो हि 'इणो यण्' तथा 'आडजादीनाम्' (पा.सू. ६.४.७२) इति सूत्रयोः मध्ये समानाश्रयो वर्तते। अतः 'इणो यण्' इति सूत्रेण कृतः यणादेशः 'आडजादीनाम्' इति सूत्रदृष्ट्या असिद्धः अस्ति। अतः अजादित्वादत्र आडागमः भवति। तेन आडागमे आ य् अन्ति इति जाते 'इतश्च' (पा.सू. ३.४.१००) इति सूत्रेण इकारलोपे 'संयोगान्तस्य लोपः' (पा.सू. ८.२.२३) इति सूत्रेण तकारलोपे आयन् इति रूपं सिध्यति।

### १.५. उत्सर्गापवादभावः

पाणिनीयव्याकरणे शब्दानुशासनार्थं ये उपायाः आश्रिताः तेषु अन्यतमोऽस्ति अयम् उत्सर्गावपादभावरूपोपायः। तत्र उत्सर्गापवादभावप्रसङ्गः महाभाष्यस्य पस्पशाह्निके विस्तरेण वर्णितः। शब्दानामनुशासनं कथं कर्तव्यम् इति प्रश्नः। अत्र उपायत्रयमस्ति – शब्दोपदेशः, अपशब्दोपदेशः उभयोपदेशश्चेति। तत्र शब्दोपदेशापशब्दोपदेशयोरन्यतरोपदेशेनैव शब्दानुशासनं सम्भवति। तथाहि भक्ष्यनियमेन अभक्ष्यप्रतिषेधो गम्यते। उदाहरणं यथा – 'पञ्च पञ्चनखाः भक्ष्याः' इत्युक्ते गम्यते यत् अन्ये अभक्ष्याः इति। तथैव अभक्ष्यप्रतिषेधेन भक्ष्यनियमो गम्यते। उदाहरणं यथा – 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते आरण्यः भक्ष्यः इति गम्यते।

एवमेव गौरिति साधुशब्दोपदेशे गाव्यादयः अपशब्दाः इति गम्यते। तथैव गाव्यादिष्वपशब्देषूपदिष्टेषु गौरिति साधुशब्दः इति गम्यते। अत्र पुनः प्रश्नो भवति यत् साधुशब्दोपदेशः कर्तव्यः अथवा अपशब्दः। अत्रोच्यते साधुशब्दोपदेशः एव करणीयः। यतो हि साधुशब्दाः अल्पाः। एकैकस्यापि साधुशब्दस्य बहवः अपशब्दाः सन्ति। अतः अपशब्दोपदेशे गौरवदोषः स्यात्। किञ्च साधुशब्दोपदेशे इष्टान्वाख्यानं च भवति। अत्र पुनः प्रश्नो भवति यत् साधुशब्दानामुपदेशः कथं करणीयः। शब्दानां प्रतिपदपाठः क्रियते चेत् मनुष्याणां जीवनकालः समाप्तो भविष्यति तथापि शब्दानां प्रतिपदपाठः समाप्तो न भविष्यति। तदुक्तं पस्पशाह्निके – 'एवं हि श्रूयते – बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच न चान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम। किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति, वर्षशतं जीवति'[८] इति। आधुनिके काले शब्दानां प्रतिपदपाठरूपोपायः नैव स्वीकर्तुं शक्यते। अतः कश्चन विशेषोपायः आश्रयणीयः, स एव उपायः उत्सर्गापवादन्यायः इति। तथाहि – उत्सर्गोपदेशः सामान्येन कर्तव्यः। अपवादश्च सामान्यस्य विशेषेण कर्तव्यः। उदाहरणं यथा – 'कर्मण्यण्' (पा.सू. ३.२.१) इति उत्सर्गशास्त्रम्।

अनेन सूत्रेण कर्मणि उपपदे धातोः अण् प्रत्ययो भवति। यथा कुम्भं करोति इति कुम्भकारः इत्यादौ प्रकृतसूत्रेण अण्प्रत्ययो जातः। अस्यैव उत्सर्गसूत्रस्य अपवादसूत्रं भवति 'आतोऽनुपसर्गे कः' (पा.सू. ३.२.३) इति। अनेन सूत्रेण उनुपसर्गेभ्यः आकारान्तेभ्यः धातुभ्यः कर्मण्युपपदे कप्रत्ययो भवति। उदाहरणं यथा – गां ददाति इति गोदः इति। अत्र कप्रत्ययः अण्प्रत्ययस्य अपवादोऽस्ति। एवमुत्सर्गापवादरूपोपायेन शब्दानाम् अनुशासनं क्रियते।

### १.६. अन्तरङ्गबहिरङ्गभावः

पाणिनीयव्याकरणे शब्दानुशासनार्थमाश्रितेषु उपायेषु अन्यतमोऽयम् अन्तरङ्गबहिरङ्गभावरूपोपायः। अयमन्तरङ्गबहिरङ्गभावः 'असिद्धं बहिरङ्गमन्तरङ्गे'[१] इत्यनया परिभाषया प्रतिपादितः। तथाहि – अन्तः अङ्गानि यस्य तद् अन्तरङ्गम् इति अन्तरङ्गपदस्य विग्रहः। एवमेव बहिः अङ्गानि यस्य तद् बहिरङ्गम् इति बहिरङ्गपदस्य विग्रहः। अत्र अन्तः इत्यस्य अर्थो भवति मध्ये इति। अङ्गशब्दस्य अर्थो भवति निमित्तमिति। अङ्गशब्देन शब्दरूपं निमित्तमेव ग्राह्यम्। अत्र शङ्का भवति केषां मध्ये इति। तत्रोच्यते बहिरङ्गशास्त्रीयनिमित्तमुदायमध्ये इति। अर्थात् बहिरङ्गशास्त्रस्य यः निमित्तसमुदायः तन्मध्ये अन्तर्भूतमस्ति यस्य शास्त्रस्य निमित्तं तत् शास्त्रं

भवति अन्तरङ्गशास्त्रम्। तथा च अन्तरङ्गशास्त्रस्य यः निमित्तसमुदायः तदपेक्षया बहिर्भूतमस्ति यस्य शास्त्रस्य निमित्तं तत् शास्त्रं भवति बहिरङ्गम्। असिद्धम् इति पदस्य अर्थः अनिष्पन्नमिति बोध्यम्। तेन अन्तरङ्गे कर्तव्ये कृतं बहिरङ्गं, समकालप्राप्तं वा बहिरङ्गम् असिद्धं भवतीति प्रकृतपरिभाषार्थः। अर्थात् अन्तरङ्गे कार्ये कर्तव्ये कृतमपि बहिङ्गकार्यम् अकृतमिव भवति। उदाहरणं यथा – रियति इत्यादि। तथाहि – रि-गतौ इति धातोः लटि प्रथमपुरुषैकवचने तिपि शविकरणे अनुबन्धलोपे रि अ ति इत्यवस्थायां 'पुगन्तलघूपधस्य च' (पा.सू. ७.३.८६) इत्यनेन सूत्रेण लघूपधगुणः प्राप्नोति किञ्च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (पा.सू. ६.४.७७) इत्यनेन सूत्रेण इयङ् प्राप्नोति। अत्र 'पुगन्तलघूपधस्य च' इति शास्त्रं बहिरङ्गमस्ति। यतो हि अत्र बहिर्भूतः तिप्प्रत्ययः निमित्तमस्ति। किञ्च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति शास्त्रमन्तरङ्गमस्ति। यतो हि तिप्प्रत्ययापेक्षया अन्तर्भूतः शविकरणः अस्य शास्त्रस्य निमित्तमस्ति। तथा च अत्र लघूपधगुणः बहिर्भूतकार्यमस्ति। इयङादेशश्च अन्तरङ्गकार्यमस्ति। इयङादेशरूपे अन्तरङ्गकार्ये कर्तव्ये लघूपधगुणरूपं बहिर्भूतकार्यमसिद्धं भवति। अतः इयङादेश एव भवति। तेन रियति इति रूपं सिध्यति।

## १.७. ज्ञापनम्

पदानां साधुत्वप्रतिपादनाय पाणिनिना सूत्रं प्रणितम्। यदा सूत्राणां प्रवृत्तौ विरोधः संशयो वा भवति तदा परिभाषाः आगच्छन्ति। तत्र काश्चन परिभाषाः पाणिनिना कृताः सूत्रात्मिकाः। उदाहरणं यथा – 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा.सू. १.१.६६) इति सूत्रात्मिका परिभाषा। काश्चन तदितरवचनरूपाः। अर्थात् पाणिनिना स्वयं न सूत्रिताः परन्तु बहुभिः प्रकारैः ज्ञापिताः। अत्र केचन ज्ञापनप्रकाराः आलोचिताः।

### १.७.१ सूत्रेण ज्ञापनम्

पाणिनिना बहुभिः सूत्रैः वचनानि ज्ञापितानि। अत्र कानिचन सूत्राणि आलोचितानि। 'सरूपाणामेकशेष एकविभक्तौ' (पा.सू. १.२.६४) इत्यनेन सूत्रेण 'व्यक्तिः पदार्थः' इति वचनं ज्ञाप्यते। यतो हि 'व्यक्तिः पदार्थः' इति वचनं विना 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रं व्यर्थम्। प्रकृते वचने ज्ञापिते एव घटघटौ घटघटघटाः इत्याद्यनिष्टप्रयोगाः यथा न स्युः तदर्थं प्रकृतसूत्रं स्वांशे चरितार्थं भवति। अस्य वचनस्य फलं द्रव्याणि इत्यादिप्रयोगाः। अन्यथा जातिः पदार्थः इति पक्षे एकेनैव द्रव्यशब्देन बहूनां ज्ञानं भवतीति बहुवचनस्य साधुत्वं न स्यात्। 'नेटि' (पा.सू. ७.२.४) इत्यनेन सूत्रेण 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषा ज्ञापिता।

तथाहि प्रकृतमिदं सूत्रम् अदेवीत्, असेवीत्, अकोषीत्, अमोषीत् इत्यादौ इडादौ सिचि हलन्तलक्षणा वृद्धिः यथा न स्यात् तदर्थमारब्धम्। परन्तु हलन्तलक्षणायाः वृद्धेः अभावे प्रकृतमिदं सूत्रं व्यर्थम्। 'वदव्रजहलन्तस्याचः' इति सूत्रेण वदव्रजोर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिर्भवति, सिचि परस्मैपदेषु। परन्तु अदेवीत्, असेवीत् इत्यादौ वृद्धिः नैव प्राप्नोति, इटा व्यवधानात्। अतः प्रकृतमिदं सूत्रं व्यर्थीभूय पूर्वोक्तां परिभाषां ज्ञापयति। ज्ञापितायाञ्च अस्यां परिभाषायाम् अदेवीत्, असेवीत् इत्यादौ इटः आगमत्वात् तस्य ग्रहणं सिचो ग्रहणेन एव सम्भवति। तेन इटा न व्यवधानम्। अतः अदेवीत्, असेवीत् इत्यादौ प्राप्तायाः वृद्धेः वारणार्थं 'नेटि' इति सूत्रे स्वांशे चरितार्थं भवति। अस्याः परिभाषायाः फलं सर्वेषाम् इत्यादौ 'बहुवचने झल्येत्' (पा.सू. ७.३.१०३) इति सूत्रेण एत्वविधानम्। अस्याः परिभाषायाः अभावे 'आमि सर्वनाम्नः सुट्' (पा.सू. ७.१.५२) इति सूत्रेण विहितस्य सुटः ग्रहणं सुपा न स्यात्। तेन सुड्विशिष्टस्य आमः सुब्ग्रहणेन ग्रहणासम्भवात् झलादित्वाभावात् एत्वं न स्यात्। एवमेव वचनज्ञापकानि अन्यान्यपि बहूनि सूत्राणि सन्ति।

### १.७.२ सूत्रस्थपदेन ज्ञापनम्

बहुत्र सूत्रस्थपदैरपि परिभाषारूपं वचनं ज्ञापितम्। अत्र कानिचन पदानि आलोचितानि। 'थासः से' (पा.सू. ३.४.८०) इत्यस्मिन् सूत्रे से इति पदं 'तङादेशानां टेरेत्वं न भवति' इति ज्ञापनार्थमस्ति। अन्यथा से इति पदं व्यर्थम्। तथाहि 'थासः से' इति सूत्रमकृत्वा 'थः सः' इति न्यासेनापि थकारस्य सकारे कृते सास् इति जाते 'टित आत्मनेपदानां टेरे' इति सूत्रेण टिसंज्ञकस्य आस् इत्यस्य एत्वे से इति सिध्यति। तेन एधसे इत्यादिप्रयोगानां सिद्धिर्भविष्यति। अतः सिद्धे सति यदेकारान्तत्वामादेशस्य क्रियते, तज्ज्ञापयति – आत्मनेपदानां य आदेशास्तेषां टेरेत्वं न भवतीति। ज्ञापिते चास्मिन् वचने 'थः सः' इति सूत्रेण थकारस्य सकारे कृते टिभागस्य आस् इत्यस्य 'टित आत्मनेपदानां टेरे' इति एत्वं न प्राप्नोति, सकास्य तङादेशत्वात्। अतः एधसे इत्यादिप्रयोगानां सिद्ध्यर्थं से इति पदं स्वांशे चरितार्थं भवति। 'तङादेशानां टेरेत्वं न भवति' इति ज्ञापितस्य वचनस्य फलं पक्ता, पक्तारौ, पक्तार इत्यादौ डारौरसामेत्वं न भवति। अन्यथा डारौरसामपि टिभागस्य एत्वं प्राप्नुयात्। एवमेव 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' (पा.सू. २.१.३६) इत्यस्मिन् सूत्रे बलिरक्षितग्रहणं 'तादर्थ्ये प्रकृतिविकारभावे समासो भवति' इति वचनस्य

ज्ञापकमस्ति। यतो हि अस्य ज्ञापितस्य वचनस्य अभावे प्रकृतसूत्रे बलिरक्षितग्रहणं व्यर्थं भविष्यति। तथाहि प्रकृतसूत्रे बलिरक्षितयोः ग्रहणं कुबेराय बलिः कुबेरबलिः, इत्यत्र गवे रक्षितं गोरक्षितम् इत्यत्र च चतुर्थ्यन्तेन बलिरक्षितयोः क्रमशः समासविधानार्थं कृतम्। परन्तु यदि 'तादर्थ्ये प्रकृतिविकारभावे समासो भवति' इति वचनं न स्यात् तर्हि प्रकृतिविकाराभावेऽपि कुबेराय बलिः कुबेरबलिः इत्यादौ समासो भविष्यति। अतः प्रकृतसूत्रे बलिरक्षितयोः ग्रहणं व्यर्थं भवति। ज्ञापिते च अस्मिन् वचने कुबेराय बलिः कुबेरबलिः, इत्यत्र गवे रक्षितं गोरक्षितम् इत्यत्र च चतुर्थ्यन्तेन बलिरक्षितयोः समासो न स्यात् प्रकृतिविकाराभावात्, अतः बलिरक्षितयोः ग्रहणं स्वांशे चरितार्थम्। ज्ञापिते च अस्मिन् वचने रन्धनाय स्थाली, अवहननायोलूखलम् इत्यादौ 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इत्यनेन सूत्रेण समासो न भवति। अत्र समासाभाव एव अस्य वचनस्य फलम्। अन्यथा रन्धनाय स्थाली इत्यादौ अपि समासः दुर्वारः स्यात्।

### १.७.३ पाणिनेः आचारेण ज्ञापनम्

आचार्येण पाणिनिना सूत्रनिर्माणार्थं शब्दानां यः व्यवहारः कृतः स एव अत्र आचारशब्देन गृह्यते। पाणिनेः आचारादपि कानिचन वचनानि ज्ञापितानि भवन्ति। अत्र केचन व्यवहाराः उदाहरणरूपेण आलोचिताः।

'तदस्मिन्नधिकमिति दशान्ताड्डः' (पा.सू. ५.२.४५) इति सूत्रे अस्मिन्नधिकम् इति निर्देशः अधिकशब्दयोगे सप्तमी भवतीति वचनस्य ज्ञापकः। यतो हि अत्र 'षष्ठी शेषे' (पा.सू. २.३.५०) इति सूत्रेण अवधित्वसम्बन्धे षष्ठी एव स्यात् न सप्तमी। एवञ्च प्रकृतसूत्रे अस्मिन्नधिकम् इति सप्तम्यन्तनिर्देशः व्यर्थः। व्यर्थीभूय च अधिकशब्दयोगे सप्तमी भवतीति वचनं ज्ञापयति। ज्ञापिते च अस्मिन् वचने प्रकृतसूत्रे अस्मिन्नधिकम् इति अधिकशब्दयोगे सप्तम्यन्तप्रयोगः स्वांशे चरितार्थः। लोके अधिको हरिः इत्यादौ अधिकशब्दयोगे सप्तम्यन्तस्य प्रयोगः प्रकृतवचनस्य फलम्। अन्यथा एतद्वचनाभावे अधिकशब्दयोगे सप्तम्याः विधायकसूत्राभावात् लोके अधिको हरिः इत्यादिप्रयोगाः न सिध्यन्ति।

एवमेव 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' (पा.सू. २.३.९) इत्यस्मिन् सूत्रे यस्मादधिकम् इति निर्देशःअधिकशब्दयोगे पञ्चमी भवतीति वचनस्य ज्ञापकः। यतो हि अत्र 'षष्ठी शेषे' इति सूत्रेण अवधित्वसम्बन्धे

षष्ठी एव स्यात् न पञ्चमी। एवञ्च प्रकृतसूत्रे यस्मादधिकम् इति पञ्चम्यन्तनिर्देशः व्यर्थः। व्यर्थीभूय च अधिकशब्दयोगे पञ्चमी भवतीति वचनं ज्ञापयति। ज्ञापिते च अस्मिन् वचने प्रकृतसूत्रे यस्मादधिकम् इति अधिकशब्दयोगे सप्तम्यन्तप्रयोगः स्वांशे चरितार्थः। 'लोकाद् अधिको हरिः' इत्यादौ अधिकशब्दयोगे पञ्चम्यन्तस्य प्रयोगः प्रकृतवचनस्य फलम्। अन्यथा एतद्वचनाभावे अधिकशब्दयोगे पञ्चम्याः विधायकसूत्राभावात् 'लोकाद् अधिको हरिः' इत्यादिप्रयोगाः न सिध्यन्ति।

'यथासंख्यमनुदेशः समानाम्' (पा.सू. १.३.१०) इत्यस्मिन् सूत्रे समानाम् इति प्रयोगः 'सर्वादिगणे तुल्यपर्यायः समो न गृह्यते' इति वचनस्य ज्ञापकः। यतो हि यदि ज्ञापितमिदं वचनं न स्यात् तर्हि तुल्यपर्यायस्यापि समशब्दस्य सर्वादिगणे पाठः दुर्वारः स्यात्। तदा तुल्यपर्यायस्यापि समशब्दस्य 'सर्वादीनि सर्वनामानि' (पा.सू. १.१.२७) इति सूत्रेण सर्वनामसंज्ञा स्यात्। सति च सर्वनामसंज्ञायां 'आमि सर्वनाम्नः सुट्' (पा.सू. ७.१.५२) इति सूत्रेण आमः सुडागमो दुर्वारः स्यात्। तेन तुल्यपर्यायस्यापि समशब्दस्य समेषाम् इत्येव रूपं स्यात्, न तु समानामिति इति। 'सर्वादिगणे तुल्यपर्यायः समो न गृह्यते' इति वचने ज्ञापिते सति तुल्यपर्यायस्य समशब्दस्य सर्वादिगणे पाठाभावात् सर्वनामसंज्ञा न भवति।

ततः परस्य आमः सुडपि न भवति सर्वनामसंज्ञाभावात्। तेन समानाम् इति प्रयोगः स्वांशे चरितार्थो भवति। 'समेऽपि बले पूर्वः परेण बाध्यते, विप्रतिषेधशास्त्रात्' इत्यादि शिष्टप्रयोगाः प्रकृतस्य ज्ञापितवचनस्य फलम्।

**१.८. प्रश्लेषः**

कदाचित् समस्यायाः समाधानार्थं पाणिनीयसूत्रस्य भिन्नरीत्या पदच्छेदं कृत्वा सूत्रार्थस्य परिवर्तनं क्रियते। एवञ्च पाणिनीयव्याकरणे बहुत्र नूतनार्थस्य निष्पत्तिः क्रियते। सा पद्धतिः प्रश्लेषः इति नाम्ना ज्ञायते। एकमुदाहरणं यथा 'नाज्झलौ' (पा.सू. १.१.१०) इति सूत्रम्। अत्र अच्च हल् च अज्झलौ इति विग्रहः। तेन प्रकृतसूत्रस्य अर्थो भवति तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः इति। वस्तुतः अत्र यः अच् इति प्रत्याहारः अस्ति तेन प्रत्याहारेण केवलं माहेश्वरसूत्रे साक्षात् विद्यमानाः अ, इ, उ, ऋ, ऌ, ए, ऐ,ओ, औ इत्येते स्वराः एव गृह्यन्ते। अन्येषाम् आ, ई, ऊ, ॠ इत्येतेषां तथा सर्वेषां प्लुतभेदानाञ्च ग्रहणं न भवति। अर्थात् 'तुल्यास्यप्रयत्नं सवर्णम्' इत्यनेन सूत्रेण प्राप्तम् अकारहकारयोः सावर्ण्यं 'नाज्झलौ' इति सूत्रेण यद्यपि निवार्यते, तथापि आकारहकारयोः सावर्ण्यम्, एवमेव ईकारशकारयोः तथा ॠकारषकारयोः सावर्ण्यं तु न निवार्यते। वस्तुतः ईकारशकारयोः तथा ॠकारषकारयोः सावर्ण्यं विद्यते चेदपि न

हानिः। यतो हि 'अणुदित् सवर्णस्य चाप्रत्ययः' (पा.सू. १.१.६९) इत्यस्मिन् सावर्ण्यग्राहकशास्त्रे अण् इति प्रत्याहारः गृहीतः। अण्प्रत्याहारे च ईकारस्य, शकारस्य, ऋकारस्य, षकारस्य वा अन्तर्भावो नास्ति। अतः ईकारशकारयोः तथा ऋकारषकारयोः सावर्ण्यं विद्यते चेदपि व्याकरणशास्त्रे सवर्णग्रहणसमये न कुत्रापि ईकारग्रहणेन शकारग्रहणं, शकारग्रहणेन वा ईकारग्रहणं भविष्यति। एवमेव ऋकारग्रहणेन षकारग्रहणं, षकारग्रहणेन ऋकारग्रहणं वा न कुत्रापि सम्भवति। परन्तु आकारहकारयोः सावर्ण्यं न निवार्यते चेत् दोषः भवत्येव। यद्यपि 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सूत्रस्थेन अण्प्रत्याहारेण आकारः न गृह्यते तथापि हकारस्तु गृह्यते एव। अतः यद्यपि आकारेण हकारस्य ग्रहणं न सम्भवति तथापि हकारग्रहणेन आकारस्य अनिष्टं ग्रहणम् अवश्यं सम्भवति। एवञ्च हकारेण आकारस्य ग्रहणं क्रियते चेत् विश्वपाभिः इत्यादौ अनिष्टं ढत्वं प्राप्नोति। तथाहि – विश्वपा भिस् इत्यवस्थायां 'हो ढः' इति सूत्रेण आकारस्य ढत्वं प्राप्नोति। यतो हि 'हो ढः' (पा.सू. ८.२.३१) इति सूत्रेण हकारस्य ढकारादेशो विधीयते झलि पदान्ते च। अत्र भकाररूपे झलि परे आकारस्यापि ढकारादेशो भवेत्, आकारहकारयोः सावर्ण्यात् हकारेण आकारस्यापि ग्रहणात्। अत्र समस्यायाः समाधानार्थं 'नाज्झलौ' इत्यस्मिन् सूत्रे

आकारस्य प्रश्लेषः क्रियते। नाज्झलौ इति सूत्रस्य अर्थः आकारसहितोऽच् आच् स च हल् चेत्येतौ मिथः सवर्णौ न स्तः इति स्वीक्रियते। तेन आकारस्य अच्-वर्णस्य च हल्-वर्णेन सह सावर्ण्यं न भवतीति बोध्यम्। एवञ्च आकारस्य प्रश्लेषं कृत्वा आकारस्य हकारेण सह सावर्ण्यं निवार्यते, तेन हकारग्रहणेन आकारग्रहणस्य अनिष्टापत्तेः अपि निषेधो भवति। एवमेव अन्यत्रापि बहुत्र प्रश्लेषस्य साहाय्येन समास्यायाः समाधानं क्रियते।

### १.९. योगविभागः

पाणिनीयव्याकरणे न केवलं सूत्रैः पदसिद्धिः भवति अपि तु सूत्रैः सह वार्त्तिकानां भाष्याणाञ्च आवश्यकता वर्तते। पदसिद्ध्यर्थं यथा व्याख्याने उदाहरणप्रत्युदाहरणवाक्याध्याहारादीनामावश्यकता दृश्यते तथैव अपरे केचन पदसिद्ध्युपायाः सन्ति। येषां शब्दानां सिद्धिप्रक्रिया पाणिनीयसूत्रेण न सिध्यति तेषां शब्दानां सिद्ध्यर्थं योगविभागाद्युपायाः आश्रियन्ते। 'योगविभागाद् इष्टसिद्धिः' इत्येका परिभाषा अस्ति। तेन इष्टस्य शब्दस्य साधुत्वप्रतिपादनार्थमेव योगविभागः क्रियते न त्वनिष्टस्य सिद्धये।

### १.९.१ योगशब्दस्य अर्थः

'योगे-योगे तवस्तरं वाजे-वाजे हवामहे। सखाय इन्द्रमूतये॥'[१०] इत्यादौ ऋग्वेदे योगशब्दस्य उल्लेखः दृश्यते। अस्य मन्त्रस्यार्थः सायणाचार्येण एवं प्रतिपादितः – 'योगे योगे प्रवेशे प्रवेशे तत्कर्मोपक्रमे' इति। युजिर् योगे इति धातोः 'हलश्च' (पा.सू. ३.३.१२१) इति सूत्रेण घञ्प्रत्यये 'चजोः कु घिण्यतोः' (पा.सू. ७.३.५२) इति सूत्रेण कुत्वे योगशब्दः निष्पद्यते इति सायणाचार्येण स्वीकृतम्। आयुर्वेदशास्त्रे योगशब्दस्य 'द्रव्याणां सम्मेलनम्' इत्यर्थः स्वीकृतः। तत्र द्रव्याणां सम्मेलनम् औषधनिर्माणार्थमित्यर्थः। त्रिकाण्डशेषे पुरुषोत्तमदेवः योगशब्दस्य चारः सूत्रम् चेति अर्थद्वयं स्वीकरोति। अभिधानचिन्तामणिकारः हेमचन्द्रः योगशब्दस्य नैयायिकः धनम् चेति अर्थद्वयं स्वीकरोति। 'युज समाधौ'[११] इति समाध्यर्थकात् युज्-धातोः 'भावे' (पा.सू. ३.३.१८) इति सूत्रेण घञ्प्रत्यये योगशब्दः निष्पद्यते। अयं योगशब्दः समाध्यर्थे प्रयुज्यते। 'अथ योगानुशासनम्' इति प्रथमयोगसूत्रभाष्ये व्यासदेवेन 'योगः समाधिः' इति व्याख्या कृता। वस्तुतः चित्तवृत्तेः निरोधः एव योगः। तदुक्तं भगवता पतञ्जलिना द्वितीये सूत्रे 'योगश्चित्तवृत्तिनिरोधः' इति। क्षिप्तम्, मूढम्, विक्षिप्तम्, एकाग्रम्, निरुद्धम्

इति पञ्चचित्तभूमिषु यत्किञ्चित् चित्तवृत्तिनिरोधावश्यम्भावाद् योगलक्षणस्य अतिव्याप्तिदोषवारणाय 'सर्वविषयेभ्यः अन्तःकरणवृत्तेर्निरोधः योगः' इति परिष्कृतार्थः। चित्तवृत्तिनिरोधरूपयोगश्च द्विविधः। राजयोगो हटयोगश्च। तत्र राजयोगः पतञ्जलिनोक्तः – 'योगश्चित्तवृत्तिनिरोधः' इति। हटयोगस्तु तन्त्रशास्त्रोक्तः। 'संयोगं योगमित्याहुर्जीवात्मपरमात्मनोः' इत्युक्ते जीवात्मपरमात्मनोरैक्ये योगशब्दः प्रयुज्यते। ज्योतिषशास्त्रोक्तेषु रविचन्द्रयोगाधीनेषु विष्कुम्भादिषु सप्तविंशतौ पदार्थेषु तिथिवारनक्षत्राणाम् अन्यतरान्यतमानां योगविशेषे योगशब्दस्य प्रयोगः दृश्यते। देवीभागवतानुसारं योगशब्दस्यार्थः प्रेम। तथाहि –

स्वीयान् गुणान् प्रविततान् प्रवंदस्तदासौ।
तां प्रेमदामनुचकार च योगयुक्तः॥[१२] इति।

अमरकोषे योगशब्दस्य सन्नहनम्, उपायः, ध्यानम्, सङ्गतिः, युक्तिः चेति पञ्च अर्थाः स्वीकृताः सन्ति। तदुक्तं – 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इति।[१३] 'समुदायशब्दस्यावयवार्थसम्बन्धे योगबलं समाख्या' इति मीमांसकाः वदन्ति। श्रीमद्भगवद्गीतायामुक्तं 'योगः कर्मसु कौशलम्' इति। तत्र यथास्थितवस्तुनः अन्यथारूपप्रतिपादने योगशब्दः व्यवह्रियते। यथा – संसारबन्धनहेतोरपि कर्मणः

अबन्धमोक्षहेतुत्वम्। निरुक्तेऽपि योगशब्दस्य प्रयोगः दृश्यते। तथाहि – 'शास्त्रकृतो योगश्चेति'। सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतः लिखति। विष्णुपुराणानुसारं योगशब्दस्यार्थः 'मनोगत्या ब्रह्मणि संयोगः' इति। तथाहि –

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते॥[१४] इति।

पाणिनीयधातुपाठे 'युज्-समाधौ' इति दिवादिगणीयः 'युजिर्-योगे'[१५] इति रूधादिगणीयः 'युज्-संयमने'[१६] इति चुरादिगणीयः चेति धातुत्रयं विद्यते। युज्यन्ते लक्ष्याणि अस्मिन् इति योगः इति विग्रहे युजिर्-योगे इति रुधादिगणीयात् युज्-धातोः 'करणाधिकरणयोश्च' (पा.सू. ३.३.११७) इति सूत्रेण अधिकरणार्थे घञ्-प्रत्यये योगशब्दः निष्पद्यते। व्याकरणशास्त्रे योगशब्दस्यार्थः सूत्रम्। सूत्राण्येव योगपदेन गृह्यन्ते। महाभाष्ये बहुत्र सूत्रार्थे योगशब्दस्य प्रयोगः दृश्यते। अर्थात् योगविभागः इत्यनेन पाणिनीयसूत्राणां विभागः इति बोध्यम्।

## १.९.२ योगविभागस्य सामान्यपरिचयः

प्राचीनकाले शिष्याः शास्त्राणि गुरुमुखात् श्रुत्वा मनसि धारयन्ति स्म। अध्ययनाध्यापनरीतिः सर्वथा मौखिकी आसीत्। अतः प्राचीनशास्त्राणि सूत्राकारेण रचितानि दृश्यन्ते। सूत्राण्यपि संहितारूपेणैव पठितानि स्मृतिसौकर्यार्थम्। व्याकरणशास्त्रस्य सूत्राण्यपि संहिताक्रमेणैव पठितानि। भगवता पाणिनिनापि अष्टाध्यायी संहिताक्रमेणैव लिखिता। अनन्तरं प्रवचनकाले योगविभागं कृत्वा उपदिष्टा। पाणिनिः स्वशिष्यान् सूत्रविच्छेदं कृत्वा उपदिदेश इत्यत्र भाष्यमेव प्रमाणम्। तथाहि उक्तं महाभाष्ये – 'उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः। केचिद् आकडारादेका संज्ञा इति, केचित् प्राक्कडारात् परं कार्यमिति।'[१७] अत्र एकं प्रमाणं यथा – स्थानेऽन्तरतमः उरण्रपरः इत्यपि पाठः भवितुमर्हति, स्थानेऽन्तरतमे उरण्रपरः इत्यपि। स्थानेऽन्तरतमे इति सप्तम्यन्तपाठे उकाररूपे अचि परे 'एचोऽयवायावः' (पा.सू. ६.१.७८) इति सूत्रेण मकारोत्तरस्य एचः एकारस्य स्थाने अय् इत्यादेशे उकाररूपे अशि परे 'लोपः शाकल्यस्य' (पा.सू. ८.३.१९) इति सूत्रेण अवर्णपूर्वस्य यकारस्य लोपे स्थानेऽन्तरतम उरण्रपरः इति सिध्यति। स्थानेऽन्तरतमः इति प्रथमान्तपाठे स्थानेऽन्तरतमस् इत्यवस्थायां 'ससजषोः रुः' (पा.सू. ८.२.६६) इति सूत्रेण पदान्तस्य सस्य

रूत्वे 'भोभगोअघोअपूर्वस्य योऽशि' (पा.सू. ८.३.१७) इति सूत्रेण रोः यादेशे स्थानेऽन्तरतमय् उरण्रपरः इति स्थिते 'लोपः शाकल्यस्य' इति सूत्रेण यकारस्य लोपे स्थानेऽन्तरतम उरण्रपरः इति सिध्यति। अतः शङ्का भवति यत् अत्र सप्तम्यन्तपाठोऽस्ति अथवा प्रथमान्तपाठः। यदि सप्तम्यन्तपाठः स्वीक्रियते तर्हि अन्तरतमे स्थाने इति अन्वयः भवति। स्थाने इत्यस्य अर्थः तिष्ठन्ति अस्मिन् आदेशाः इति। अन्तरतमे इत्यस्य अर्थः सदृशतमे इति। तेन सदृशतमे स्थानिनि आदेशः भवतीति अर्थः भवति। सप्तम्यन्तपाठस्वीकारे अन्तरतमे इति स्थानिनः विशेषणं भवति। अर्थात् स्थानिनः अन्तरतमत्वं स्वीक्रियते। तेन इको यणचि इति सूत्रस्य अर्थः भविष्यति – सदृशतमस्य इकः स्थाने यण् भवति अचि परे इति। य् व् र् ल् इत्येते आदेशाः सदृशतमस्य स्थानिभूतस्य इकारादेः स्थाने भवन्ति। अर्थात् इ उ ऋ ऌ इत्येताषां मध्ये यः सदृशतमः अस्ति तस्य स्थाने आदेशः भविष्यति। स्थानेऽन्तरतमः इति प्रथमान्तपाठस्वीकारे तु अन्तरतमः इति आदेशस्य विशेषणं भवति। तेन इको यणचि इति सूत्रस्य अर्थः भवति – इकः स्थाने सदृशतमः यण् आदेशः भवतीति। य् व् र् ल् इत्येतेषां मध्ये यः सदृशतमः अस्ति सः भविष्यति। अर्थात् अत्र आदेशस्य सदृशतमत्वं स्वीक्रियते। तदुक्तं भगवता पतञ्जलिना – 'यथा पुनरियमन्तरतमनिवृत्तिः,

सा किं प्रकृतितो भवति – स्थानिन्यन्तरतमे षष्ठीति। आहोस्विदादेशतः स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति। कुतः पुनरियं विचारणा। उभयथा हि तुल्या संहिता स्थानेऽन्तरतम उरण्रपरः इति।'[१८]

महाभाष्ये बहुत्र पतञ्जलिः पूर्ववर्तिवृत्तिकाराणां योगविभागं न स्वीकरोति। स्वयमेव भिन्नरूपेण योगविभागं करोति। यथा 'यञश्च' (पा.सू. ४.१.१६) इति सूत्रस्य भाष्ये उक्तं – 'नैवं विज्ञायते – कञक्करपो यञश्चेति। कथं तर्हि। कञक्करपोऽयञश्चेति।'[१९] एवमेव महाभाष्ये बहुत्र अष्टाध्यायी संहितारूपेणैव रचिता इति ध्वनिता। किञ्च संहितापाठस्वीक्रियते चेदेव योगविभागपरम्परा सिध्यति। महाभाष्यकारेण अपि बहुत्र पाणिनीयसूत्रेषु योगविभागः स्वीकृतः। तेषां योगविभागानां समीक्षणमेव मम शोधप्रबन्धस्य विषयः।

१ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं.२०

२ श.प.ब्रा., ६.५.३.४

३ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं.३३०

४ तदेव, प्रदीपः, पृ.सं. ३३०

५ तदेव, प्रथमभागः, पृ.सं.३३०

६ तदेव, पृ.सं. ८१

७ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. १९

८ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. ५४

९ प.भा.शे., सम्पा. विश्वनाथमिश्रः, पृ.सं. १८०

१० ऋ.वे, १.६.३०.७

११ दिवादिः, धा.सं. ७४

१२ दे.भा., ३.१५.१३

१३ अ.को., ३.३.२२

१४ वि.पु., ९.७

१५ रुधादिः, धा.सं. ७

१६ चुरादिः, धा.सं. ३३८

१७ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. १९१

१८ तदेव, प्रथमभागः, पृ.सं. ४१५

१९ तदेव, चतुर्थभागः, पृ.सं. ५०

* * *

# द्वितीयोऽध्यायः

## समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा

अस्मिन् अध्याये समासाधिकारस्थाः योगविभागाः तथा प्रत्ययाधिकारस्थाः योगविभागाः आलोचिताः। तत्र 'प्राक् कडारात् समासः' (पा.सू. २.१.३) इत्यनेन सूत्रेण समासाधिकारः निर्धार्यते। समासाधिकारविधायकस्य सूत्रस्यास्य अर्थः – 'कडाराः कर्मधारये' (पा.सू. २.२.३८) इति सूत्रात् प्राक् समासः इत्यधिक्रियते इति। अर्थात् अष्टाध्याय्याः द्वितीयाध्यायस्य प्रथमपादस्य तृतीयसूत्रादारभ्य द्वितीयपादस्य अष्टत्रिंशत् सूत्रपर्यन्तं समासाधिकारः वर्तते। समासाधिकारेऽस्मिन् त्रयाणां सूत्राणां योगविभागः समीक्षितः। प्रत्ययाधिकारविधायकं सूत्रं तावत् – 'प्रत्ययः' (पा.सू. ३.१.१) इति। अनेन सूत्रेण पञ्चमाध्यायस्य परिसमाप्तिपर्यन्तं प्रत्ययाधिकारः विधीयते। अर्थात् तृतीयाध्यायस्य प्रथमपादस्य प्रथमसूत्रादारभ्य आपञ्चमाध्यायपरिसमाप्तेः प्रत्ययाधिकारो वर्तते। प्रत्ययाधिकारेऽस्मिन् प्रायः पञ्चशताधिकाः प्रत्ययाः विहिताः। तेषु 'गुप्तिज्किद्भ्यः सन्' (पा.सू. ३.१.५) इति सूत्रेण विधीयमानः सन्-प्रत्ययः प्रथमः प्रत्ययः अस्ति, तथा 'उरःप्रभृतिभ्यः कप्' (पा.सू. ५.४.१५१) इत्यनेन सूत्रेण विधीयमानः कप्-प्रत्ययः अन्तिमः प्रत्ययः अस्ति। प्रत्ययाधिकारेऽस्मिन् त्रयोदशसूत्राणां योगविभागः आलोचितः।

समासाधिकारस्थानां योगविभागानां समीक्षा –

## २.१. सह सुपा (पा.सू. २.१.४)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र सह इति अव्ययपदम्। सुपा इति तृतीयैकवचनान्तं पदम्। सूत्रेऽस्मिन् 'सुबामन्त्रिते पराङ्गवत् स्वरे' (पा.सू. २.१.२) इति सूत्रात् सुप् इति पदमनुवर्तते। 'प्राक्कडारात्समासः' (पा.सू. २.१.३) इति सूत्रात् समासः इति पदमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – सुप् सुपा सह समासः इति। 'समर्थः पदविधिः' (पा.सू. २.१.१) इति सूत्रात् अनुवर्तमानं समर्थपदं तृतीयया विपरिणम्यते। 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम्'[१] इति परिभाषाबलात् सूत्रार्थो भवति – सुबन्तं समर्थेन सुबन्तेन सह समस्यते इति। भूतपूर्वः इत्याद्यत्रोदाहरणम्।

### २.१.१ आक्षेपः

प्रकृतसूत्रस्य सुबन्तं समर्थेन सुबन्तेन सह समस्यते इत्यर्थः स्वीक्रियते चेत् भूतपूर्वः इत्यादौ तु समासः सिध्यति परन्तु पर्यभूषयत्, अनुव्यचलत् इत्यादौ सुबन्तस्य तिङन्तेन सह समासः न सिध्यति। अतः पर्यभूषयत्, अनुव्यचलत् इत्यादौ सुबन्तस्य तिङन्तेन सह समासः कथं भवतीति आक्षेपः उदेति।

## २.१.२ योगविभागेन समाधानम्

पर्यभूषयत्, अनुव्यचलत् इत्यादौ सुबन्तस्य तिङन्तेन सह समासः कथं भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'सह' इति एकं सूत्रम्। 'सुपा' इति अपरं सूत्रम्। तत्र 'सह' इति प्रथमसूत्रे 'सुबामन्त्रिते पराङ्गवत् स्वरे' इति सूत्रात् सुप् इति पदमनुवर्तते। 'प्राक्कडारात्समासः' इति सूत्रात् समासः इति पदमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – सुप् सह समासः इति। 'समर्थः पदविधिः' इति सूत्रात् अनुवर्तमानं समर्थपदं तृतीयया विपरिणम्यते। 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम्' इति परिभाषाबलात् प्रथमसूत्रार्थो भवति – सुबन्तं समर्थेन सह समस्यते इति। अर्थात् सुबन्तं येन केनापि समर्थेन सह समस्यते। तेन अनुव्यचलत् इत्यादौ समासः सिध्यति। तथाहि – वि इति सुबन्तस्य अचलत् इति तिङन्तेन सह समासे व्यचलत् इति भवति। तदनन्तरम् अनु इति सुबन्तेन सह व्यचलत् इत्यस्य समासे अनुव्यचलत् इति रूपं सिध्यति। 'योगविभागादिष्टसिद्धिः'[२] इति परिभाषाबलात् यत्र वैदिकप्रयोगे सुबन्तस्य तिङन्तेन सह समासः दृश्यते तत्रैव अनेन सूत्रेण समासः सिध्यति, न तु सर्वत्र। 'सुपा' इति द्वितीयसूत्रेऽपि

'सुबामन्त्रिते पराङ्गवत् स्वरे' इति सूत्रात् सुप् इति पदमनुवर्तते। 'प्राक्कडारात्समासः' इति सूत्रात् समासः इति पदमनुवर्तते। 'सह' इति प्रथमसूत्रमपि अनुवर्तते। तेन सम्पूर्णं द्वितीयसूत्रं भवति – सुप् सुपा सह समासः इति। 'समर्थः पदविधिः' इति सूत्रात् अनुवर्तमानं समर्थपदं तृतीयया विपरिणम्यते। 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम्' इति परिभाषाबलात् द्वितीयसूत्रस्यार्थो भवति – सुबन्तं समर्थेन सुबन्तेन सह समस्यते इति। तेन भूतपूर्वः इत्यादौ शिष्टप्रयोगे समासः भवति यत्र समासविधायकं सूत्रं नास्ति। सहग्रहणं विना केवलं सुपा इति सूत्रं क्रियते चेदपि लक्ष्यसिद्धिर्भवति। सहग्रहणं व्यर्थीभूय ज्ञापयति यत् – अत्र योगविभागार्थं सहग्रहणं कृतमस्तीति। तदुक्तं भाष्यकारेण – 'एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति तस्यैतत्प्रयोजनं – योगाङ्गं यथा विज्ञायेत। सति च योगाङ्गे योगविभागः करिष्यते – सह। सुप् समस्यते। केन सह। समर्थेन। अनुव्यचलद् अनुप्राविशत्। ततः सुपा, सुपा च सह सुप्समस्यते। अधिकारश्च लक्षणञ्च। यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति।'[३] इति।

### २.१.३ समीक्षणम्

‘सह सुपा’ इति सूत्रे सहपदग्रहणस्य आवश्यकता अस्ति न वेति आदौ समीक्षा क्रियते। ‘वृद्धो यूना तल्लक्षणश्चेदेव विशेषः’ (पा.सू. १.२.६५) इति सूत्रे यूना सह इति सहयोगे तृतीयां स्वीकृत्य ‘यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्’ इति सूत्रार्थः स्वीकृतः भट्टोजिदीक्षितेन।[४] एवमेव अत्रापि ‘सुपा’ एतावन्मात्रं सूत्रं क्रियते चेदपि न हानिः, यतो हि अत्रापि सुपा इत्यत्र सहयोगे तृतीया स्वीकर्तुं शक्यते। तेन सहग्रहणं विनापि सुपा सह इति लभ्यते। अतः ‘सह सुपा’ इति प्रकृतसूत्रे सहग्रहणं व्यर्थम्।

सहभूतयोः एव समाससंज्ञाविधानार्थमत्र सहग्रहणं कृतम् इत्यपि वक्तुं न शक्यते। यतो हि समाससंज्ञा तु एकार्थीभावे विधीयते। किञ्च ‘प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः’[५] इति परिभाषयापि प्रधानरूपस्य समुदायस्यैव समाससंज्ञा भवति। किञ्च ‘समुदायावयवसन्निधौ समुदाये कार्यसम्प्रत्ययः’ इति न्यायादपि समुदायस्यैव समाससंज्ञा न तु प्रत्येकं पदस्य। यथा ‘एकाचो द्वे प्रथमस्य’ (पा.सू. ६.१.१) इत्यनेन एकाज्विशिष्टसमुदायस्यैव द्वित्वं विधीयते, न तु अवयवस्य। अन्वर्थसंज्ञाविधानाद्वा समुदायस्यैव संज्ञा स्यात्। तथाहि – समस्यते

सम्बध्यते एकमन्येन इति समासः इति अन्वर्थसंज्ञा। सम्बन्धश्च द्विष्ठः। एवञ्च सहग्रहणं विनापि समाससंज्ञा समुदायस्यैव सिध्यति, न तु प्रत्येकं समस्यमानपदस्य। अतः प्रत्येकं समस्यमानपदस्य समाससंज्ञा प्राप्ता एव नास्ति।

यदि उच्यते प्रत्येकं पदस्यापि समाससंज्ञा प्राप्नोति। यतो हि प्रत्यवयवं च वाक्यपरिसमाप्तिः दृश्यते। यथा – 'देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम्' इत्यादौ प्रत्येकमिति नोच्यते तथापि प्रत्येकं भुङ्क्ते। एवमेव वृद्धिसंज्ञा गुणसंज्ञा च प्रत्येकमेव भवति न तु समुदायस्यैव। तदुक्तं भाष्ये – 'प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा इति। तद्यथा– वृद्धिगुणसंज्ञे भवतः।'[६] इति। तथैव प्रकृतेऽपि समाससंज्ञा समस्यमानस्य प्रत्येकं पदस्य स्यात्। भवतु प्रत्येकं पदस्य समाससंज्ञा। कोऽत्र दोषः स्यात्, इति चेदुच्यते – प्रत्येकं पदस्य समाससंज्ञायां दोषः स्यात्। यथा – ऋक्पाद इत्यादौ समासान्तप्रत्ययः प्राप्नोति। तथाहि – प्रत्येकं पदस्य समाससंज्ञायाम् ऋक्पाद इत्यादौ ऋच् इत्यस्मात् परम् 'ऋक्पूरब्धूःपथामानक्षे' (पा.सू. ५.४.७४) इति सूत्रेण अ इति समासान्तप्रत्ययो भविष्यति। तदा ऋचपाद इत्यादिरूपं भविष्यति। राजाश्वः इत्यादौ प्रत्येकं पदस्य समाससंज्ञायाम् उभयोः पदयोः समासान्तोदात्तत्वं स्यात्। राजाश्वः इत्यत्र समासान्तप्रत्ययेऽपि रूपभेदाभावो दृश्यते। अतः

अत्र स्वरद्वयप्रसङ्गरूपदोषः प्रदर्शितः। ऋक्पाद् इत्यादावपि स्वरद्वयप्रसङ्गरूपदोषस्तु अस्त्येव। अतः प्रत्येकं पदस्य समाससंज्ञा यथा न स्यात्, सहभूतयोः एव समाससंज्ञा यथा स्यात्तदर्थं सूत्रे सहग्रहणं कृतम्।

अत्र समाधानमुच्यते – वस्तुतः प्रत्येकं पदस्य समाससंज्ञा न प्राप्नोति। यतो हि समुदायेऽपि वाक्यपरिसमाप्तिर्दृश्यते। यथा – गर्गाः शतं दण्ड्यन्ताम् इत्यादौ राजानः न प्रत्येकं दण्डयन्ति अपि तु समुदायमेव दण्डयन्ति। एवं समुदायप्रत्येकग्रहणपक्षद्वये स्थिते प्रयोजनवशात् कश्चित् क्वचित्पक्षः आश्रीयते। एवञ्च अन्तरेणापि सहग्रहणं समुदायस्य समाससंज्ञा भविष्यति। लक्ष्यानुरोधादेव समासपदं तत्समूहपरमिति भावः। अतः सहग्रहणस्य आवश्यकता नास्ति।

एवञ्च सहग्रहणं विनापि समुदायस्य समाससंज्ञासिद्धे पुनः सहग्रहणं योगविभागार्थमेवास्ति इत्यत्र नास्ति वैयाकरणानां वैमत्यम्। किञ्च योगविभागं विना पर्यभूषयत्, अनुव्यचलत् इत्येतेषां सिद्धिः नैव सम्भवति। अतः अत्र योगविभागः अवश्यं स्वीकार्यः। काशिकाकारेणात्रोक्तं – 'सहग्रहणं योगविभागार्थं, तिङापि यथा स्यात्। अनुव्यचलत्। अनुप्रावर्षत्।'[७] इति। सिद्धान्तकौमुदीकारेणापि उक्तं – 'सह इति योगो

विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिद्ध्यर्थत्वात् कतिपयतिङन्तोत्तरपदोऽयं समासः। स च छन्दस्येव। पर्यभूषयत्। अनुव्यचलत्। सुपा। सुप्सुपा सह समस्यते।'[८] इति। बालमनोरमाकारेणापि उक्तं – 'समाससंज्ञाया अन्वर्थत्वादेकस्याप्रसङ्गात् सुपेत्येतावतैव सहेति सिद्धे तद्ग्रहणं योगविभागार्थमिति भावः।'[९] इति। तत्त्वबोधिनीटीकायामप्युक्तं – 'ननु अन्वर्थत्वात्समाससंज्ञायाः प्रत्येकमप्रसङ्गात् सहग्रहणं व्यर्थमित्याशङ्क्याह – योगो विभज्यते इति।'[१०] इति। सुपेत्येतावतैव सहेति सिद्धे तद्ग्रहणं योगविभागार्थमिति भावः। नागेशेनाप्यत्र योगविभागः स्वीकृतः। तदुक्तम् उद्योतटीकायां – 'योगोऽत्राष्टाध्यायी। यद्यपि योगविभागाभावेऽपि अवयवावयवस्य समुदायावयवत्वन्यायेन अष्टाध्याय्यवयवत्वम् अस्त्येव तथापि साक्षादवयवत्वमेवात्र विवक्षितं तच्च योगविभागमन्तरेण न सम्भवतीति बोध्यम्।'[११] इति।

## २.२. तृतीया तत्कृतार्थेन गुणवचनेन (पा.सू. २.१.३०)

प्रकृतेऽस्मिन् सूत्रे तृतीया इति प्रथमैकवचनान्तं पदम्। तत्कृत इति लुप्ततृतीयान्तनिर्देशः अस्ति। अर्थेन इति तृतीयैकवचनान्तं पदम्। गुणवचनेन इत्यपि तृतीयैकवचनान्तं पदम्। तत्कृतेन इति तृतीयान्तपदस्य अन्वयः गुणवचनेन इति पदेन सह भवति न तु अव्यवहितेन अर्थेन इत्यनेन

पदेन सह। अर्थात् तत्कृतेन इति गुणवचनेन इत्यस्य विशेषणमस्ति। तत्कृतेन इत्यत्र तच्छब्देन यद्यपि पूर्वनिर्दिष्टस्य तृतीयान्तपदस्य ग्रहणं भवति तथापि अत्र लक्षणया तृतीयान्तार्थः स्वीक्रियते। यतो हि तृतीयान्तपदद्वारा न कोऽपि गुणः सम्भवति। अतः तृतीयान्तपदस्य अर्थः अत्र ग्राह्यः। तृतीयान्तपदार्थद्वारैव गुणं सम्पादयितुं शक्यते, न तु तृतीयान्तपदेन। गुणमुक्तवान् इति गुणवचनः शब्दः। 'कृत्यल्युटो बहुलम्' (पा.सू. ३.३.११३) इति सूत्रानुसारमत्र भूतकाले कर्तरि अर्थे ल्युट्-प्रत्ययो जातः। यः शब्दः पूर्वं गुणवाची आसीत् परन्तु अधुना द्रव्यवाची अस्ति सः शब्दः गुणवचनः इति उच्यते। अर्थात् केचनशब्दाः पूर्वं गुणे अर्थे प्रवर्तते स्म, गुणगुणिनोः अभेदोपचारात् अथवा मतुप्प्रत्ययस्य लुग्बलात् ते शब्दाः तद्गुणविशिष्टद्रव्यवाचकाः भवन्ति। ते शब्दा एव गुणवचनाः इति कथ्यन्ते। उदाहरणं यथा – श्वेतशब्दः श्वेतगुणवाचकः अस्ति परन्तु गुणगुणिनोः अभेदोपचारात् अथवा 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति वार्त्तिकानुसारं मतुप्प्रत्ययस्य लुकि कदाचित् श्वेतशब्दः श्वेतगुणविशिष्टद्रव्यवाचकः भवति। यथा श्वेतो धावति इत्यादौ श्वेतशब्दः श्वेतगुणविशिष्टाश्ववाचकः अस्ति। अतः श्वेतो धावति इत्यादौ श्वेतशब्दः गुणवाचकोऽस्ति। अस्मिन् सूत्रे तृतीया इत्यनेन 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च

ग्रहणम्' इति परिभाषाबलात् तृतीयान्तं परामृश्यते। तेन सूत्रार्थो भवति – तृतीयान्तं सुबन्तं तत्कृतेन गुणवचनेन सुबन्तेन, अर्थेन सुबन्तेन च विभाषया समासः स्यादिति। अर्थात् समासविधायकं वाक्यद्वयमत्र स्वीक्रियते। तृतीया तत्कृतेन गुणवचनेन सुबन्तेन सह वा समस्यते इति प्रथमं वाक्यम्। तृतीया अर्थप्रकृतिकेन सुबन्तेन सह वा समस्यते इति द्वितीयं वाक्यम्। तत्र प्रथमवाक्यस्यार्थो भवति – तृतीयान्तपदस्य तृतीयान्तपदार्थद्वाराकृतः यः गुणः तद्विशिष्टपदार्थवाचकेन सुबन्तेन सह विकल्पेन समासो भवति। उदाहरणं यथा – सुधया धवलं सुधाधवलं भवनम् इत्यादि। अक्ष्णा काणः, पादेन खञ्जः इत्यादौ न समासः यतो हि काणत्वं नात्र अक्ष्णा कृतमपि तु अन्येन केनापि रोगविशेषेण कृतम्। एवमेव खञ्जत्वमपि न पादेन कृतम्। घृतेन पाटवम् इत्यादौ अपि न समासः। यतो हि घृतेन पाटवम् इत्यत्र यद्यपि पाटवम् इति शब्दः गुणवाचिशब्दः अस्ति परन्तु गुणवचनशब्दः नास्ति। पाटवम् इति शब्दः पूर्वं गुणवाची आसीत्, अधुनापि गुणवाचिशब्द एव अस्ति, न तु गुणविशिष्टद्रव्यवाची। गुणवचनशब्दः स एव भवति यः भूतपूर्वगुणवाचिशब्दः अधुना द्रव्यवाची अस्ति। द्वितीयवाक्यस्य अर्थो भवति – तृतीयान्तपदस्य

अर्थप्रकृतिकसुबन्तेन सह विकल्पेन समासो भवतीति। उदाहरणं यथा – धान्येनार्थः धान्यार्थः इत्यादि। धान्यहेतुकं धनमित्यर्थः।

### २.२.१ आक्षेपः

ननु प्रकृतसूत्रे अर्थग्रहणं न कर्तव्यं यतो हि अर्थावगतिः अर्थपदग्रहणं विनापि भवति, तत्कृतस्य अर्थत्वाव्यभिचारात्। सामर्थ्यलभ्यस्यापि यदि विस्पष्टार्थम् उपादानमिति उच्यते तर्हि तृतीयार्थनिर्देशोऽपि कर्तव्यः। अर्थात् 'तृतीया तदर्थकृतार्थेन' इति वक्तव्यम्। अत एव प्रकृतसूत्रे अर्थपदग्रहणस्य आवश्यकता नास्ति। तर्हि किमर्थं प्रकृतसूत्रे अर्थपदस्य ग्रहणं कृतमिति आक्षेपः सुतरामुदेति। किञ्च एकेन नविंशतिः एकान्नविंशतिः इत्यादौ कथं समासः सिध्यतीत्यपि आक्षेपः उदेति।

### २.२.२ योगविभागेन समाधानम्

यतो हि अर्थावगतिः अर्थपदग्रहणं विनापि भवति, तर्हि किमर्थं प्रकृतसूत्रे अर्थपदस्य ग्रहणं कृतमिति जिज्ञासायामुच्यते – प्रकृतसूत्रे अर्थशब्दः अर्थपरत्वं नास्ति अपि तु शब्दपरत्वमेव अस्ति। यतो हि तृतीयार्थः तथा गुणवचनार्थः उभयत्रापि अर्थपरत्वस्य अवचनादपि सिध्यति। अर्थात् व्याख्यानेनैव अर्थगतिर्भविष्यति। अर्थशब्दस्य शब्दपरत्वे फलं हि योगविभागः। अर्थात् योगविभागेनात्र सूत्रद्वयं स्वीक्रियते। तत्र

'तृतीया तत्कृतेन गुणवचनेन' इत्येकं सूत्रम्। 'अर्थेन' इति अपरं सूत्रम्। तदुक्तं महाभाष्यकारेण – 'नायमर्थनिर्देशः। किं तर्हि। योगाङ्गमिदं निर्दिश्यते। सति च योगाङ्गे योगविभागः करिष्यते – 'तृतीया तत्कृतेन गुणवचनेन' समस्यते। ततः अर्थेन। अर्थशब्देन च तृतीया समस्यते। धान्यार्थः। वसनार्थः। हिरण्यार्थः। पूर्वसदृशसमोनार्थ इत्यर्थग्रहणं न कर्तव्यं भवतीति'।[१२] इति।

### २.२.३ समीक्षणम्

वस्तुतः प्रकृतसूत्रे योगविभागः स्वीक्रियते चेदेव वरम्। यतो हि योगविभागः स्वीक्रियते चेदेव वाक्यभेदः सम्पद्यते। न चान्तरेण वाक्यभेदं धान्यार्थः इत्यादौ अर्थशब्देन सह तृतीयान्तस्य समासः सिध्यति। किञ्च अत्र योगविभागः स्वीक्रियते चेत् 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्र-श्लक्ष्णैः' (पा.सू. २.१.३१) इत्यस्मिन् सूत्रे अर्थशब्देन समासार्थम् अर्थपदस्य ग्रहणं न कर्तव्यम्। तदुक्तं कैयटेन 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्र-श्लक्ष्णैः' इति सूत्रस्य प्रदीपटीकायां – 'पूर्वसूत्रे अर्थशब्देन समासस्य साधितत्वादिहार्थग्रहणमूनेन अभिसम्बध्यमानं तदर्थानां विकलादीनां समासं साधयति। पूर्वसूत्रे त्विहत्यमर्थग्रहणं प्रत्याख्यातम्। अर्थप्रधानत्वान्निर्देशस्योनार्थानामन्तरेणापि अर्थग्रहणं समासस्य

सिद्धत्वात्'[१३] इति। यद्यपि सिद्धान्तकौमुदीकारेण 'तृतीया तत्कृतार्थेन गुणवचनेन' इति सूत्रे साक्षात् योगविभागः न आलोचितः तथापि 'एकादिश्चैकस्य चादुक्' (पा.सू. ६.३.७६) इति सूत्रस्य एकान्नविंशतिः इति उदाहरणप्रसङ्गे 'तृतीया' इति योगविभागः स्वीकृतः। तथाहि – न विंशतिः इति विग्रहे नञ्समासे नविंशतिः इति शब्दः निष्पद्यते। एकेन नविंशतिः इति विग्रहे तृतीयासमासे सुब्लुकि एक नविंशतिः इति स्थिते 'नलोपो नञः' (पा.सू. ६.३.७३) इति सूत्रेण प्राप्तस्य लकारलोपस्य प्रकृतिभावात् निवृत्तौ एकशब्दात् च आदुगागमे एकाद् नविंशतिः इति स्थिते 'यरोऽनुनासिकेऽनुनासिको वा' (पा.सू. ८.४.४५) इति सूत्रेण दकारस्य पक्षे अनुनासिकनकारे एकान्नविंशतिः इति शब्दः निष्पद्यते। अत्र आक्षेपो भवति यत् एकेन नविंशतिः इत्यत्र तत्कृतत्वाद्यभावात् कथं तृतीयासमासो भवतीति। अत्र तृतीयासमासार्थं भट्टोजिदीक्षितेन 'तृतीया तत्कृतार्थेन गुणवचनेन' इति सूत्रे योगविभागः स्वीकृतः। तदुक्तं दीक्षितेन – 'नञो विंशत्या सह समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः। अनुनासिकविकल्पः। एकेन नविंशतिः एकान्नविंशतिः, एकाद्नविंशतिः। एकोनविंशतिरित्यर्थः'।[१४] इति। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'तृतीयेति योगविभागात् समासः।'[१५] इति।

नागेशभट्टेन तु अत्र योगविभागः न स्वीकृतः। अपि तु 'सह सुपा' इति सूत्रे योगविभागात्, मयूरव्यंसकादित्वाद्वा एकेन नविंशतिः एकान्नविंशतिः इत्यत्र समासः स्वीकृतः। तदुक्तं नागेशभट्टेन – 'सहेति योगविभागात्, मयूरव्यंसकादित्वाद्वेति तु न्याय्यम्'[१६] इति।

## २.३. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः (पा.सू. २.१.३६)

प्रकृतसूत्रे पदद्वयं वर्तते। तत्र चतुर्थी इति प्रथमान्तं पदम् अनुवर्तमानस्य सुप् इति प्रथमान्तपदस्य विशेषणम् अस्ति। तदर्थार्थबलिहितसुखरक्षितैः इति तृतीयान्तं पदम् अनुवर्तमानस्य सुपा इति तृतीयान्तपदस्य विशेषणम् अस्ति। तदर्थ इत्यत्र तच्छब्देन चतुर्थ्यन्तपदस्य अर्थः परामृश्यते। तस्मै इदं तदर्थमिति विग्रहः। अर्थात् चतुर्थ्यन्तपदस्य यः अर्थः तस्मै यत्, तत् तदर्थम्। तेन सूत्रार्थो भवति – तदर्थार्थबलिहितसुखरक्षित इत्येतैः सुबन्तैः सह चतुर्थ्यन्तं सुबन्तं वा समस्यते इति। यूपदारु, द्विजार्थः, भूतबलिः, गोहितम्, गोसुखम्, गोरक्षितम् इत्याद्यत्रोदाहरणम्। अनेन सूत्रेण तदर्थेन सह चतुर्थ्यन्तस्य समासः विधीयते। अतः प्रकृतसूत्रमेव ज्ञापकं यत् तादर्थ्ये चतुर्थी भवतीति। अन्यथा यदि तादर्थ्ये चतुर्थी न स्यात्, तदा प्रकृतसूत्रे तदर्थग्रहणमनर्थकं स्यात्। तदर्थशब्देनात्र न सर्वेषां तदर्थानां ग्रहणम्, अपि तु

प्रकृतिविकृतिभावः एव गृह्यते। अत्र ज्ञापकं हि प्रकृतसूत्रे बलिरक्षितग्रहणम्। यतो हि यदि तदर्थशब्देनैव सर्वेषां तदर्थानां ग्रहणं स्यात् तर्हि सूत्रे पुनः बलिरक्षितग्रहणं न स्यात्, तादर्थ्यस्य सम्भवात् तदर्थग्रहणेनैव समासस्य सिद्धत्वात्। हितसुखग्रहणं तु न ज्ञापकं यतो हि हितसुखयोगे 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' (पा.सू. २.३.७३) इत्यनेन सूत्रेण अतादर्थ्येऽपि चतुर्थी सम्भवति। अतः प्रकृतसूत्रे बलिरक्षितग्रहणेनैव ज्ञायते यत् अत्र तदर्थशब्देन प्रकृतिविकृतिभाव एव गृह्यते। अर्थात् यत्र चतुर्थ्यन्तपदार्थः विकृतिः, तथा तदर्थवाचकपदार्थः प्रकृतिः अस्ति तत्रैव प्रकृतसूत्रेण समासः भवति। उदाहरणं यथा यूपाय दारु यूपदारु इत्यादि। प्रकृते उदाहरणे यूपः इति विकृतिः तथा दारु इति तस्यैव यूपस्य प्रकृतिः अस्ति। अतः अत्र प्रकृतिविकृतिभावसत्त्वात् प्रकृतसूत्रेण समासः जातः। एवमेव कुण्डलाय हिरण्यं कुण्डलहिरण्यम् इत्यादावपि बोध्यम्। परन्तु यत्र प्रकृतिविकृतिभावो नास्ति तत्र प्रकृतसूत्रेण समासो न भवति। यथा रन्धनाय स्थाली इत्यादौ न समासः। अत्र स्थाली तदर्थं तु अस्ति परन्तु प्रकृतिविकृतिभावो नास्ति। अतः अत्र न समासः। एवमेव पूजायै पुष्पम्, यशसे काव्यम् इत्यादावपि प्रकृतिविकृतिभावाभावात् न समासः। ननु यदि अत्र तदर्थशब्देन प्रकृतिविकृतिभाव एव गृह्यते तर्हि अश्वघासः इत्यादौ कथं

समासः। अत्रोच्यते – अश्वघासः इत्यादौ तु अश्वानां घासः इति षष्ठीसमासः। ब्राह्मणार्थं, क्षत्रियार्थम् इत्यादौ नित्यसमासार्थं वार्त्तिककारेण 'अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या' इति वार्त्तिकं स्वीकृतम्।

### २.३.१ आक्षेपः

अत्र 'विभाषा' (पा.सू. २.१.११) इति महाविभाषाधिकाराद् ब्राह्मणार्थं, क्षत्रियार्थम् इत्यादौ विकल्पनिवृत्त्यर्थं वार्त्तिककारेण 'अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या' इति वार्त्तिकं पठितम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति यत् वार्त्तिकप्रत्याख्यानपक्षे ब्राह्मणार्थं, क्षत्रियार्थम् इत्यादौ विकल्पनिवृत्तिः कथं भवतीति। किञ्च आत्मनेपदम् इत्यादौ प्रकृतिविकृतिभावाभावात् कथं समासः भवति इत्यपि आक्षेपो भवति।

### २.३.२ योगविभागेन समाधानम्

ब्राह्मणार्थं, क्षत्रियार्थम् इत्यादौ विकल्पनिवृत्तिः कथं भवतीति आक्षेपसमाधानाय तदर्थस्य उत्तरपदस्य अर्थशब्दः आदेशः भवतीति स्वीक्रियते महाभाष्यकारेण। तदर्थं प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'चतुर्थी' इति प्रथमं सूत्रम्। 'तदर्थार्थैः' इति द्वितीयं सूत्रम्। 'चतुर्थी' इति प्रथमसूत्रस्यार्थो

भवति – चतुर्थ्यन्तं सुबन्तं सुबन्तेन सह समस्यते इति। तेन आत्मनेपदम्, आत्मनेभाषा इत्यादौ समासः सिद्धः। द्वितीयसूत्रस्य अर्थो भवति – तदर्थस्य च उत्तरपदस्य अर्थशब्दः आदेशः भवतीति। द्वितीयसूत्रेण च महाविभाषया विकल्पेन अर्थादेशः विधीयते। तेन यूपाय दारु यूपदारु, यूपार्थं दारु यूपदारु इत्यादिरूपं सिद्धम्। हितसुखयोः तादर्थ्यं नास्ति, तथापि तयोः ग्रहणं तादर्थ्यचतुर्थीसमासज्ञापनार्थं कृतमिति बोध्यम्। बलिरक्षितयोः 'चतुर्थी' इत्यनेनैव समासे सिद्धे महाविभाषयार्थादेशविकल्पे च सिद्धे तयोः ग्रहणं प्रकृतिविकृतिव्यतिरिक्ततदर्थसमासे उत्तरपदस्य नित्योऽर्थादेशः भवतीति ज्ञापकं सम्पद्यते इति ज्ञेयम्। तेन ब्राह्मणार्थं, क्षत्रियार्थम् इत्यादौ नित्यः अर्थादेशः सिद्धः। तदुक्तं महाभाष्ये – 'एवं तर्हि तदर्थस्योत्तरपदस्यार्थशब्द आदेशः करिष्यते। किं कृतं भवति। न चैव हि कदाचिदादेशेन विग्रहो भवति। अपि च सर्वलिङ्गता सिद्धा भवति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। योगविभागः करिष्यते – 'चतुर्थी' सुबन्तेन सह समस्यते। ततः 'तदर्थार्थ' तदर्थस्य चोत्तरपदस्यार्थशब्द आदेशो भवति'[१७] इति।

### २.३.३ समीक्षणम्

वस्तुतः अत्र 'अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या' इति अनुक्तवार्त्तिकप्रत्याख्यानाय योगविभागः स्वीकृतः महाभाष्यकारेण।

सिद्धान्तकौमुदीकारेण तु अत्र वार्त्तिकमेव स्वीकृतम्, परन्तु आत्मनेपदम् इत्यादौ समाससिध्यर्थं योगविभागः स्वीकृतः। यतो हि प्रकृतिविकृतिभावाभावादत्र समासो न स्यात्। अतः भट्टोजिदीक्षितेन यद्यपि 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति सूत्रे साक्षात् योगविभागः न आलोचितः तथापि 'वैयाकरणाख्यायां चतुर्थ्याः' (पा.सू. ६.३.७) इति सूत्रस्य उदाहरणप्रसङ्गे 'चतुर्थी' इति योगविभागः स्वीकृतः। तदुक्तं भट्टोजिदीक्षितेन आत्मनेपदम् इत्यादौ कथं समासः भवति इत्यस्मिन् प्रसङ्गे– 'चतुर्थीति योगविभागात्समासः'[१८] इति। तत्त्वबोधिनीकारमते अत्र अलुग्विधिरेव समासस्य ज्ञापको भवति। तदुक्तं तेन – 'इहालुग्विधिसामर्थ्यादपि समासः सुवचः।'[१९] इति। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं काशिकायां – 'चतुर्थीति योगविभागात् समासः।'[२०] इति। नागेशभट्टेन अत्र 'चतुर्थी' इति योगविभागः न स्वीकृतः। तस्य मते अत्र सुप्सुपा समासो भवति। तदुक्तं लघुशब्देन्दुशेखरे – 'सुप्सुपा इति समास इत्युचितम्।'[२१] इति।

प्रत्ययाधिकारस्थानां योगविभागानां समीक्षा –

## २.४. श्लिष आलिङ्गने (पा.सू. ३.१.४६)

प्रकृतेऽस्मिन् सूत्रे श्लिषः इति पञ्चम्येकवचनान्तं पदम्। आलिङ्गने इति सप्तम्येकवचनान्तं पदम्। 'च्लेः सिच्' (पा.सू. ३.१.४४) इति सूत्रात् च्लेः इति षष्ठ्यन्तं पदमनुवर्तते। 'शल इगुपधादनिटः क्सः' (पा.सू. ३.१.४५) इति सूत्रात् क्सः इति प्रथमान्तं पदमनुवर्तते। तेन सूत्रार्थो भवति – आलिङ्गनम् इत्यस्मिन् अर्थे प्रयुज्यमानात् श्लिष् इति धातोः विहितस्य च्लिप्रत्ययस्य क्सः आदेशः भवतीति। धातुपाठे त्रयः श्लिष्-धातवः सन्ति, भ्वादिगणस्य श्लिषुँ दाहे, दिवादिगणस्य श्लिषँ आलिङ्गने, चुरादिगणस्य श्लिषँ श्लेषणे चेति। परन्तु एतेषु चुरादिगणस्य तथा भ्वादिगणस्य श्लिष्-धातुः सेट् अस्ति। किञ्च आलिङ्गनम् इत्यर्थः केवलं दिवादिगणस्य श्लिष्-धातोः वर्तते। अतः प्रकृतेऽस्मिन् सूत्रे केवलं दिवादिगणस्य श्लिष्-धातोः ग्रहणं क्रियते। अश्लिक्षत् इत्याद्यत्रोदाहरणम्।

### २.४.१ आक्षेपः

'च्लि लुङि' (पा.सू. ३.१.४३) इत्यनेन सूत्रेण लुङ्लकारे परे धातोः च्लिविकरणप्रत्ययः भवति। अस्य च्लिप्रत्ययस्य 'च्लेः सिच्' इत्यनेन सूत्रेण औत्सर्गिकरूपेण सिच्-आदेशः विधीयते। परन्तु यः धातुः अनिट् अस्ति, यस्य अन्ते शल्-प्रत्याहारस्य वर्णः अस्ति, तथा उपधायाम् इक्-

प्रत्याहारस्य वर्णः अस्ति, तस्मात् परस्य च्लिविकरणस्य 'शल इगुपधादनिटः क्सः' इत्यनेन सूत्रेण क्सः आदेशः भवति। एवञ्च श्लिष्-धातोः 'शल इगुपधादनिटः क्सः' इत्यनेन क्स-प्रत्यये प्राप्ते तं प्रबाध्य परत्वात् 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (पा.सू. ३.१.५५) इत्यनेन सूत्रेण अङ्-प्रत्ययः प्राप्नोति। किञ्च आत्मनेपदेषु अङभावात् आलिङ्गने आलिङ्गनभिन्ने च उभयत्र 'शल इगुपधादनिटः क्सः' इत्यनेन सूत्रेण क्सः प्राप्नोति। इष्यते तु आलिङ्गने क्सः आलिङ्गनभिन्ने सिच् इति। एतच्च नियमाद् उपपद्यते। परन्तु 'श्लिष आलिङ्गने' इति सूत्रस्य नियमत्वं नोपपद्यते। यतो हि विधेयं नास्तीति कृत्वा कैमर्थक्यान्नियमो भवति। अत्र तु विधेयमस्ति। तथाहि – 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यनेन सूत्रेण श्लिष्-धातोः परस्य च्लेः परस्मैपदेषु परतोऽङादेशः प्राप्नोति, यतो हि श्लिष्-धातुः पुषादिगणे पठितः अस्ति। अतः तं प्राप्तम् अङादेशं बाधित्वा पुनः क्सः विधेयः। तेन विधेयसत्त्वात् 'श्लिष आलिङ्गने' इति नियमसूत्रमस्ति इति वक्तुं न शक्यते। अतः अत्र आक्षेपो भवति यत् 'श्लिष आलिङ्गने' इत्यस्य नियमसूत्रत्वं कथं सिध्यतीति।

## २.४.२ योगविभागेन समाधानम्

'श्लिष आलिङ्गने' इति सूत्रस्य नियमत्वप्रतिपादनार्थं वार्त्तिककारेण 'योगविभागात्सिद्धम्' इति वार्त्तिकं कृतम्। महाभाष्यकारेणापि अत्र योगविभागं स्वीकृत्य प्रकृतसूत्रस्य नियमत्वं प्रतिपादितम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'श्लिषः' इति प्रथमं सूत्रम्। 'आलिङ्गने' इति द्वितीयं सूत्रम्। श्लिषः अनिटः च्लेः क्सः स्यादिति प्रथमसूत्रार्थः। 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' इत्यनेन सूत्रेण प्राप्तम् अङं बाधित्वा प्रथमसूत्रेण क्सः विधीयते। 'आलिङ्गने' इति द्वितीयसूत्रस्य अर्थो भवति – आलिङ्गने च श्लिषः क्सो भवतीति। 'श्लिषः' इति प्रथमसूत्रेणैव सिद्धे नियमार्थं द्वितीयं सूत्रमिति बोध्यम्। तेन श्लिषः आलिङ्गने एव क्सो भवति इति नियमो भवति। वस्तुतः पुषादिपाठसामर्थ्यादादिपदेन तत्र ग्रहणसामर्थ्याच्च अङ्-क्सयोः परस्मैपदे आलिङ्गनानालिङ्गनविषये सर्वत्र विकल्पे प्राप्ते द्वितीयेन नियमः क्रियते आलिङ्गने एव इति। तेन उपाश्लिषद्, समाश्लिषद् इत्यादौ आलिङ्गनभिन्ने क्स आदेशो न भवति। किञ्च अयं नियमः 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा'[२२] इति परिभाषया 'श्लिषः' इति प्रथमस्यैव नियमः स्यात् न तु 'शल इगुपधादनिटः क्सः' इत्यस्यापि इति वक्तुं न शक्यते। यतो हि योगविभागसामर्थ्यादत्र 'शल इगुपधादनिटः क्सः'

इत्यस्यापि अयं नियमः स्यात्। ननु योगविभागः स्वीक्रियते चेत् 'श्लिषः' इति प्रथमसूत्रेण विधीयमानः क्सः यथा 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यनेन सूत्रेण विहितम् अङादेशं बाधते तथैव 'चिण्भावकर्मणोः' (पा.सू. ३.१.६६) इति सूत्रेण विहितं चिणादेशमपि बाधेत। तेन उपाश्लेषि कन्या देवदत्तेन इति प्रयोगः न स्यात्। अत्रोच्यते 'पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्'[२३] इत्यनया परिभाषया अङादेशमेव बाधते न तु चिणादेशमपि। तदुक्तं महाभाष्यकारेण – 'योगविभागः करिष्यते। श्लिषः। श्लिषः क्सो भवति। किमर्थमिदम्। पुषादिपाठादङ् प्राप्नोति तद्बाधनार्थम्। ततः आलिङ्गने। आलिङ्गने च श्लिषः क्सो भवति। इदमिदानीं किमर्थं स्यात्। नियमार्थम्। श्लिष आलिङ्गने एव। क्व मा भूत्। उपाश्लिषद् जतु च काष्ठं च, समाश्लिषद् ब्राह्मणकुलमिति।'[२४] इति।

### २.४.३ समीक्षणम्

वस्तुतः अत्र 'श्लिष आलिङ्गने' इति सूत्रस्य नियमत्वप्रतिपादनार्थं योगविभागः स्वीकर्तव्यः एव। सिद्धान्तकौमुदीकारेणापि अत्र योगविभागं स्वीकृत्य पृथक्तया पाठः कृतः। तदुक्तं वृत्तौ – 'श्लिषः – अस्मात्परस्यानिटश्च्लेः क्सः स्यात्। पुषाद्यङोऽपवादो न तु चिणः, पुरस्तादपवादन्यायात्। आलिङ्गने – श्लिषश्च्लेरालिङ्गन एव क्सो नान्यत्र।

योगविभागसामर्थ्याच्छल इगुपधाद् इत्यस्याप्ययं नियमः।'[२५] इति। उद्योतटीकायां नागेशभट्टेनापि उक्तं – 'वस्तुतः पुषादिपाठसामर्थ्यादादिपदेन तत्र ग्रहणसामर्थ्याच्चाङ्क्ष्योः परस्मैपदे आलिङ्गनाना-लिङ्गनविषये सर्वत्र विकल्पे प्राप्ते आत्मनेपदे चालिङ्गनानालिङ्गनयोरविशेषेण क्से प्राप्ते द्वितीयेन नियमः – आलिङ्गन एव इति। एवञ्चार्थान्तरे सावकाशोऽङ् आलिङ्गने क्सेन बाध्यते। तस्यैव बाधस्यानुवादो भाष्ये तद्बाधनार्थमिति। न चालिङ्गने क्स एवेति विपरीतनियमापत्तिः। लक्ष्यानुरोधात्प्रत्ययनियमस्यैवाङ्गीकाराद् इत्यूह्यम्। योगविभागसामर्थ्याच्च नियमेन सर्वाङ्गाप्तिबाधः।'[२६]

## २.५. सुपि स्थः (पा.सू. ३.२.४)

सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र सुपि इति सप्तम्यन्तं पदम्। स्थः इति षष्ठ्यन्तं पदम्। 'आतोऽनुपसर्गे कः' (पा.सू. ३.२.३) इति सूत्रात् कः इति प्रथमान्तं विधेयबोधकं पदमनुवर्तते। तेन सूत्रार्थो भवति – सुबन्ते उपपदे तिष्ठतेः कप्रत्ययो भवतीति। उदाहरणं यथा – समे तिष्ठति इति समस्थः, विषमे तिष्ठति इति विषमस्थः इत्यादि।

### २.५.१ आक्षेपः

प्रकृतेऽस्मिन् सूत्रे 'कर्तरि कृत्' (पा.सू. ३.४.६७) इति सूत्रस्य अधिकारो वर्तते। तेन समस्थः विषमस्थः इत्यादौ केवलं कर्तरि एव

कप्रत्ययो भवति। परन्तु आखूनामुत्थानम् आखूत्थः इत्यादौ भावे कप्रत्ययः कथं सिध्यतीति आक्षेपः सुतरामुदेति।

### २.५.२ योगविभागेन समाधानम्

आखूनामुत्थानम् आखूत्थः इत्यादौ भावे कप्रत्ययः कथं सिध्यतीति आक्षेपसमाधानार्थं वार्त्तिककारेण 'योगविभागात्सिद्धम्' इति वार्त्तिकं कृतम्। महाभाष्यकारेणापि अत्र योगविभागं स्वीकृत्य आखूत्थः इत्यादौ भावे कविधानं प्रतिपादितम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'सुपि' इति प्रथमं सूत्रम्। 'स्थः' इति द्वितीयं सूत्रम्। 'सुपि' इति प्रथमसूत्रे 'आतोऽनुपसर्गे कः' इति सूत्रात् आतः, कः चेति पदद्वयमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – सुबन्ते उपपदे आकारान्तेभ्यः धातुभ्यः कप्रत्ययः स्यादिति। द्वाभ्यां पिबतीति द्विपः इत्याद्यत्रोदाहरणम्। 'स्थः' इति द्वितीयसूत्रे 'सुपि' इति प्रथमसूत्रमनुवर्तते। 'आतोऽनुपसर्गे कः' इति सूत्रात् कः इति पदमनुवर्तते। तेन द्वितीयसूत्रस्य अर्थो भवति – सुबन्ते उपपदे तिष्ठतेः कप्रत्ययो भवतीति। तेन आखूनामुत्थानम् आखूत्थः इत्यादौ भावे कप्रत्ययः सिध्यति। योगविभागसामर्थ्यादत्र भावे एव कप्रत्ययः सिध्यति। अन्यथा 'सुपि' इति प्रथमसूत्रेणैव कर्तरि कप्रत्यये सिद्धे योगविभागः व्यर्थः स्यादिति बोध्यम्। किञ्च 'स्थः' इत्यनेन द्वितीयसूत्रेण

अर्थान्तरं न निर्दिश्यते। अर्थात् स्वार्थे एव कप्रत्ययो विधीयते। भाव एव धातूनां स्वार्थः। तेन द्वितीयसूत्रेण भावे एव कप्रत्ययो विधीयते। यद्यपि स्वार्थे कविधानेन भावे कः सिध्यति तथापि 'उपपदमतिङ्' (पा.सू. २.२.१९) इति नित्यसमासार्थमिदम् अपेक्षितम्। अन्यथा पाक्षिकः षष्ठीसमासः स्यात्। किञ्च अनेन भावे विधीयमानः कप्रत्ययः समस्थः इत्यादौ कर्तरि विधीयमानं कप्रत्ययं न बाधते। यतो हि योगविभागसामर्थ्यादत्र भावे कप्रत्ययः सिध्यति, न तु साक्षाद् भावशब्दोपादानेन। एवञ्च योगविभागेनात्र भावे कविधानं सिध्यति। तदुक्तं महाभाष्ये – 'योगविभागः करिष्यते – आतोऽनुपसर्गे कः। आतोऽनुपसर्गे को भवति। ततः – सुपि सुपि चातः को भवति। कच्छेन पिबति कच्छपः। कटाहेन पिबति कटाहपः। द्वाभ्यां पिबति द्विपः। ततः – स्थः स्थश्च सुपि को भवति। किमर्थमिदम्। भावे यथा स्यात्।'[२७] इति।

### २.५.३ समीक्षणम्

आखूनामुत्थानम् आखूत्थः इत्यादौ भावे कप्रत्ययविधानार्थमवश्यमत्र योगविभागः स्वीकर्तव्यः। काशिकाकारेणापि योगविभागः स्वीकृतः। तदुक्तं– 'सुबन्त उपपदे तिष्ठतेः कप्रत्ययो भवति। समस्थः। विषमस्थः। अत्र योगविभागः कर्तव्यः, सुपीति। सुप्याकारान्तेभ्यः कप्रत्ययो भवति।

द्वाभ्यां पिबतीति द्विपः। पादपः। कच्छपः। ततः स्थ इति। स्थश्च सुपि कप्रत्ययो भवति। किमर्थमिदम्? कर्तरि पूर्वयोगः। अनेन भावेऽपि यथा स्यात्। आखूनामुत्त्थानम्, आखूत्त्थः। शलभोत्त्थः।'[२८] इति। सिद्धान्तकौमुदीकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं प्रकृतसूत्रस्य वृत्तौ – 'सुपीति योगो विभज्यते। सुपि उपपदे आदन्तात्कः स्यात्। द्वाभ्यां पिबतीति द्विपः। समस्थः। विषमस्थः। ततः स्थः। सुपि तिष्ठतेः कः स्यात्। आरम्भसामर्थ्याद्भावे। आखूनामुत्थानमाखूत्थः।'[२९] इति। नागेशभट्टेनापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'कच्छेन पिबतीति अकर्मण्युपपदे प्रत्ययार्थं सुपीति योगविभागः इति भावः।'[३०] इति।

## २.६. तौ सत् (पा.सू. ३.२.१२७)

प्रकृतमिदं सूत्रं संज्ञासूत्रमस्ति। सूत्रेणानेन सत् संज्ञा विधीयते। द्विपदात्मकेऽस्मिन् सूत्रे तौ इति प्रथमाद्विवचनान्तं पदम्। सत् इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। 'लटः शतृशानचावप्रथमासमानाधिकरणे' (पा.सू. ३.२.१२४) इति सूत्रोक्तौ शतृशानचौ तौ इत्यनेन परामृश्येते। तेन सूत्रार्थो भवति – तौ शतृशानचौ सत्संज्ञौ भवतः इति। सत्संज्ञायाः प्रयोजनं बहुषु सूत्रेषु दृश्यते। उदाहरणं यथा – ब्राह्मणस्य पश्यन्, ब्राह्मणस्य पक्ष्यमाण इत्यादौ

'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' (पा.सू. २.२.११) इत्यनेन सूत्रेण समासप्रतिषेधः।

**२.६.१ आक्षेपः**

अत्र आक्षेपो भवति यत् प्रकृतसूत्रे तौ इति पदस्य ग्रहणं किमर्थं कृतम् इति। यदि उच्यते तौग्रहणं न क्रियते चेत् धातुमात्रात् सदित्यस्य प्रत्ययस्य विधिरयं स्यात् न तु संज्ञाविधिः, तदर्थं तौग्रहणं कृतम्। इत्यपि वक्तुं न शक्यते यतो हि 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रात् शतृशानचौ इति पदमनुवर्तते। तेन तदनुवृत्तिसामर्थ्यादेव संज्ञाविधिः स्यात् न तु प्रत्ययविधिः, अन्यथा शतृशानचौ इत्यस्य अनन्वयापत्तिः स्यात्। अतः प्रकृतसूत्रे तौग्रहणं किमर्थमिति आक्षेपः वर्तते एव।

ननु लड्वानिकत्वादिधर्मासम्बद्धयोरपि संज्ञा यथा स्यात् तदर्थं तौग्रहणं कृतम्। तथाहि – तौ इति शब्देनात्र शतृशानचोः रूपमात्रं परामृश्यते। तेन 'लृटः सद्वा' (पा.सू. ३.३.१४) इत्यादिसूत्रविहितयोरपि संज्ञा सिध्यति। ननु अस्वरितत्वाद् अनपेक्षणाच्च लड्वानिकत्वादिधर्माः निवर्तन्ते। अतः तौग्रहणं विनापि असंसक्तयोरेव संज्ञा सिध्यति। तर्हि तौग्रहणं किमर्थमिति जिज्ञासा अस्त्येव। अत्रोच्यते यद्यपि लड्वानिकत्वादिधर्माः निवर्तन्ते तथापि वर्तमानकालः अवश्यमुत्तरार्थमनुवर्तनीयः। तेन वर्तमानकालविहितयोरेव

शतृशानचोः सत्संज्ञा स्यात्। भूतभविष्यत्कालविहितयोर्न स्यात्। यतो हि 'वर्तमानसामीप्ये वर्तमानवद्वा' (पा.सू. ३.३.१३१) इति सूत्रबलात् भूतकालेऽपि शतृशानचौ भवतः। ननु अत्र भूतभविष्यत्कालविहितयोः शतृशानचोः सत्संज्ञा तु स्वत एव सिध्यति। तथाहि 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यतिदेशात् प्रत्ययवत्संज्ञापि अतिदेशेनैव सिद्धा। तस्यापि वर्तमानाधिकारे विहितत्वात्। 'लृटः सद्वा' इति वचनादेव भविष्यदर्थयोरपि शतृशानचोः सत्संज्ञा सिद्धा। तर्हि असंसक्तयोः संज्ञाविधानार्थं तौग्रहणमिति किमर्थमुच्यते। अत्र समाधानमुच्यते 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यतिदेशात् शतृशानचोः भूते विधानमेव स्यात्, न तु संज्ञा। यतो हि प्रत्ययाधिकारादत्र प्रत्यय एव अतिदिश्यते, न तु संज्ञा। यतो हि अत्र संज्ञायाः अधिकारः नास्ति। किञ्च 'लृटः सद्वा' इत्यनेन सच्छब्देन विधानात् तद्विहितयोः सत्संज्ञा सिद्धा इत्यपि वक्तुं न शक्यते। यतो हि 'लृटः सद्वा' इति सत्संज्ञकप्रतिरूपकयोर्विधानं स्यात्। अर्थात् सत्संज्ञकसदृशयोरेव विधानं स्यात्, न तु सत्संज्ञकसहितयोः। यथा 'पिष्टपिण्डाः सिंहाः क्रियन्ताम्' इत्यादौ तदाकाराः क्रियन्ते न तु सिंहत्वजातियोगः। विहितयोस्तु शतृशानचोः सत्संज्ञानिबन्धनकार्याप्रसङ्गः एव। अतः असंसक्तयोः संज्ञाविधानार्थं तौग्रहणं कर्तव्यम्। अन्यथा असति तौग्रहणे

लड्वानिकौ वर्तमानकालौ यादृशौ शतृशानचौ उक्तौ तादृशयोरेव संज्ञा स्यात्। लृडादेशयोर्न स्यात्। यतो हि विहितयोस्तूत्तरकालं संज्ञा न भवति। तेन ब्राह्मणस्य पक्ष्यन्, ब्राह्मणस्य पक्ष्यमाण इत्यादौ 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' इत्यनेन समासप्रतिषेधो न स्यात्, तस्यां दशायां सत्संज्ञाया अभावात्। अतः असंसक्तयोः सत्संज्ञाविधानार्थं तौग्रहणमावश्यकम्।

तर्हि अत्र पुनः आक्षेपः भवति यत् तौग्रहणं क्रियते चेदपि कथम् असंसक्तयोः लड्वानिकत्वादिधर्मासम्बद्धयोः कालान्तरविहितयोः शतृशानचोः सत्संज्ञा सिद्धा। यतो हि सन्निहितगुणविशिष्टस्यैव वस्तुनः सर्वनाम्ना परामर्शो भवति तादृशस्यैव बुद्धिस्थत्वात्। यद्यपि अनुवृत्या प्रकृतयोः संज्ञासिद्धौ तौग्रहणं क्रियते तथापि तौग्रहणम् असंसक्तयोः प्रतिपादने नालं, वाच्यवृत्त्या तदर्थाप्रतीतेः। अतः तौग्रहणेन असंसक्तयोः शतृशानचोः सत्संज्ञा कथं सिध्यति इति आक्षेपः तिष्ठत्येव।

### २.६.२ योगविभागेन समाधानम्

तौग्रहणेन असंसक्तयोः शतृशानचोः सत्संज्ञा कथं सिध्यति इति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। योगविभागे सति अभिमतोऽर्थः शब्देनैव लभ्यते। तथाहि – योगविभागः

क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'तौ' इति प्रथमं सूत्रम्। 'सत्' इति द्वितीयं सूत्रम्। प्रथमसूत्रस्य अर्थो भवति – तौ एतौ शतृशानचौ धातुमात्रात्परस्य प्रत्ययस्य भवतः इति। द्वितीयसूत्रस्यार्थो भवति – तौ शतृशानचौ सत्संज्ञौ भवतः इति। तदुक्तं महाभाष्यकारेण – 'सद् इति योगे क्रियमाणे तौ ग्रहणं योगाङ्गमुपजायते। सति च योगाङ्गे योगविभागः करिष्यते। 'तौ' तावेतौ शतृशानचौ धातुमात्रात्परस्य प्रत्ययस्य भवतः। ततः 'सत्'। सत्संज्ञौ भवतः शतृशानचाविति।'[३१] इति। ननु स्थानिनिर्देशाभावात् प्रत्ययाधिकाराच्च 'तौ' इत्यनेन प्रत्ययविधानमेव स्यात्, न त्वादेशविधानम्। किञ्च प्रत्ययस्य इति च कथं लब्धम् इति चेदुच्यते – पूर्वसूत्रे तयोः आदेशत्वात् इहापि आदेशयोरेव विधानम्। किञ्च प्रत्ययप्रकरणात् प्रत्ययस्येति लब्धम्। अर्थात् अनुवर्तमानं प्रत्ययपदं 'तस्मादित्युत्तरस्य' (पा.सू. १.१.६७) इति वचनात् षष्ठ्या विपरिणम्यते इत्यर्थः।

### २.६.३ समीक्षणम्

वस्तुतः तौग्रहणसामर्थ्यादेव विशेषणांशपरित्यागेन असंसक्तयोः शतृशानचोः रूपमात्रं परामृश्यते इति स्वीकृत्य अत्र समाधानं कर्तुं शक्यते। अत्र काशिकाकारेण योगविभागः न स्वीकृतः। तौग्रहणेनैव असंसक्तयोः

शतृशानचोः ग्रहणं भवतीति स्वीकृतम्। तदुक्तं काशिकाकारेण – 'तौग्रहणमुपाध्यसंसर्गार्थम्। शतृशानज्मात्रस्य संज्ञा भवति।'[३२] इति। नागेशभट्टेनापि अत्र योगविभागः न स्वीकृतः। तदुक्तं तेन – 'अनुवृत्त्यैव सिद्धे तौग्रहणं शतृशानज्मात्रग्रहणार्थम्। तेन द्विषन्, द्वेक्ष्यमाणः इत्यादावपि पूरणगुणेति निषेधः।'[३३] इति। भट्टोजिदीक्षितेनापि अत्र योगविभागः न स्वीकृतः। अतः अत्र असंसक्तयोः शतृशानचोः ग्रहणार्थं योगविभागस्य आवश्यकता नास्ति, योगविभागं विनापि तयोर्ग्रहणसम्भवात्।

### २.७. लृट् शेषे च (पा.सू. ३.३.१३)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र लृट् इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। शेषे इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययपदम्। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (पा.सू. ३.३.१०) इति सूत्रात् क्रियायां क्रियार्थायाञ्चेति पदद्वयम् अनुवर्तते। 'भविष्यति गम्यादयः' (पा.सू. ३.३.३) इति सूत्रात् भविष्यति इति पदमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – भविष्यति क्रियायां क्रियार्थायां शेषे च लृट् इति। सूत्रार्थो भवति – भविष्यदर्थाद्धातोः लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्याञ्च इति। क्रियार्थायां क्रियायां सत्याम् उदाहरणं यथा – करिष्यामि इति व्रजति,

हरिष्यामि इति व्रजति इत्यादि। क्रियार्थायां क्रियायामसत्याम् अर्थात् शुद्धे भविष्यति काले उदाहरणं यथा – करिष्यति, हरिष्यति इत्यादि।

**२.७.१ आक्षेपः**

प्रकृतसूत्रे शेषे इति पदस्य ग्रहणं किमर्थं कृतम् इति आक्षेपो भवति। यतो हि 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति सूत्रात् क्रियायां क्रियार्थायां चेति पदद्वयस्य अनुवृत्तिः न भवति इति स्वीकृत्य केवलं 'लृट्' इति सूत्रं क्रियते चेदेव क्रियार्थायां क्रियायामुपपदे सत्याम् असत्याञ्च उभयत्र लृटः विधानं सिध्यति। अत्रोच्यते यदि क्रियायां क्रियार्थायां चेति पदद्वयस्य अनुवृत्तिः न स्वीक्रियते तर्हि केवलं शुद्धे भविष्यति काले एव लृट् सिध्यति, क्रियायां क्रियार्थायामुपपदे लृट् न सिध्यति। यतो हि 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति सूत्रेण लृटः बाधः स्यात्। तेन क्रियार्थायां क्रियायामसत्याम् अर्थात् शुद्धे भविष्यति काले करिष्यति, हरिष्यति इत्यादौ लृट् भवति। परन्तु करिष्यामि इति व्रजति, हरिष्यामि इति व्रजति इत्यादौ क्रियायां क्रियार्थायामुपपदे लृट् न सिध्यति। अतः क्रियार्थायां क्रियायामुपपदे लृटः विधानार्थं प्रकृतसूत्रे शेषे इति पदस्य ग्रहणं कृतम्।

ननु शेषपदस्य अर्थः भवति उक्तादन्यः इति। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति सूत्रेण क्रियायां क्रियार्थायाम् इति अर्थात्

क्रियार्थोपपदमत्र उक्तम्। ततोऽन्यः अर्थात् क्रियार्थोपपदादन्यः, शुद्धः भविष्यत्कालः अत्र शेषपदेन गृह्यते। तर्हि क्रियार्थायां क्रियायामुपपदे लृटः विधानार्थं प्रकृतसूत्रे शेषे इति पदस्य ग्रहणं कृतम् इति कथमुच्यते। अर्थात् शेषपदग्रहणेनापि क्रियार्थायां क्रियायामुपपदे लृटः विधानं न सिध्यति। अतः प्रकृतसूत्रे शेषे इति पदस्य ग्रहणं किमर्थं कृतम् इति आक्षेपः तिष्ठत्येव। किञ्च क्रियार्थायां क्रियायामुपपदे सत्याम् असत्याञ्च उभयत्र लृटः विधानं कथं सिध्यति इत्यपि आक्षेपो भवति।

### २.७.२ योगविभागेन समाधानम्

अत्र शेषपदग्रहणेनापि क्रियार्थायां क्रियायामुपपदे लृटः विधानं न सिध्यति। अतः शेषपदग्रहणसामर्थ्यादत्र योगविभागः स्वीक्रियते। योगविभागेन अत्र क्रियार्थायां क्रियायामुपपदे सत्याम्, असत्यामुभयत्र च लृटः विधानं सिध्यति। तथाहि – योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'लृट्' इति प्रथमं सूत्रम्। 'शेषे' इति द्वितीयं सूत्रम्। प्रथमसूत्रस्यार्थो भवति – भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायामुपपदे सत्याम् इति। तेन करिष्यामि इति व्रजति, हरिष्यामि इति व्रजति इत्यादौ क्रियार्थायां क्रियायामुपपदे सत्यां लृट् सिध्यति। द्वितीयसूत्रस्य अर्थो भवति – शेषे अर्थात् शुद्धे भविष्यति काले लृट्

भवतीति। तेन करिष्यति, हरिष्यति इत्यादौ शुद्धे भविष्यति काले लृट् सिध्यति। तदुक्तं महाभाष्यकारेण – 'इह लृड् भवति इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत् शेषग्रहणं करोति तस्यैतत्प्रयोजनं – योगाङ्गं यथा विज्ञायेत। सति च योगाङ्गे योगविभागः करिष्यते – लृट्। लृट् भवति क्रियायामुपपदे क्रियार्थायामिति। ततः शेषे। शेषे च लृड् भवति इति।'[३४]

## २.७.३ समीक्षणम्

वस्तुतः अत्र 'लृट् शेषे च' इति चकारसहितः पाठः स्वीक्रियते चेत् योगविभागस्य आवश्यकता नास्ति। यतो हि चकारेण क्रियार्थायां क्रियायामुपपदे इति परामृश्यते। तेन क्रियार्थायां क्रियायामुपपदे सत्याम्, असत्याञ्च उभयत्र लृट् सिध्यति। तदुक्तं बालमनोरमाकारेण – 'चकारात् क्रियार्थायां क्रियायां सत्याम् इत्यपि लभ्यते।'[३५] इति। काशिकाकारेणापि अत्र चकारात् क्रियार्थायां क्रियायामुपपदे इत्यर्थः स्वीकृतः। तदुक्तं तेन – 'शेषः क्रियार्थोपपदादन्यः। शेषे शुद्धे भविष्यति काले, चकारात् क्रियायां चोपपदे क्रियार्थायां धातोर्लृट् प्रत्ययो भवति।'[३६] इति। चकारसहितः पाठः वार्त्तिककारेण स्वीकृतः। महाभाष्यकारेण तु चकाररहितः पाठः स्वीकृतः। किञ्च योगविभागेन उभयत्र लृटः विधानं प्रतिपादितम्। उक्तञ्च नागेशेन – 'लृट् शेषे इति चरहितः पाणिनेः पाठः इति भाष्यस्वरसः। तत्र

योगविभागः– लृट् इति। अत्र क्रियार्थायामित्याद्यनुवर्तते। शेषे इति अक्रियार्थोपपदार्थम्। न च क्रियार्थेत्यादिनिवृत्त्यैव सिद्धे शेषग्रहणं व्यर्थं, भावकर्त्रोस्तुमुन्ण्वुल्भ्यां लृटो बाधाऽभावाय तत्। न च वासरूपविधिना तत्सिद्धिः, तुमुन्ण्वलौ इति सूत्रे ण्वुल्ग्रहणेन क्रियार्थायां क्रियायामुपपदे वासरूपविधिना प्रत्ययान्तराऽभावज्ञापनस्य भाष्ये उक्तत्वात्।'[३७] इति।

## २.८. अनद्यतने लुट् (पा.सू. ३.३.१५)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र अनद्यतने इति सप्तम्येकवचनान्तं पदम्। लुट् इति प्रथमैकवचनान्तं पदम्। 'भविष्यति गम्यादयः' (पा.सू. ३.३.३) इति सूत्रात् भविष्यति इति पदमनुवर्तते। तेन सूत्रार्थो भवति – भविष्यदनद्यतनेऽर्थे वर्तमानाद् धातोर्लुट् प्रत्ययो भवतीति। उदाहरणं यथा– श्वःकर्ता, श्वो भोक्ता इत्यादि।

### २.८.१ आक्षेपः

श्वोऽग्नीनाधास्यमानेन, श्वः सोमेन यक्ष्यमाणेन इत्यादौ अनद्यतने लृटः स्थाने सत्संज्ञकौ प्रत्ययौ कथं भवतः इति आक्षेपः भवति। यतो हि अनद्यतने लृटः स्थाने सत्संज्ञकप्रत्ययविधायकं किमपि सूत्रं नास्ति। किञ्च अनद्यतने भविष्यति लृट् प्रत्ययो वा कथं भवतीत्यपि आक्षेपो भवति। यतो हि अनद्यतने भविष्यति लृट्-प्रत्ययविधायकं किमपि सूत्रं नास्ति। अतः

श्वोऽग्नीनाधास्यमानेन, श्वः सोमेन यक्ष्यमाणेन इत्यादयः प्रयोगाः कथं सिध्यन्तीति आक्षेपः सुतरामुदेति।

### २.८.२ योगविभागेन समाधानम्

श्वोऽग्नीनाधास्यमानेन, श्वः सोमेन यक्ष्यमाणेन इत्यादयः प्रयोगाः कथं सिध्यन्तीति आक्षेपसमाधानार्थं वार्त्तिककारेण 'योगविभागः' इति वार्त्तिकं स्वीकृतम्। महाभाष्यकारेणापि अत्र अनद्यतने लृटः स्थाने सत्संज्ञकौ प्रत्ययौ यथा स्यात् तदर्थम् 'अनद्यतने लुट्' इति सूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'अनद्यतने' इति प्रथमं सूत्रम्। 'लुट्' इति द्वितीयं सूत्रम्। 'अनद्यतने' इति प्रथमसूत्रे 'लृटः सद्वा' (पा.सू. ३.३.१४) इति सूत्रात् लृटः सत् चेति पदद्वयमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – अनद्यतने लृटः स्थाने सत्संज्ञकौ भवतः इति। तेन श्वोऽग्नीनाधास्यमानेन, श्वः सोमेन यक्ष्यमाणेन इत्यादयः प्रयोगाः सिध्यन्ति। किञ्च योगविभागसामर्थ्यादेव अनद्यतने लृट् भवतीति ज्ञायते। अन्यथा योगविभागं कृत्वा अनद्यतने लृटः स्थाने सत्संज्ञकप्रत्ययविधानं व्यर्थं स्यात्। 'लुट्' इति द्वितीयसूत्रे 'भविष्यति गम्यादयः' इति सूत्रात् भविष्यति इति पदमनुवर्तते। किञ्च 'अनद्यतने' इति प्रथमसूत्रमप्यनुवर्तते। तेन द्वितीयसूत्रार्थो भवति – भविष्यत्यनद्यतने लुट्

स्यादिति। तेन श्वः कर्ता, श्वो भोक्ता इत्यादयः प्रयोगाः सिध्यन्ति। तदुक्तं महाभाष्ये – 'योगविभागः कर्तव्यः – अनद्यतने। अनद्यतने लृटः सत्संज्ञौ भवतः। श्वोऽग्नीनाधास्यमानेन। श्वः सोमेन यक्ष्यमाणेन। ततः लुट्। लुट् च भवत्यनद्यतने। श्वः कर्ता। श्वोध्येता।'[३८] इति।

### २.८.३ समीक्षणम्

वस्तुतः 'अनद्यतने लुट्' इति सूत्रे योगविभागं विनापि श्वोऽग्नीनाधास्यमानेन, श्वः सोमेन यक्ष्यमाणेन इत्यादयः प्रयोगाः सिध्यन्ति। यतो हि एते प्रयोगाः केवलं वेदे एव दृश्यन्ते। अतः 'व्यत्ययो बहुलम्' (पा.सू. ३.१.८५) इति सूत्रबलादत्र कालव्यत्ययं स्वीकृत्य अनद्यतने लृट् भविष्यति। तेन योगविभागं विनापि एतेषां वैदिकप्रयोगानां साधुत्वं प्रतिपादयितुं शक्यते। अतः अत्र योगविभागः नावश्यकः। काशिकाकारेण, भट्टोजिदीक्षितेन चात्र योगविभागः न स्वीकृतः।

## २.९. क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः (पा.सू. ३.४.२)

अस्मिन् सूत्रे सप्तपदानि सन्ति। क्रियासमभिहारे इति सप्तम्यन्तं पदम्। लोट् इति प्रथमान्तं पदम्। लोटः इति षष्ठ्यन्तं पदम्। हिस्वौ इति प्रथमाद्विवचनान्तं पदम्। वा इति अव्ययपदम्। च इत्यपि अव्ययपदम्। तध्वमोः इति षष्ठीद्विवचनान्तं पदम्। 'धातुसम्बन्धे प्रत्ययाः' (पा.सू.३.४.१)

इति सूत्रात् धातुसम्बन्धे इति पदमनुवर्तते। सूत्रमिदं 'धातोः' (पा.सू.३.१.९१) इत्यधिकारे वर्तते। तेन धातोः इत्यपि आगच्छति। क्रियासमभिहारः इति पदं पौनःपुन्ये भृशार्थे वा व्यवह्रियते। क्रियासमभिहारे इति पदं धात्वर्थविशेषणम्। तेन सूत्रार्थो भवति – समभिहारविशिष्टक्रियावचनाद् धातोः लोट् भवति, तस्य च लोटो हि स्व इत्येतौ आदेशौ भवतः, तध्वम्भाविनस्तु वा भवतः इति। प्रकृतसूत्रेण विहितः लोट् प्रत्ययः सर्वलकारापवादः अस्ति।

**२.९.१ आक्षेपः**

ननु लोटः स्थाने हिस्वौ भविष्यतः, इत्युक्ते हेः परस्मैपदत्वं, स्वादेशस्य त्वात्मनेपदत्वम् इति व्यवस्था कथं सिध्यति। यतो हि हिस्वयोरुभयोरपि 'लः परस्मैपदम्' (पा.सू. १.४.९९) इति लादेशत्वात्परस्मैपदत्वं स्यात्। यतो हि अस्य स्वादेशस्य तङ्प्रत्याहारप्रविष्टत्वाभावेन 'तङानावात्मनेपदम्' (पा.सू. १.४.१००) इति सूत्रेण आत्मनेपदसंज्ञा न स्यात्। किञ्च परत्वात् लोटः स्थाने परस्मैपदात्मनेपदेषु कृतेषु स्थानिवद्भावेन तेषामेव एतौ हिस्वौ भविष्यतः इत्यपि वक्तुं न शक्यते, यतो हि हिस्वाभ्यां सामान्यविहितानां तिङां शतृशानज्भ्यामिव बाधः स्यात्। अपि च यदि हिस्वौ लादेशौ भवतः तर्हि 'सुप्तिङन्तं पदम्' (पा.सू. १.४.१४) इत्यनेन तदन्तस्य पदसंज्ञा न

सिध्यति। यतो हि हिस्वौ न तिङन्तःपातिनौ, अपि तु शतृशानचाविव अपूर्वादेशौ। ननु लकारः 'कृदतिङ्' (पा.सू. ३.१.९३) इत्यनुसारं कृत्संज्ञकः अस्ति। तर्हि तदादेशयोः हिस्वयोरपि स्थानिवद्भावेन कृत्त्वात् तदन्तस्य प्रातिपदिकसंज्ञा सिध्यति। तेन प्रातिपदिकत्वात् स्वाद्युत्पत्तिर्भविष्यति। तेन सुबन्तत्वात् 'सुप्तिङन्तं पदम्' इत्यनेन पदसंज्ञा स्यात्। किञ्च सुबन्तत्वात् पदत्वस्वीकारे सुपां श्रवणं स्यादित्यपि वक्तुं न शक्यते, 'अव्ययादाप्सुपः' (पा.सू. २.४.८२) इति सुब्लुक् भविष्यति। यतो हि 'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च' इति गणसूत्रबलात् हिस्वान्तस्य विभक्त्यन्तप्रतिरूपकत्वादव्ययत्वं सिध्यति। अत्र यद्यपि सुबन्तत्वात् पदत्वं भवेत्, तथापि तिङन्तत्वं न सिध्यति। तेन तिङन्तत्वाभावात् 'तिङ्ङतिङः' (पा.सू. ८.१.२८) इति सूत्रेण निघातो न भवेत्। तथाहि – स भवान् लुनीहि लुनीहि लुनाति इत्यादौ प्रथमस्य लुनीहि इति पदस्य निघातो न स्यात्। अर्थात् लुनीहि इत्यस्य सुबन्तत्वेन पदत्वेऽपि तिङन्तत्वाभावात् तिङन्तोद्देश्यकनिघातो न सिध्यति। ननु लुनीहि लुनीहि इत्यादौ द्विवचनं किमर्थं यतो हि क्रियासमभिहारविशिष्टक्रियाभिधायिनः धातोः लोट् भवति, तेन धातुनैव क्रियासमभिहारः अवगमितः। इति जिज्ञासायामुच्यते – यद्यपि धातुनैव क्रियासमभिहारोऽवगमितः तथापि तस्य या अभिव्यक्तिः सा

लोट्लकारेणैव क्रियते, न तु धातुना। लोट्लकारश्च द्विर्वचनसहित एव तां कर्तुं समर्थो भवति, न केवलः, तत्र तस्याविधानात्। लोट्लकारः 'लः कर्मणि च भावे चाकर्मकेभ्यः' (पा.सू. ३.४.६९) इत्यनेन सूत्रेण कर्मादिषु विधीयते, न तु क्रियासमभिहारे। अतः तदभिव्यक्तौ कर्तव्यायां लोट् स्वयमसमर्थ इति द्विर्वचनमपेक्षते। यङ् प्रत्ययो हि क्रियासमभिहारे एव विधीयते। तेनासौ तत्र विधीयमानस्तदभिव्यक्तौ स्वयमेव समर्थ इति नापेक्षते द्विर्वचनम्। तेन तदन्तस्य द्विर्वचनं न भवतीति बोध्यम्। अतः हेः परस्मैपदत्वं, स्वादेशस्य त्वात्मनेपदत्वम् इति व्यवस्था कथं सिध्यतीति आक्षेपः सुतरामुदेति। किञ्च हिस्वान्तस्य तिङन्तत्वं च कथं सिध्यति इत्यपि आक्षेपो भवति।

## २.९.२ योगविभागेन समाधानम्

अत्र आक्षेपसमाधानार्थं वार्त्तिककारेण 'योगविभागात्सिद्धम्' इति वार्त्तिकं स्वीकृतम्। महाभाष्यकारेणापि अत्र योगविभागः स्वीकृतः। तथाहि– योगविभागः स्वीक्रियते चेत् सूत्रत्रयं सम्पद्यते। तत्र प्रथमं सूत्रं हि 'क्रियासमभिहारे लोट्' इति। द्वितीयं सूत्रं हि 'लोटो हिस्वौ' इति। तृतीयं सूत्रं तावत् 'वा च तध्वमोः' इति। प्रथमसूत्रार्थो भवति क्रियासमभिहारे लोट् भवति इति। 'लोटो हिस्वौ' इति द्वितीयसूत्रे 'क्रियासमभिहारे लोट्' इति

प्रथमसूत्रात् लोट् इति प्रथमान्तं पदमनुवर्तते। अनुवर्तमानं लोट् इति पदं हिस्वावित्यस्य विशेषणम्। तेन लोटो लोटौ हिस्वौ इति द्वितीयसूत्रस्य स्वरूपं भवति। तेन द्वितीयसूत्रार्थो भवति लोडादेशौ यौ हिस्वौ तत्तुल्यौ हिस्वौ अनेन भवतः इति। अत्र हिस्वौ लोटौ भवत इति सामर्थ्याल्लोटधर्मकौ हिस्वौ इत्यर्थः न स्वीकरणीयः। यतो हि मुख्यलोट्सम्बन्धिनो धर्मस्य प्रत्ययत्वस्य अतिदेशो व्यर्थः, स्थानिवत्त्वेनैव तत्सिद्धेः। अपि तु अत्र स्थानिवद्भावलब्धलोड्व्यपदेशकौ तिङ्गतौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यते। अत्र तदीयकार्यातिदेशात् हिस्वयोः परस्मैपदात्मनेपदसंज्ञे भवतः। अतः परस्मैपदिभ्यो हिः तथा आत्मनेपदिभ्यः स्वः भवतीति इष्टा व्यवस्था सिध्यति। किञ्च हिस्वान्तयोः तिङन्तत्वमपि सिध्यति। पुरुषैकवचनसंज्ञे तु सामर्थ्यान्न भवतः। यदि ते अपि स्यातां तर्हि तयोः अनेन विधानमनर्थकं स्यात्। यतो हि पुरुषादिसंज्ञायां युष्मत्सामानाधिकरण्येनैकत्वेन च भाव्यमिति तत्र तयोः विधिः व्यर्थः। 'वा च तध्वमोः' इत्यत्र मुख्यार्थस्य असम्भवे गौणकल्पना आश्रीयते। अर्थात् तध्वम्भावित्वात् लोडेव तध्वंशब्दाभ्यामुच्यते इति बोध्यम्। तदुक्तं महाभाष्यकारेण – 'योगविभागः करिष्यते – 'क्रियासमभिहारे लोट्' क्रियासमभिहारे लोड् भवति। ततो 'लोटो हिस्वौ', लोटो हिस्वौ भवतः।

लोडित्येवानुवर्तते लोटौ यौ हिस्वाविति । कथम् 'वा च तध्वमोः' इति। वा च तध्वंभाविनो लोट इत्येवमेतद् विज्ञायते'[३९] इति।

### २.९.३ समीक्षणम्

वस्तुतः अत्र योगविभागः आवश्यकः। अन्यथा स्वादेशोऽपि केवलं परस्मैपदिभ्य एव स्यात्। अतः हेः परस्मैपदत्वं, स्वादेशस्य त्वात्मनेपदत्वम् इति व्यवस्थाप्रतिपादनार्थं योगविभागः स्वीकर्तव्यः। किञ्च 'तिङ्ङतिङः' इति सूत्रेण हिस्वान्तस्य निघातो यथा स्यात् तदर्थमपि योगविभागः आवश्यकः। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं काशिकायां – 'योगविभागोऽत्र कर्तव्यः। क्रियासमभिहारे लोड् भवति। ततो लोटो हिस्वौ। लोडित्येव। लोड्धर्माणौ हिस्वौ भवत इत्यर्थः। तेनात्मनेपदपरस्मैपदत्वं भेदेनावतिष्ठते, तिङ्ं च द्वयोरपि भवति।'[४०] इति।

### २.१०. युष्मदस्मदोरन्यतरस्यां खञ् च (पा.सू. ४.३.१)

प्रकृतसूत्रे चत्वारि पदानि सन्ति। तत्र युष्मदस्मदोः इति षष्ठीद्विवचनान्तं पदम्। अत्र पञ्चम्यर्थे षष्ठीविभक्तिः अस्ति। अन्यतरस्याम् इति सप्तम्येकवचनान्तं पदम्। खञ् इति प्रथमान्तं विधेयबोधकं पदम्। च इति अव्ययपदम्। अस्मिन् सूत्रे 'गर्तोत्तरपदाच्छः' (पा.सू. ४.२.१३७) इति सूत्रात् छः इति पदमनुवर्तते। तेन सूत्रार्थो भवति –

युष्मच्छब्दादस्मच्छब्दाच्च जाताद्यर्थेषु खञ् स्यादिति। अत्र चकारेण गर्तोत्तरपदादित्यधिकृतः छः समुच्चीयते। अतः युष्मदस्मदोः छप्रत्ययोऽपि भवति। किञ्च सूत्रे अन्यतरस्याम् इति ग्रहणात् पक्षे 'प्राग्दीव्यतोऽण्' (पा.सू. ४.१.८३) इति सामान्यसूत्रेण यथाप्राप्तम् अण् प्रत्ययोऽपि भवति। एवञ्चात्र युष्मच्छब्दादस्मच्छब्दाच्च त्रयः प्रत्ययाः विधीयन्ते। 'त्यदादीनि च' (पा.सू. १.१.७४) इत्यनेन सूत्रेण युष्मच्छब्दस्य अस्मच्छब्दस्य च वृद्धसंज्ञा भवति। यतो हि युष्मच्छब्दः तथा अस्मच्छब्दः त्यदादिगणे पठितः। त्यदादित्वाद् वृद्धसंज्ञकयोर्युष्मदस्मदोः 'वृद्धाच्छः' (पा.सू. ४.२.११४) इत्यनेन सूत्रेण नित्ये छे प्राप्ते प्रत्येकं प्रत्ययत्रयं विधीयते प्रकृतसूत्रेण। उदाहरणं यथा – यौष्माकीणः, आस्माकीनः, युष्मदीयः, अस्मदीयः, यौष्माकः, आस्माकः इत्यादि।

**२.१०.१ आक्षेपः**

प्रकृतसूत्रे अन्यतरस्याम् इति पदस्य ग्रहणेन पक्षे खञ्छयोः प्रत्यययोः अनुत्पत्तिः प्रतिपाद्यते। एवञ्च खञ्छयोः प्रत्यययोः अनुत्पत्तिपक्षे अपवादाभावात् 'प्राग्दीव्यतोऽण्' इत्यनेन सामान्यसूत्रेण अण् प्रत्ययो भवति। प्रकृतसूत्रेण तु केवलं खञ्छयोः प्रत्यययोः विधानं भवति। एवञ्चात्र प्रकृतिप्रत्यययोः यथासंख्यत्वमस्ति। यथासंख्यन्यायेन च युष्मच्छब्दात्

खञ्प्रत्ययः स्यात् तथा अस्मच्छब्दात् छप्रत्ययः स्यात्। अर्थात् युष्मच्छब्दात् छप्रत्ययः न स्यात्, तथा अस्मच्छब्दात् खञ्प्रत्ययः न स्यात्। अतः अत्र आक्षेपो भवति यत् प्रकृतिप्रत्यययोः यथासंख्यत्वं कथं निवार्यते इति।

### २.१०.२ योगविभागेन समाधानम्

अत्र प्रकृतिप्रत्यययोः यथासंख्यत्वनिरासाय वार्त्तिककारेण 'युष्मदस्मद्भ्यां प्रत्ययविधाने योगविभागः' इति वार्त्तिकं स्वीकृतम्। महाभाष्यकारेणापि अत्र योगविभागेन यथासंख्यप्रतिषेधः क्रियते। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'युष्मदस्मदोरन्यतरस्याम्' इति प्रथमं सूत्रम्। 'खञ्च' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रे 'गर्तोत्तरपदाच्छः' इति सूत्रात् छः इत्यनुवर्तते। तेन प्रथमसूत्रार्थो भवति युष्मच्छब्दादस्मच्छब्दाच्च विकल्पेन छप्रत्ययो भवतीति। तेन छप्रत्यये युष्मदीयः, अस्मदीयः इत्येतयोः सिद्धिर्भवति। 'त्यदादीनि च' इत्यनेन सूत्रेण वृद्धत्वान्नित्ये प्राप्ते अनेन विकल्पेन छप्रत्ययो विधीयते। पक्षे अणप्रत्ययोऽपि भवति। तेन अणप्रत्यये यौष्माकः, आस्माकः इत्येतयोः सिद्धिर्भवति। 'खञ्च' इति द्वितीयसूत्रस्यार्थो भवति – युष्मदस्मदोः खञ्प्रत्ययो भवतीति। तेन खञ्प्रत्यये यौष्माकीणः, आस्माकीनः इत्येतयोः

सिद्धिर्भवति। तदुक्तं महाभाष्ये – 'युष्मदस्मद्भ्यां प्रत्ययविधाने योगविभागः कर्तव्यः। युस्मदस्मदोरन्यतरस्याम्। छो भवति। युष्मदीयः, अस्मदीयः। ततः खञ्च। खञ्च भवति युष्मदस्मदोरन्यतरस्याम्। यौष्माकीणः, आस्माकीनः।'[४१] इति।

## २.१०.३ समीक्षणम्

यदि अन्यतरस्याम् इति पदस्य ग्रहणं यथाप्राप्तस्य अणप्रत्ययस्य अभ्यनुज्ञानं करोति, विधानं तु 'प्राग्दीव्यतोऽण्' इत्यनेन स्वशास्त्रेणैव भवतीति स्वीकृत्य यथासंख्यं प्रतिपादयति तर्हि छप्रत्ययस्य विधानमपि 'वृद्धाच्छः' इति स्वशास्त्रेणैव भवति इति वक्तव्यम्। यतो हि अत्र चकारोऽपि छविधानस्य अभ्यनुज्ञापक इति स्वीकर्तव्यम्। एवञ्च प्रकृतसूत्रेण केवलं खञ्प्रत्ययस्य विधानं कृतमिति स्वीकर्तव्यम्। तेन अत्र प्रकृतिद्वयमस्ति, प्रत्ययश्च एक एव अस्ति। अतः प्रकृतिप्रत्यययोः वैषम्यमस्त्येव। सर्वथा नास्ति यथासंख्यप्रसङ्गः। अतः यथासंख्यत्वनिरासाय योगविभागः न कर्तव्यः इति चेत् अत्रोच्यते – प्रकृतसूत्रे चकारेण छप्रत्ययस्य अनुकर्षणं क्रियते, अतः खञ्छौ तथा खञ्च इति समानमेव। एवञ्च सिद्धोऽपि छप्रत्ययः प्रकृतसूत्रेणैवाबाधाय समुच्चयार्थेन चकारेणानुकृष्य विधीयते। अतः अत्र प्रत्ययद्वयस्य विधानात् खञ्छयोः युष्मदस्मदोश्च संख्यासाम्याद्

यथासंख्यमस्त्येव। अतः अत्र योगविभागः आवश्यकः। काशिकाकारेण अत्र योगविभागः न स्वीकृतः। तदुक्तं काशिकायां – 'युष्मदस्मदोः खञ् प्रत्ययो भवति शैषिकः। चकाराच् छश्च। अन्यतरस्यांग्रहणाद् यथाप्राप्तम्। तदेते त्रयः प्रत्यया भवन्ति, तत्र वैषम्याद् यथासंख्यं न भवति। त्यदादित्वाद् वृद्धसंज्ञकयोर्युष्मदस्मदोश्छे प्राप्ते प्रत्येकं प्रत्ययत्रयं विधीयते। यौष्माकीणः। आस्माकीनः। युष्मदीयः। अस्मदीयः। यौष्माकः। आस्माकः।'[४२] इति। तत्त्वबोधिनीकारेणात्रोक्तं – 'त्यदादीनि चे'ति वृद्धत्वान्नित्ये छे प्राप्ते खञणोरपि विधानार्थमिदम्। पक्षे अणिति। अन्यतरस्याङ्ग्रहणादिति भावः। तथा चैते त्रयः प्रत्यया इति वैषम्याद्यथासङ्ख्यं न भवतीति केचित्। मनोरमायां तु यथासङ्ख्यनिवारणाय योगविभागः कृतः। तथा हि 'युष्मदस्मदोरन्यतरस्याम्'। आभ्यां छो वा स्यात्। 'त्यदादीनि चे'ति वृद्धत्वान्नित्ये छे प्राप्ते विकल्पोऽयम्। ततः खञ्च।'[४३] इति।

### २.११. तस्मिन्नणि च युष्माकास्माकौ (पा.सू. ४.३.२)

अस्मिन् सूत्रे चत्वारि पदानि सन्ति। तस्मिन् इति सप्तम्येकवचनान्तं पदम्। अणि इत्यपि सप्तम्येकवचनान्तं पदम्। च इति अव्ययपदम्। युष्माकास्माकौ इति प्रथमाद्विवचनान्तं विधेयबोधकं पदम्। 'युष्मदस्मदोरन्यतरस्यां खञ् च' (पा.सू. ४.३.१) इति सूत्रात् युष्मदस्मदोः

इति पदमनुवर्तते। तस्मिन् इति पदेन पूर्वसूत्रे साक्षाद् विहितः खञ्प्रत्ययः परामृश्यते। पूर्वसूत्रे चकारेण अनुकृष्टः छप्रत्ययः तस्मिन् इति पदद्वारा न परामृश्यते। तेन सूत्रार्थो भवति – युष्मदस्मदोः युष्माकास्माकौ एतौ आदेशौ भवतः खञि अणि च परे इति। उदाहरणं यथा – यौष्माकीणः, आस्मकीनः, यौष्माकः, आस्माकः इत्यादि। प्रकृतसूत्रे छप्रत्ययस्य अनुकर्षणं न भवति। अतः छप्रत्यये युष्माकास्माकावादेशौ न भवतः। तेन छप्रत्यये युष्मदीयः, अस्मदीयः इत्येव रूपं भवति।

**२.११.१ आक्षेपः**

ननु अत्र युष्माकास्माकौ इति आदेशद्वयं, खञणौ इति निमित्तमपि द्वयम्। एवञ्चात्र आदेशनिमित्तयोः समसंख्यत्वात् यथासंख्यन्यायः स्यात्। तेन खञ्प्रत्यये परे युष्मच्छब्दस्य युष्माकादेशो भवति। अतः यौष्माकीणः इति सिद्ध्यति, परन्तु अण्-प्रत्यये परे युष्मच्छब्दस्य युष्माकादेशो न प्राप्नोति। तेन यौष्माकः इति रूपं न स्यात्। एवमेव अण्-प्रत्यये परे अस्मच्छब्दस्य अस्माकादेशो भवति। अतः आस्माकः इति सिद्ध्यति, परन्तु खञ्प्रत्यये परे अस्मच्छब्दस्य अस्माकादेशो न प्राप्नोति। तेन आस्माकीनः इति रूपं न स्यात्।

## २.११.२ योगविभागेन समाधानम्

अत्र आदेशयोः निमित्ताभ्यां खञण्भ्यां यथासंख्यवारणाय महाभाष्यकारेण योगविभागः स्वीकृतः। योगविभागेनात्र यथासंख्यप्रतिषेधः क्रियते। तथाहि – योगविभागे कृते सूत्रद्वयं भवति। तत्र 'तस्मिन् युष्माकास्माकौ' इति प्रथमं सूत्रम्। 'अणि च' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रस्थेन तस्मिन् इति पदेन पूर्वसूत्रे साक्षाद्विहितः खञ्प्रत्ययः एव परामृश्यते न तु चकारानुकृष्टः छप्रत्ययः। किञ्च पूर्वसूत्रात् युष्मदस्मदोः इति पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – खञ्प्रत्यये परे युष्मदस्मदोः युष्माकास्माकौ भवतः इति। तेन यौष्माकीणः, आस्माकीनः इत्येतयोः सिद्धिर्भवति। 'अणि च' इति द्वितीयसूत्रे प्रथमसूत्रात् युष्माकास्माकौ इति पदमनुवर्तते। तेन द्वितीयसूत्रार्थो भवति – अण्-प्रत्यये परे युष्मदस्मदोः युष्माकास्माकौ भवतः इति। तेन यौष्माकः, आस्माकः इत्येतयोः सिद्धिर्भवति। तदुक्तं महाभाष्ये – 'योगविभागः कर्तव्यः। तस्मिन्नणि युष्माकास्माकौ भवतः। यौष्माकः, आस्माकः। ततः खञि। खञि च युष्माकास्माकौ भवतः। यौष्माकीणः, आस्माकीनः।'[४४] इति।

## २.११.३ समीक्षणम्

वस्तुतः अत्र योगविभागः न क्रियते चेदपि न हानिः। तर्हि कथम् आदेशयोः खञणभ्यां यथासंख्यं निवार्यते इति चेदुच्यते – अत्र निमित्तयोः आदेशौ प्रति यथासंख्यत्वं न भवति। अत्र कारणं हि 'तस्मिन्' 'अणि' चेति पृथग्विभक्तिनिर्देशः। तथाहि – 'खञणोः युष्माकास्माकौ' इति वक्तव्ये 'तस्मिन्' 'अणि' चेति व्यस्तनिर्देशसामर्थ्यादत्र ज्ञायते यत् निमित्तयोः आदेशौ प्रति यथासंख्यत्वं न भवतीति। अत्र काशिकाकारेण योगविभागः स्वीकृतः। तदुक्तं काशिकायां – 'निमित्तयोरादेशौ प्रति यथासंख्यं कस्माद् न भवति? योगविभागः करिष्यते, तस्मिन् खञि युष्मदस्मदोर्युष्माकास्माकौ भवतः। ततोऽणि चेति। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः। तस्मिन्नणि चेति किम्? युष्मदीयः। अस्मदीयः।'[४५] इति।

## २.१२. संज्ञायां कुलालादिभ्यो वुञ् (पा.सू. ४.३.११७)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र संज्ञायाम् इति सप्तम्येकवचनान्तं पदम्। कुलालादिभ्यः इति पञ्चम्यन्तं पदम्। वुञ् इति प्रथमान्तं पदम्। 'तेनैकदिक्' (पा.सू. ४.३.११२) इति सूत्रात् तेन इति तृतीयान्तं पदम् अनुवर्तते। तेन सूत्रार्थो भवति – तेन कृते संज्ञायां

कुलालादिभ्यो वुञ् स्यादिति। उदाहरणं यथा – कुलालेन कृतं कौलालकम् इत्यादि।

'कृते ग्रन्थे' (पा.सू. ४.३.११६) इत्येकं सूत्रमस्ति। अस्मिन् सूत्रे पदद्वयं वर्तते। तत्र कृते इति सप्तम्येकवचनान्तं पदम्। ग्रन्थे इत्यपि सप्तम्येकवचनान्तं पदम्। 'तेनैकदिक्' इति सूत्रात् तेन इति तृतीयान्तं पदमनुवर्तते। तेन सूत्रार्थो भवति – तेन कृतो ग्रन्थः इत्यस्मिन् अर्थे तृतीयासमर्थात् यथाविहितं प्रत्ययो स्यादिति। उदाहरणं यथा – वररुचिना कृतो वाररुचो ग्रन्थः इत्यादि।

### २.१२.१ आक्षेपः

ननु मक्षिकाभिः कृतं माक्षिकम्, सरघाभिः कृतं सारघम् इत्यादि रूपं कथं सिध्यति। यतो हि 'कृते ग्रन्थे' इत्यनेन सूत्रेण तेन कृतो ग्रन्थः इत्येतस्मिन् अर्थे प्रत्ययो विधीयते। माक्षिकम् इत्यादि तु न ग्रन्थः। तर्हि माक्षिकं, सारघम् इत्यादिरूपं कथं सिध्यतीति आक्षेपः सुतरामुदेति।

### २.१२.२ योगविभागेन समाधानम्

माक्षिकं, सारघम् इत्यादिरूपं कथं सिध्यतीति आक्षेपसमाधानार्थं वार्त्तिककारेण 'योगविभागात्सिद्धम्' इति वार्त्तिकं स्वीकृतम्। महाभाष्यकारेणापि 'संज्ञायां कुलालादिभ्यो वुञ्' इति सूत्रे योगविभागं

स्वीकृत्य सरघाभिः कृतं सारघम् इत्यादिरूपं प्रतिपादितम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'संज्ञायाम्' इति प्रथमं सूत्रम्। 'कुलालादिभ्यो वुञ्' इति द्वितीयं सूत्रम्। 'संज्ञायाम्' इति प्रथमसूत्रे 'तेनैकदिक्' इति सूत्रात् तेन इति पदमनुवर्तते। 'कृते ग्रन्थे' इति सूत्रात् कृते इति पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – संज्ञायां च तेन कृत इत्येतस्मिन् अर्थे यथाविहितं प्रत्ययो भवतीति। तेन सरघाभिः कृतं सारघं, गार्मुतं, पौत्तिकम् इत्यादिरूपं सिध्यति। 'कुलालादिभ्यो वुञ्' इति द्वितीयसूत्रे 'तेनैकदिक्' इति सूत्रात् तेन इति पदमनुवर्तते। 'कृते ग्रन्थे' इति सूत्रात् कृते इति पदमनुवर्तते। किञ्च 'संज्ञायाम्' इति प्रथमसूत्रमप्यनुवर्तते। तेन द्वितीयसूत्रस्य अर्थो भवति – कुलालादिभ्यो वुञ् प्रत्ययो भवति तेन कृतमित्येतस्मिन्नर्थे संज्ञायां गम्यमानायाम् इति। तेन कौलालकं, वारुडकम् इत्यादिरूपं सिध्यति। तदुक्तं महाभाष्ये – 'योगविभागः करिष्यते। कृते ग्रन्थे। ततः संज्ञायाम्। संज्ञायां च तेन कृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सरघाभिः कृतं सारघं, गार्मुतम्,पौत्तिकम्। ततः कुलालादिभ्यो वुञ्। संज्ञायामित्येव।'[४६] इति।

### २.१२.३ समीक्षणम्

अत्र वस्तुतः 'संज्ञायां कुलालादिभ्यो वुञ्' इत्येकमेव सूत्रम् आचार्येण पाणिनिना कृतम्। अत एव अत्र योगविभागस्य प्रसङ्गः। तदुक्तम् अन्नम्भट्टेन स्वकीये महाभाष्यप्रदीपोद्योतनटीकायां – 'ननु विभागः सिद्ध एव, कथं कर्तव्य इत्युच्यते, अत आह – संज्ञायामिति। 'संज्ञायां कुलालादिभ्यो वुञ्' इत्येको योगः, विभक्तपाठस्त्वनार्ष इति भावः।'[४७] इति। नारायणशास्त्रिणापि उक्तं – 'कस्य योगस्य विभागः कथ्यत इत्यत्राह – संज्ञायां कुलालेति। आचार्येणायमेको योगः पठितः। एतद्वार्त्तिकदर्शनादभियुक्तैर्विभक्तः।'[४८] इति। सिद्धान्तकौमुदीकारेणापि अत्र योगविभागं स्वीकृत्य एव पृथक्सूत्ररूपेण पाठः कृतः। काशिकायामपि विभक्ततया एव पाठः दृश्यते।

### २.१३. विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् (पा.सू. ५.१.२४)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र विंशतित्रिंशद्भ्याम् इति पञ्चमीद्विवचनान्तं पदम्। ड्वुन् इति प्रथमान्तं विधेयबोधकं पदम्। असंज्ञायाम् इति सप्तम्येकवचनान्तं पदम्। 'आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्' (पा.सू. ५.१.१९) इति सूत्रात् आर्हाद् इति पदमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – विंशतित्रिंशद्भ्याम् आर्हाद् असंज्ञायां ड्वुन् इति। सूत्रस्यार्थो हि – विंशतिशब्दात् तथा त्रिंशत्-शब्दात्

आर्हीयेषु अर्थेषु असंज्ञायाम् अर्थात् संज्ञां वर्जयित्वा ड्वुन् प्रत्ययः भवति इति। केषु अर्थेषु ड्वुन्प्रत्ययः विधीयते इति चेदुच्यते – आर्हाद् इति। 'तेन क्रीतम्' (पा.सू. ५.१.३७) इति सूत्रेण विहितात् प्रथमात् अर्थात् आरभ्य 'तदर्हति' (पा.सू. ५.१.६३) इति सूत्रेण विहितम् एकादशमर्थं यावत् ये अर्थाः प्राग्वतीयाधिकारे पठिताः, तेषु अर्थेषु अनेन सूत्रेण औत्सर्गिकं ठञ्प्रत्ययं बाधित्वा ड्वुन्प्रत्ययः विधीयते। आर्हाद् इत्यत्र आङ् इति अव्ययम् अभिविध्यर्थे वर्तते, अतः अत्र आवल्यां तदर्हति इत्यस्य अपि समावेशः भवति। अतः आहत्य एकादशसु अर्थेषु प्रकृतसूत्रेण ठञ्-प्रत्ययं बाधित्वा ड्वुन्प्रत्ययः विधीयते। 'प्राग्वतेष्ठञ्' (पा.सू. ५.१.१८) अनेन सूत्रेण सर्वेषु प्राग्वतीयेषु अर्थेषु संख्यावाचिभ्यः शब्देभ्यः औत्सर्गिकरूपेण ठञ् प्रत्ययः विहितः। तदनुसारं विंशतित्रिंशद्भ्यामपि ठञ्प्रत्ययः प्राप्तः परन्तु प्रकृतसूत्रेण विंशतित्रिंशद्भ्याम् आर्हीयेषु अर्थेषु प्राप्तं ठञ्प्रत्ययं बाधित्वा ड्वुन् प्रत्ययः विहितः, किञ्च अयं ड्वुन्प्रत्ययः असंज्ञायाम् अर्थात् संज्ञां वर्जयित्वा अन्यत्र भवति। प्रकृतसूत्रस्य उदाहरणं यथा – विंशत्या क्रीतं विंशकः, त्रिंशता क्रीतं त्रिंशकः इत्यादि।

### २.१३.१ आक्षेपः

यदि कस्यचन वस्तुनः नाम्नः निर्देशः कर्तव्यः तर्हि प्रकृतसूत्रेण ड्वुन् प्रत्ययः न भवति, अतः सूत्रे असंज्ञायाम् इत्युक्तम्। संज्ञाविषये तु विशंतिशब्दात् तथा त्रिंशत्-शब्दात् कन्प्रत्ययः भवति। कन्प्रत्यये विंशतिकः, त्रिंशत्कः इत्येवं रूपं भवति। परन्तु अत्र कन्प्रत्ययस्य प्रसक्तिः नास्ति, 'संख्याया अतिशदन्तायाः कन्' (पा.सू. ५.१.२२) इति सूत्रेण तस्य प्रतिषेधात्। अत्र औत्सर्गिकः ठञ्प्रत्ययः एव प्राप्नोति। अतः आक्षेपो भवति यत् विशंतिशब्दात् तथा त्रिंशत्-शब्दात् कन्प्रत्ययः कथं भवतीति।

### २.१३.२ योगविभागेन समाधानम्

विशंतिशब्दात् तथा त्रिंशत्-शब्दात् कन्प्रत्ययः कथं भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। योगविभागेनात्र कन्प्रत्ययो विधीयते। तथाहि – योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'विंशतित्रिंशद्भ्याम्' इति प्रथमं सूत्रम्। 'ड्वुन्नसंज्ञायाम्' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रे 'संख्याया अतिशदन्तायाः कन्' इति सूत्रात् कन् इति पदम् अनुवर्तते। तेन प्रथमसूत्रस्यार्थो भवति – विंशतिशब्दात् तथा त्रिंशत्-शब्दात् आर्हीयेषु अर्थेषु कन् प्रत्ययः भवतीति। एवञ्च संज्ञायां विंशतिशब्दात् तथा त्रिंशत्-शब्दात् कन्प्रत्ययो भवति। तेन

विंशत्या क्रीतं विंशतिकम्, त्रिंशता क्रीतं त्रिंशत्कम् इत्यादिरूपं सिध्यति। द्वितीयसूत्रे 'विंशतित्रिंशद्भ्याम्' इति प्रथमं सूत्रम् अनुवर्तते। तेन द्वितीयसूत्रस्यार्थो भवति – विंशतिशब्दात् तथा त्रिंशत्-शब्दात् आर्हीयेषु अर्थेषु असंज्ञायाम् ड्वुन् प्रत्ययः भवति इति। तेन विंशत्या क्रीतं विंशकः, त्रिंशता क्रीतं त्रिंशकः इत्यादिरूपं सिध्यति। तदुक्तं महाभाष्यकारेण – 'अथवा योगविभागः करिष्यते – विंशतित्रिंशद्भ्यां कन् भवतीति। ततः ड्वुन्नसंज्ञायामिति'।[४९]

## २.१३.३ समीक्षणम्

वस्तुतः अत्र योगविभागः स्वीकर्तव्य एव। अन्यथा विंशतिशब्दात् तथा त्रिंशच्छब्दात् कन्प्रत्ययस्य विधानं कर्तुं न शक्यते। 'विंशतिकात् खः' (पा.सू. ५.१.३२) इत्यत्र कन्प्रत्ययान्तोच्चारणात् विंशतिशब्दात् कन्प्रत्ययः सिध्यति, इत्यपि वक्तुं न शक्यते। यतो हि अत्र 'विंशतित्रिंशद्भ्याम्' इति योगापेक्षं ज्ञापकम्। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'असंज्ञायामिति किम्? विंशतिकः। त्रिंशत्कः। कथं पुनरत्र कन्, यावता अतिशदन्ताया इति पर्युदासेन भवितव्यम्? योगविभागः करिष्यते – विंशतित्रिंशद्भ्यां कन् प्रत्ययो भवति, ततो ड्वुन्नसंज्ञायामिति।'[५०] इति। सिद्धान्तकौमुदीकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन –

'योगविभागः कर्तव्यः। आभ्यां कन् स्यात्। असंज्ञायां तु ड्वुन् स्यात्। कनोऽपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः।'[५१] इति। नागेशभट्टेनापि योगविभागः समर्थितः। तदुक्तं तेन – 'योगविभाग इति। अन्यथा त्रिंशतः शदन्तत्वाद्विदशशब्दस्य विंशादेशस्तिप्रत्यय इति पक्षे विंशतेस्त्यन्तत्वान्न स्यादिति भावः।'[५२] इति।

## २.१४. तत्र च दीयते कार्यं भववत् (पा.सू. ५.१.९६)

अस्मिन् सूत्रे पञ्चपदानि सन्ति। तत्र इति अव्ययपदम्। च इत्यपि अव्ययपदम्। दीयते इति क्रियापदम्। कार्यमिति प्रथमान्तपदम्। भववत् इति अव्ययपदम्। प्रकृतमिदं सूत्रं 'कालात्' (पा.सू. ५.२.७८) इत्यधिकारे वर्तते। तेन सूत्रार्थो भवति – कालवाचिभ्यः समर्थेभ्यः सप्तम्यन्तेभ्यः प्रातिपदिकेभ्यः दीयते तथा कार्यम् एतयोः अर्थयोः 'तत्र भवः' (पा.सू. ४.३.५३) इत्यस्मिन् अर्थे ये प्रत्ययाः उक्ताः सन्तिः ते प्रत्ययाः भवन्तीति। अर्थात् प्राग्दीव्यतीयाधिकारे शैषिकप्रकरणे 'तत्र भवः' अस्मिन् अर्थे कालवाचकेभ्यः प्रातिपदिकेभ्यः ये प्रत्ययाः उक्ताः सन्ति, ते एव प्रत्ययाः अत्र भवन्ति इति सूत्रस्यास्य आशयः। उदाहरणं यथा – मासे दीयते तत् मासिकं धनम्। मासे कार्यं तत् मासिकमध्ययनम् इत्यादि।

### २.१४.१ आक्षेपः

'कार्यग्रहणमनर्थकं तत्रभवेन कृतत्वात्' इति वार्त्तिकेन प्रकृतसूत्रे कार्यम् इति पदस्य ग्रहणं व्यर्थम् इति प्रतिपादितम्। यतो हि मासे यत् कार्यं तत् मासे एव भवति, अतः मासे भवम् इत्यस्मिन् अर्थे 'तत्र भवः' इत्यनेनैव सूत्रेण प्रत्ययः सिध्यति। अत्र आक्षेपो भवति यत्, प्रकृतसूत्रे यथा कार्यम् इति पदस्य ग्रहणं व्यर्थम् इति उक्तं, तथैव दीयते इति पदस्य ग्रहणमपि व्यर्थमिति किमर्थं नोक्तम्। यतो हि अत्र दीयते इति पदस्य ग्रहणमपि नावश्यकम्। तथाहि – यद्यपि यत् दीयते न तत् मासे दीयते अपि तु मासे गते दीयते, तथापि मासे अतिक्रान्ते यद्दीयते तस्य मास औपश्लेषिकमधिकरणं भवत्येव। तेन औपश्लेषिकाधिकरणं स्वीकृत्य 'तत्र भवः' इत्यनेनैव सूत्रेण प्रत्ययः सिध्यति। औपश्लेषिकाधारः गौणः, तत्र कथं सप्तमीत्यपि वक्तुं न शक्यते। यतो हि कारकप्रकरणे गौणस्यापि संज्ञा भवति। अतः केवलं कार्यग्रहणमनर्थकम् इत्युक्तं दीयतेग्रहणस्य आनर्थक्यमपि किमर्थं नोक्तमिति आक्षेपः।

### २.१४.२ योगविभागेन समाधानम्

वस्तुतः यथा कार्यग्रहणमनर्थकम् इत्युक्तं तथैव दीयतेग्रहणमनर्थकम् इत्यपि वक्तव्यमासीत्। परन्तु केवलं 'कार्यग्रहणमनर्थकं तत्रभवेन कृतत्वात्'

इत्येवोक्तम्। एतेन ज्ञायते यत्, वार्त्तिककारेण आदौ योगविभागः स्वीकृतः। तदनन्तरं 'कार्यग्रहणमनर्थकं तत्रभवेन कृतत्वात्' इत्युक्तम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'तत्र च दीयते' इति प्रथमं सूत्रम्। 'कार्यं भववत्' इति द्वितीयं सूत्रम्। प्रथमसूत्रे 'तस्य च दक्षिणा यज्ञाख्येभ्यः' (पा.सू. ५.१.९५) इति पूर्वसूत्रात् यज्ञाख्येभ्यः इति पदमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – यज्ञाख्येभ्यः तत्र च दीयते इति। प्रथमसूत्रस्यार्थो हि – सप्तम्यन्तात् समर्थात् यज्ञवाचिशब्दात् दीयते इत्यस्मिन् अर्थे ठञ् प्रत्ययः भवतीति। अस्य उदाहरणं यथा – राजसूये दीयते सः राजसूयिकः बलिः इत्यादि। 'कार्यं भववत्' इति द्वितीये सूत्रे कालात् इति पदम् अधिकारादेवागच्छति। तेन द्वितीयसूत्रास्यार्थो भवति – कार्यम् इत्यस्मिन् अर्थे सप्तमीसमर्थेभ्यः कालवाचिप्रातिपदिकेभ्यः 'तत्र भवः' इत्यस्मिन् अर्थे ये प्रत्ययाः उक्ताः सन्ति ते अत्रापि विधीयन्ते इति। एवञ्च योगविभागं कृत्वा 'कार्यं भववत्' इति द्वितीययोगे 'कार्यग्रहणमनर्थकं तत्रभवेन कृतत्वात्' इति बोध्यम्। अर्थात् दीयते इति पदस्य आनर्थक्यं नोक्तं यतो हि योगविभागार्थं दीयते इति पदम् आवश्यकम्। तदुक्तं महाभाष्ये – 'एवं तर्हि योगविभागोत्तरकालमिदं पठितव्यम् – तस्य दक्षिणा यज्ञाख्येभ्यः। तत्र च दीयते। ततः कार्यं भववत् कालात् इति।'[५३] इति।

## २.१४.३ समीक्षणम्

दीयमानस्य भवत्वात् ‘क्रतुयज्ञेभ्यश्च’ (पा.सू. ४.३.६८) इत्यनेनैव ठञ्प्रत्ययो भवति। तेन योगविभागः व्यर्थः, इति चेदत्र उच्यते – ‘क्रतुयज्ञेभ्यश्च’ इत्यनेन सूत्रेण यज्ञाख्येभ्यः ठञ्प्रत्ययो न भवति। यतो हि ‘क्रतुयज्ञेभ्यश्च’ इत्यस्मिन् सूत्रे ‘तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः’ (पा.सू. ४.३.६६) व्याख्यातव्यनाम्नः इति पदमनुवर्तते। योगविभागस्वीकारे तु यज्ञाख्यानां व्याख्यातव्यनामत्वाभावेऽपि ‘तत्र च दीयते’ इति योगविभागलब्धसूत्रेण ठञ्प्रत्ययो भवति। किञ्च द्वयोर्मासयोर्भवं द्वैमासिकम् इत्यादिप्रयोगसिध्यर्थमपि योगविभागः आवश्यकः। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – ‘योगविभागश्चात्र कर्तव्यः। तत्र च दीयते, यज्ञाख्येभ्य इति।’[५४] इति। कैयटेनापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – ‘प्राग्वतेः संख्यापूर्वपदानाम् इति वचनाद् द्वयोर्वाजपेययोर्दीयते द्वैवाजपेयिकमित्यत्रापि योगविभागात् ठञ् भवति।’[५५] इति। नागेशभट्टेनापि अत्र योगविभागः समर्थितः। तदुक्तमुद्योते – ‘योगविभागे फलान्तरमप्याह– प्राग्वतेरिति। एवं द्वयोर्मासयोर्भवं द्वैमासिकम् इत्येतत्सिद्धिः कार्यांशस्य फलम्। कालाट्ठञा तु न सिध्यति, द्विगोर्लुक् इत्यस्य प्रसङ्गात्। अनेन प्रत्यये तु न लुक्, अनार्हीयत्वादप्राग्दीव्यतीयत्वाच्चेत्याहुः।’[५६] इति।

सिद्धान्तकौमुदीकारेणात्र योगविभागः न स्वीकृतः। लघुशब्देन्दुशेखरे नागेशभट्टेनोक्तं – 'भाष्ये तु चो भिन्नक्रमः दीयते इत्यनन्तरं बोध्यः। चकारेण च यज्ञाख्येभ्य इत्याकृष्यते। तत्र दीयते इत्यर्थे यज्ञाख्येभ्यष्ठञ्भवतीत्यर्थः। अग्निष्टोमे दीयते भक्तमाग्निष्टोमिकम्। कार्यरूपार्थे एव भववदतिदेश इत्युक्तम्।'[५७] इति।

## २.१५. किमिदम्भ्यां वो घः (पा.सू. ५.२.४०)

प्रकृतेऽस्मिन् सूत्रे पदत्रयं वर्तते। तत्र किमिदम्भ्याम् इति पञ्चमीद्विवचनान्तं पदम्। वः इति षष्ठ्येकवचनान्तं पदम्। घः इति प्रथमैकवचनान्तं पदम्। 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा.सू. ५.२.३९) इति सूत्राद् अनुवर्तमानं वतुप् इति पदं षष्ठ्या विपरिणमते। तेन सूत्रार्थो भवति – किमिदम्भ्यां परस्य वतुप्प्रत्ययस्य वकारस्य घकारादेशो भवतीति। कियान्, इयान् इत्याद्यत्रोदाहरणम्।

### २.१५.१ आक्षेपः

यतो हि प्रकृतसूत्रेण किमिदम्भ्यां परस्य वतुपः वकारस्य घकारो विधीयते, अतः अत्र आक्षेपोऽयं सुतरां मनसि उदेति यत् किम्-शब्दात् तथा इदम्-शब्दात् वतुप्प्रत्ययः केन सूत्रेण विहितः इति। यतो हि किमिदम्भ्यां परं वतुप्प्रत्ययविधायकं साक्षात् किमपि सूत्रं नास्ति।

### २.१५.२ योगविभागेन समाधानम्

किमिदम्भ्यां वतुप्प्रत्ययः केन सूत्रेण विहितः इति शङ्कायाः समाधानार्थं महाभाष्यकारेण अत्र योगविभागः स्वीकृतः। तथाहि – योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। 'किमिदम्भ्याम्' इत्येको योगः। 'वो घः' इत्यपरो योगः। तत्र 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा.सू. ५.२.३९) इति सूत्रात् परिमाणे, वतुप् चेति पदद्वयमनुवर्तते। 'तदस्य संजातं तारकादिभ्य इतच्' (पा.सू. ५.२.३६) इति सूत्रात् तत, अस्य चेति पदद्वयम् अनुवर्तते। तेन प्रथमयोगस्य अर्थो भवति – परिमाणशब्दस्य विशेषणरूपेण प्रयुक्तौ यौ किम् तथा इदम् शब्दौ ताभ्यां किमिदम्भ्यां परं तदस्य इत्यस्मिन् अर्थे वतुप्प्रत्ययो भवतीति। द्वितीययोगस्यार्थो भवति – किमिदम्भ्यां परस्य वतुप्प्रत्ययस्य वकारस्य घकारादेशो भवतीति। तदुक्तं महाभाष्ये – 'अथवा योगविभागः करिष्यते – किमिदम्भ्याम्। वतुब् भवति। ततः – वो घः इति। वश्चास्य घो भवतीति।'[५८] इति।

### २.१५.३ समीक्षणम्

यद्यपि 'किमिदम्भ्यां वो घः' इत्यनेन प्रकृतसूत्रेण किमिदम्भ्यां परस्य वतुपः वकारस्य घविधानसामर्थ्यादेव एतद् ज्ञायते यत् किमिदम्भ्यां परं वतुप्प्रत्ययो भवतीति। तथापि अत्र योगविभागः स्वीक्रियते चेदेव वरम्।

यतो हि योगविभागस्वीकारे स्पष्टप्रतिपत्तिर्भवति। किञ्च अत्र घकारादेशविधानसामर्थ्यात् वतुप्प्रत्ययस्य अनुमानं क्रियते चेदपि तत्र वतुप्प्रत्ययः कस्मिन् अर्थे अनुमीयते इति आक्षेपः पुनः मनसि उदेति। अर्थात् अत्र अर्थस्यापि अनुमानं करणीयम्। तदपेक्षया योगविभाग एव उचितः। किञ्च योगविभागस्वीकारे कोऽपि सन्देहो न भवति। काशिकाकारेणापि अत्र योगविभागः समर्थितः। तदुक्तं तेन – 'एतदेव चादेशविधानं ज्ञापकं किमिदम्भ्यां वतुप् प्रत्ययो भवतीति। अथवा योगविभागेन वतुपं विधाय पश्चाद् वो घो विधीयते।'[५९] इति। नागेशेनापि अत्र योगविभागः समर्थितः। तदुक्तं लघुशब्देन्दुशेखरे – 'वस्य घविधानसामर्थ्याद्वतुपोऽप्यत्र विधिः।... यद्वा किमिदम्भ्यामिति वाक्यभेदेन वतुपं विधत्ते।'[६०] इति। अत्र वाक्यभेदेन इति पदस्य अर्थः योगविभागेन इति। यतो हि योगविभागं विना वाक्यभेदः न सम्भवति। सिद्धान्तकोमुदीकारेणात्र योगविभागविषये किमपि नोक्तम्। अर्थात् वस्य घविधानसामर्थ्यादेव अत्र वतुप् अपि विधीयते इति स्वीकृतम्।

### २.१६. एतदोऽन् (पा.सू. ५.३.५)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र एतदः इति षष्ठ्येकवचनान्तं पदम्। अन् इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। 'प्राग्दिशो विभक्तिः'

(पा.सू. ५.३.१) इति सूत्रात् प्राग्दिशः इति पदमनुवर्तते। तेन सूत्रार्थो भवति– एतदः प्राग्दिशीये परतोऽन् इत्ययमादेशो भवतीति। 'किंसर्वनामबहुभ्योऽद्यादिभ्यः' (पा.सू. ५.३.२) इत्यनेन सूत्रेण एतद्-शब्दात् प्राग्दिशीयाः विभक्तिसंज्ञकाः प्रत्ययाः भवन्ति। एतेषु प्राग्दिशीयेषु प्रत्ययेषु परेषु एतद्-शब्दस्य अन् इति आदेशो भवतीति बोध्यम्। उदाहरणं यथा – अत्र, अतः इत्यादि।

### २.१६.१ आक्षेपः

ननु रेफादौ थकारादौ च प्राग्दिशीये प्रत्यये परेऽपि प्रकृतसूत्रेण एतच्छब्दस्य अन् इत्येव आदेशः प्राप्नोति। परन्तु रेफादौ थकारादौ च प्रत्यये परे एतच्छब्दस्य एतेतौ आदेशौ आकाङ्क्षितौ। यतो हि एतद् इति शब्दादपि एतर्हि, इत्थम् चेति रूपद्वयं भवति। यदि प्राग्दिशीये प्रत्यये परे एतच्छब्दस्य अन् इत्येव आदेशः स्यात् तर्हि एतद् इति शब्दात् एतर्हि तथा इत्थम् इति रूपद्वयं कथं सिध्यतीति आक्षेपः सुतरां मनसि उदेति।

### २.१६.२ योगविभागेन समाधानम्

एतद् इति शब्दात् एतर्हि तथा इत्थम् इति रूपद्वयं कथं सिध्यतीति आक्षेपसमाधानार्थं वार्त्तिककारेण 'एतद इति योगविभागः' इति वार्त्तिकं स्वीकृतम्। महाभाष्यकारेणापि अत्र योगविभागेन एतद् इति शब्दात् एतर्हि,

इत्थम् चेति रूपद्वयं प्रतिपादितम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'एतदः' इति प्रथमं सूत्रम्। 'अन्' इति द्वितीयं सूत्रम्। 'एतेतौ रथोः' (पा.सू. ५.३.४) इति सम्पूर्णं सूत्रं 'एतदः' इति प्रथमसूत्रे अनुवर्तते। तेन प्रथमसूत्रस्य अर्थो भवति – रेफथकारादौ प्राग्दिशीये प्रत्यये परे एतच्छब्दस्य एतेतौ आदेशौ भवतः इति। तेन एतद् इति शब्दात् एतर्हि, इत्थम् चेति रूपद्वयं सिध्यति। 'अन्' इति द्वितीयसूत्रे 'एतदः' इति प्रथमसूत्रमनुवर्तते। तेन द्वितीयसूत्रस्य अर्थो भवति – प्राग्दिशीये प्रत्यये परे एतच्छब्दस्य अन् इति आदेशः भवतीति। तेन अत्र, अतः इत्यादिरूपं सिध्यति। तदुक्तं महाभाष्ये – 'एतद इति योगविभागः कर्तव्यः। एतदः एत इत् इत्येतावादेशौ भवतः रथोः। ततः अन्। अन् च भवति एतद इति।'[६१] इति।

### २.१६.३ समीक्षणम्

वस्तुतः एतच्छब्दादपि एतर्हि, इत्थम् चेति रूपद्वयप्रतिपादनार्थं प्रकृतसूत्रे योगविभागः आवश्यकः। यथा इदम् इति शब्दाद् एतर्हि इत्थम् चेति रूपद्वयं भवति तथैव एतद् इति शब्दादपि एतर्हि इत्थम् चेति रूपद्वयं भवति। इदम् तथा एतद् अनयोः शब्दयोः मध्ये अस्ति सूक्ष्मः भेदः। अत्र प्रसिद्धा एका कारिका विद्यते –

इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्।
अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्॥ इति।

अर्थात् यत् वस्तु समीपे विद्यते तद्बोधनार्थम् इदम् इति शब्दस्य प्रयोगः कर्तव्यः। परन्तु यत् वस्तु अतीवसमीपे विद्यते तद्बोधनार्थम् एतद् इति शब्दस्य प्रयोगः कर्तव्यः। अर्थात् प्रकृतयोः द्वयोः शब्दयोः मध्ये सूक्ष्मः भेदः अस्ति। अतः इदम् इति शब्दात् निष्पन्नस्य एतर्हि इति शब्दस्य अर्थः भिन्नः। एतद् इति शब्दात् निष्पन्नस्य एतर्हि इति शब्दस्य च अर्थः भिन्नः। अत्र 'अनद्यतने र्हिलन्यतरस्याम्' (पा.सू. ५.३.२१) इत्यनेन सूत्रेण एतदः रेफादिप्रत्ययो भवति। किञ्च यदयं थकारादावादेशं शास्ति तज्ज्ञापयति यत् एतदः थमुः भवतीति। एवञ्च एतच्छब्दादपि एतर्हि, इत्थम् चेति रूपद्वयप्रतिपादनार्थं प्रकृतसूत्रे योगविभागः आवश्यकः। अत्र काशिकाकारेणापि योगविभागः स्वीकृतः। तदुक्तं काशिकायाम्– 'एतद इति योगविभागः कर्तव्यः। एतदो रथोः परत एत इत् इत्येतावादेशौ भवतः। एतर्हि। इत्थम्'[६२] इति। सिद्धान्तकौमुदीकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'योगविभागः कर्तव्यः। एतदः – एतेतौ स्तो रथोः। अन् – एतद इत्येव।'[६३] इति। बालमनोरमाकारेणापि योगविभागः स्वीकृतः। तदुक्तं – 'प्राग्दिशीये प्रत्यये परे एतच्छब्दस्य अन्स्यादित्यर्थः

प्रतीयते, एवं सति एतच्छब्दस्य अनेव स्यात्, नत्वेतेतौ। तत्राह योगविभाग इति। एतद इति। प्रथमसूत्रमिदम्। तस्य शेषपूरणम् 'एतेतौ रथोः' इति। एतच्छब्दस्य एतेतौ स्तो रेफथकारादौ प्रत्यये परे इत्यर्थः। एतर्हि, इत्थमित्युदाहरणम्। अन्निति। द्वितीयं सूत्रम्। एतद इत्येवेति रथोरिति तु नानुवर्तते इति भावः। तथाच 'एतद' इत्यस्य अन्स्यात्प्राग्दिशीये परे इत्यर्थः फलति। अतः, अत्र इत्युदाहरणम्।'[६४] इति।

१ प.भा.शे., सम्पा. विश्वनाथमिश्रः, पृ.सं. ९६
२ तदेव, पृ.सं. ४५०
३ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ३५८
४ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ६०१
५ प.भा.शे., सम्पा. विश्वनाथमिश्रः, पृ.सं. ४१५
६ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ३५८
७ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ९२
८ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ४६८
९ तदेव, बा.म.र., पृ.सं. ४६८
१० तदेव, त.बो., पृ.सं. ४६८
११ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, उद्योतः, पृ.सं. ३५९
१२ तदेव, पृ.सं. ३७४
१३ तदेव, प्रदीपः, पृ.सं. ३७४
१४ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ५४४
१५ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ६६३
१६ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, ल.श.शे., पृ.सं. ५४४
१७ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ३८१
१८ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ६१६
१९ तदेव, प्रथमभागः, त.बो., पृ.सं. ६१६
२० काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ६४७
२१ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, ल.श.शे., पृ.सं. ६१६
२२ प.भा.शे., सम्पा. विश्वनाथमिश्रः, पृ.सं. २९०

२३ तदेव, पृ.सं. २८८
२४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, तृतीयभागः, पृ.सं. १००
२५ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, पृ.सं. १९२
२६ तदेव, तृतीयभागः, उद्योतः, पृ.सं. १००
२७ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, तृतीयभागः, पृ.सं. १६२
२८ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. १८९
२९ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, पृ.सं. ४०६
३० व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, तृतीयभागः, उद्योतः, पृ.सं. १६२
३१ तदेव, तृतीयभागः, पृ.सं. २०४
३२ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. २१२
३३ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, ल.श.शे., पृ.सं. ४४७
३४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, तृतीयभागः, पृ.सं. २२१
३५ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, बा.म.र., पृ.सं. २०
३६ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. २२६
३७ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, ल.श.शे., पृ.सं. २०
३८ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, तृतीयभागः, पृ.सं. २२२
३९ तदेव, तृतीयभागः, पृ.सं. २५७
४० काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. २५९
४१ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. १९७
४२ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ३६०
४३ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, त.बो., पृ.सं. ७१६
४४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. १९७

४५ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ३६०
४६ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. २१६
४७ म.भा.प्र.व्या., सप्तमभागः, उद्योतनम्, पृ.सं ३४२
४८ तदेव, सप्तमभागः, नारायणीयम्, पृ.सं ३४३
४९ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. २६१
५० काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ४२६
५१ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ७६९
५२ तदेव, प्रथमभागः, ल.श.शे., पृ.सं. ७६९
५३ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. २८३
५४ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ४४१
५५ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, प्रदीपः, पृ.सं. २८३
५६ तदेव, चतुर्थभागः, उद्योतः, पृ.सं. २८३
५७ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, ल.श.शे., पृ.सं. ७८५
५८ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. ३२१
५९ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ४५८
६० वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, ल.श.शे., पृ.सं. ८०४
६१ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, चतुर्थभागः, पृ.सं. ३६२
६२ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ४८१
६३ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ८२६
६४ तदेव, प्रथमभागः, बा.म.र., पृ.सं. ८२६

* * *

# तृतीयोऽध्यायः

## अङ्गाधिकारस्थानां योगविभागानां समीक्षा

पाणिनीयव्याकरणे व्यवहृतासु संज्ञासु अन्यतमा अस्ति अङ्गम् इति संज्ञा। 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' (पा.सू. १.४.१३) इत्यस्ति अङ्गसंज्ञाविधायकं सूत्रम्। सूत्रेऽस्मिन् पञ्च पदानि सन्ति। तत्र यस्मात् इति पञ्चम्येकवचनान्तं पदम्। प्रत्ययविधिः इति प्रथमैकवचनान्तं पदम्। तदादि इत्यपि प्रथमैकवचनान्तं पदम्। प्रत्यये इति सप्तम्येकवचनान्तं पदम्। अङ्गम् इति प्रथमैकवचनान्तं संज्ञाबोधकं पदम्। सूत्रस्यास्यार्थो भवति – यस्मात् शब्दात् प्रत्ययः विधीयते, तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञं स्यादिति। तदुक्तं भट्टोजिदीक्षितेन – 'यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्'[१] इति। अत्र भवामि भविष्यामीत्यादौ विकरणविशिष्टस्य अङ्गसंज्ञार्थं तदादिग्रहणम्। प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा अङ्गसंज्ञाप्रतिषेधार्थं सूत्रे प्रत्यये इति पदस्य ग्रहणं कृतम्। यस्मात् शब्दात् साक्षात् प्रत्ययः विधीयते तस्य शब्दस्य प्रक्रियायां कुत्रचित् सम्पूर्णरूपेण लोपः सम्भवति। तदा कस्माच्चित् अन्यस्मादेव शब्दात् प्रत्ययः दृश्यते। तादृशे स्थले तस्य अङ्गसंज्ञा मा भूत् तदर्थं सूत्रे विधिः इति पदस्य ग्रहणं कृतम्। 'अङ्गस्य' (पा.सू. ६.४.१) इति सूत्रेण अङ्गाधिकारः निर्दिश्यते। षष्ठाध्यायस्य चतुर्थपादस्य प्रथमसूत्रादारभ्य सप्तमाध्यायस्य परिसमाप्तिपर्यन्तम् अङ्गाधिकारः वर्तते। तेन आहत्य पञ्चसु

पादेषु विहितानि सर्वाणि कार्याणि अङ्गविषयकानि एव सन्ति। अस्मिन् अङ्गाधिकारे अष्टादशसूत्राणां योगविभागः समीक्षितः। तत्र केचन योगविभागाः साक्षात् तत्तत्सूत्रे एव स्वीकृताः, केचन योगविभागाः अन्यसूत्रस्य भाष्ये स्वीकृताः। एवञ्च 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति नामके अस्मिन् अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः।

**३.१. अज्झनगमां सनि (पा.सू. ६.४.१६)**

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र अज्झनगमाम् इति षष्ठीबहुवचनान्तं पदम्। सनि इति सप्तम्येकवचनान्तं पदम्। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (पा.सू. ६.३.१११) इति सूत्रात् दीर्घः इति पदमनुवर्तते। 'नोपधायाः' (पा.सू. ६.४.७) इति सूत्राद् उपाधायाः इति पदम् अनुवर्तते। अनुवर्तमानम् उपाधायाः इति पदं हनगमोः अन्वेति, न तु अजन्ते। यतो हि अजन्तस्य उपधा सर्वदा हल् एव भवति, हलः दीर्घः न सम्भवति। 'अनुनासिकस्य क्विझलोः क्ङिति' (पा.सू. ६.४.१५) इति सूत्रात् क्विझलोः इति पदमनुवर्तते। प्रकृतमिदं सूत्रम् 'अङ्गस्य' (पा.सू. ६.४.१) इत्यधिकारे वर्तते। अचः तद्विशेषणत्वात् तदन्तविधिः भवति। तेन अजन्तस्य अङ्गस्य इति भवति। तेन सूत्रार्थो भवति – अजन्तानामङ्गानां हनिगम्योश्च सनि

झलादौ परे दीर्घो भवति इति। उदाहरणं यथा – विवीषति, तुष्टूषति, चिकीर्षति, जिहीर्षति, जिघांसति, अधिजिगांसते इत्यादि।

### ३.१.१ आक्षेपः

सञ्जिगंसते इत्यादौ झलादौ सनि परे गम्धातोः अङ्गस्य दीर्घः कथं न भवतीति आक्षेपः भवति। यदि उच्यते 'सनि च' (पा.सू. २.४.४७) 'इङश्च' (पा.सू. २.४.४८) चेति सूत्राभ्यां विहितस्य इणिङोरादेशस्य तथा 'इण्वदिकः' इति वार्त्तिकेन विहितस्य इकः आदेशस्य च गमः ग्रहणं कर्तव्यम्। अन्यथा गमः सामान्येन ग्रहणे गम्लृ गतौ इत्यस्यापि ग्रहणं स्यात्। तेन सञ्जिगंसते इत्यत्रापि दीर्घस्य प्राप्तिः स्यात्। अत एव सिद्धान्तकौमुदीकारेण उक्तम् – 'अजन्तानां हन्तेरजादेशगमेश्च दीर्घः स्याज्झलादौ सनि'[२] इति। अजादेशगमेः ग्रहणमत्र क्रियते। तर्ह्यत्र पुनः आक्षेपो भवति यत् – अजादेशगमेः ग्रहणं कथं सिध्यतीति। वार्त्तिककारेणात्र 'गमेरिङादेशस्येति वक्तव्यम्' इति वार्त्तिकं स्वीकृतम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः अजादेशगमेः ग्रहणं कथं सिध्यतीति आक्षेपः तिष्ठत्येव।

### ३.१.२ योगविभागेन समाधानम्

अजादेशगमेः ग्रहणं कथं सिध्यतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। योगविभागेनात्र अतिप्रसङ्गस्य वारणं कृतम्। तथाहि अत्र योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। 'अचः सनि' इति प्रथमं सूत्रम्। 'हनिगम्योः' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रस्य अर्थो भवति – अजन्तानां सन्प्रत्यये परे दीर्घो भवतीति। अत्र प्रथमसूत्रे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (पा.सू. ६.३.१११) इति सूत्रात् दीर्घः इति पदमनुवर्तते। तेन दीर्घपदश्रुत्या अच्परिभाषोपस्थानादेव अजन्तस्य दीर्घे सिद्धे पुनः प्रथमसूत्रे अज्ग्रहणम् उत्तरार्थं बोध्यम्। 'अचः सनि' इति प्रथमसूत्रात् 'हनिगम्योः' इति द्वितीयसूत्रे अचः इति पदमनुवर्तते। तच्च अनुवर्तमानम् अचः इति पदं गमेरेव विशेषणं, न तु उभयोरपि हन्तेरजादेशत्वाभावात्। तेन 'हनिगम्योः' इति द्वितीयसूत्रस्य अर्थो भवति – हन्तेः अजादेशगमेश्च दीर्घो भवति सन्प्रत्यये परे इति। तदुक्तं महाभाष्यकारेण – 'योगविभागः करिष्यते – अचः सनि। अजन्तानां सनि दीर्घो भवति। ततः – हनिगम्योः। हनिगम्योश्च सनि दीर्घो भवति। अच इत्येव। अचः स्थाने यौ हनिगमी।'[३] इति। कैयटेनाप्युक्तं – 'अचः सनि

इत्येको योगः। तत्र दीर्घश्रुत्याऽच्परिभाषोपस्थानादजन्तस्य दीर्घे सिद्धे अज्ग्रहणमुत्तरार्थं विज्ञायते'[४] इति।

### ३.१.३ समीक्षणम्

वस्तुतः प्रकृतसूत्रे अज्ग्रहणसामर्थ्यात् तस्य प्रवृत्तिभेदं स्वीकृत्य शङ्कायाः समाधानं कर्तुं शक्यते। तथाहि अत्र केवलं 'सनि' इत्येव सूत्रं क्रियते चेदेव दीर्घश्रुत्योपस्थितेन अचः इत्यनेनाङ्गस्य विशेषणादजन्ताङ्गस्य दीर्घः सिध्यति, तथापि सूत्रे अज्ग्रहणं प्रवृत्तिभेदेन गमेरपि विशेषणार्थम्। तेन अजन्तस्य अङ्गस्य दीर्घो भवति तथा अजादेशस्य गमेश्च दीर्घो भवतीति सिध्यति। ततः हनिगम्योरित्यपरं कर्तव्यम्। काशिकाकारेणात्रोक्तं – 'गमेरिङादेशस्येति वक्तव्यम्' इह मा भूत् – संजिगंसते वत्सो मात्रेति। स्वर्गं लोकं समजिगांसद् इति छन्दसि यदनिङादेशस्यापि दीर्घत्वं दृश्यते, तद् 'अन्येषामपि दृश्यते' (६.३.१३७) इत्यनेन भवति। अथवा इहाज्ग्रहणं न कर्तव्यम्। सनि दीर्घो भवतीत्येतावदेव सूत्रं कर्तव्यं, तत्राचा गृह्यमाणस्य विशेषणे सति सिद्धमजन्तस्य दीर्घत्वम्। तत् क्रियते प्रवृत्तिभेदेन गमेरपि विशेषणार्थम् – अजन्तस्याङ्गस्य दीर्घो भवति, अजादेशस्य गमेरिति। ततो न वक्तव्यमिदं गमेरिङादेशस्येति'[५] इति। तत्त्वबोधिनीटीकाकारेणाप्युक्तं – 'गमः सामान्येन ग्रहणे गम्लृ-गतौ इत्यस्मात्संजिगंसते इत्यत्रातिप्रसङ्गः

स्यादतः 'सनि च', 'इङश्चे'ति सूत्राभ्यां विहितस्येणिङोरादेशस्य, 'इण्वदिकः' इति इक आदेशस्य च ग्रहणमित्याशयेन आह – अजादेशगमेरिति। एतच्च सूत्रेऽज्ग्रहणाल्लभ्यते। तथाहि – इह 'सनी'त्येव सूत्रं कर्तव्यं, दीर्घश्रुत्योपस्थितेनाऽच इत्यनेनाङ्गस्य विशेषणादजन्ताङ्गस्य दीर्घः। चिचीषति। ततो 'हनिगम्यो'रित्यपरं कर्तव्यम्। एवं चाऽज्ग्रहणमतिरिच्यमानं प्रवृत्तिभेदेन गमेर्विशेषणार्थम्। अजन्तस्य दीर्घो भवति, अजादेशगमेश्चेति।'[६] इति। एवञ्च प्रकृतसूत्रे अज्ग्रहणेन अजन्तानां तथा अजादेशगमेश्च इत्यर्थः सिध्यति।

### ३.२. जनसनखनां सञ्झलोः (पा.सू. ६.४.४२)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र जनसनखनाम् इति षष्ठीबहुवचनान्तं पदम्। सञ्झलोः इति सप्तमीद्विवचनान्तं पदम्। 'विड्वनोरनुनासिकस्यात्' (पा.सू. ६.४.४१) इति सूत्रात् आत् इति पदमनुवर्तते। 'अनुदात्तोपदेशवनतितनोत्यादीना-मनुनासिक लोपो झलि क्ङिति' (पा.सू. ६.४.३७) इति सूत्रात् झलि क्ङिति चेति पदद्वयमनुवर्तते। तेन प्रकृतसूत्रस्य अर्थो भवति – जनसनखनाम् अङ्गानामाकारोऽन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च इति। उदाहरणं यथा – जातः,

जातवान्, जातिः, सिषासति, सातः, सातवान्, सातिः, खातः, खातवान्, खातिः इत्यादि।

### ३.२.१ आक्षेपः

सञ्झलोः इत्यत्र सन् च झल् च सञ्झलौ, तयोः सञ्झलोः इति द्वन्द्वेन समुच्चयनिर्देशः कृतः। अतः झलादौ सनि इति सूत्रार्थः कथं सम्पद्यते इति शङ्का भवति। यदि अत्रोच्यते 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति' इति सूत्रात् झलि क्ङिति चेति पदद्वयस्य अनुवृत्तिं स्वीकृत्य अत्र समाधानं कर्तुं शक्यते। तथाहि झलि इत्यनेन अनुवृत्तेन सन् विशेष्यते। अतः तदादिविधौ झलादौ सनीति भवति। झल् इति पदम् अनुवर्तमानस्य क्ङिति इति पदस्य विशेषणमस्ति। तेन तदादिविधौ झलादौ क्ङिति इति लभ्यते। तेन झलादौ सनि, झलादौ क्ङिति उभयत्र आकारोऽन्तादेशः सिध्यति। तर्हि अत्र पुनः आक्षेपो भवति यत् 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति' इति सूत्रात् झलि क्ङिति चेति पदद्वयस्य अनुवृत्तिः स्वीक्रियते चेत् प्रकृतसूत्रे झल्ग्रहणं किमर्थं कृतमिति।

### ३.२.२ योगविभागेन समाधानम्

महाभाष्यकारेणात्र योगविभागेन झल्ग्रहणं प्रत्याख्यातम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'जनसनखनाम्' इति प्रथमं सूत्रम्। 'सनि च' इति द्वितीयं सूत्रम्। प्रथमसूत्रे 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति' इति सूत्रात् झलि क्ङिति चेति पदद्वयम् अनुवर्तते। तेन प्रथमसूत्रस्य अर्थो भवति– जनसनखनामाकारोऽन्तादेशः स्याज्झलादौ क्ङिति इति। 'सनि च' इति द्वितीयसूत्रे केवलं झलि इति पदस्य अनुवृत्तिः भवति। तेन द्वितीयसूत्रस्य अर्थो भवति – जनसनखनामाकारोऽन्तादेशः स्याज्झलादौ सनि इति। तदुक्तं महाभाष्यकारेण – 'यद्येवं नार्थो झल्ग्रहणेन। योगविभागः करिष्यते – जनसनखनाम्। अनुनासिकस्याकारो भवति झलि क्ङिति। ततः– सनि च। सनि च जनसनखनामनुनासिकस्याकारो भवति, झलीत्येव। तस्मान्नार्थो झल्ग्रहणेन।'[७] इति।

### ३.२.३ समीक्षणम्

वस्तुतः 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति' इति सूत्रात् झलि क्ङिति चेति पदद्वयस्य अनुवृत्तिः स्वीकर्तव्या एव। अतः प्रकृतसूत्रे झल्ग्रहणस्य आवश्यकता नास्ति। यतो हि

योगविभागेनैवात्र कार्यं सिध्यति। बालमनोरमाटीकाकारेणात्रोक्तं – 'जनसनखनां स'नित्याश्रित्य योगविभागेन उक्तार्थसिद्धिं चाश्रित्य झल्ग्रहणं त्वत्र सूत्रे प्रत्याख्यातं भाष्ये।'[८] इति।

### ३.३. यस्य हलः (पा.सू. ६.४.४९)

अस्मिन् सूत्रे पदद्वयं वर्तते। यस्य इति षष्ठ्येकवचनान्तं पदम्। हलः इति पञ्चम्येकवचनान्तं पदम्। 'अतो लोपः' (पा.सू. ६.४.४८) इति सूत्रात् लोपः इति पदमनुवर्तते। प्रकृतमिदं सूत्रम् आर्धधातुके (पा.सू. ६.४.४६) इत्यधिकारे वर्तते। तेन सूत्रार्थो भवति – हलः परस्य यशब्दस्य लोप आर्धधातुके इति। बेभिदिता, बेभिदितुं, बेभिदितव्यम् इत्याद्यत्रोदाहरणम्। यस्य इत्यनेन यवर्णस्य ग्रहणं कर्तव्यम् अथवा यकाराकाररूपसमुदायस्य ग्रहणं कर्तव्यमिति शङ्का भवति। अत्रोच्यते समुदायस्यैव ग्रहणं कर्तव्यम्, अन्यथा ईर्ष्यिता मव्यिता इत्यादावपि लोपः स्यात्। किञ्च 'यो हलः' इत्येव सूत्रं कुर्यात्, न तु 'यस्य हलः' इति। अत्र पुनः शङ्का भवति यत् यदि समुदायस्य ग्रहणं क्रियते तर्हि 'अलोऽन्त्यस्य' (पा.सू. १.१.५२) इति परिभाषासूत्रबलात् अन्त्यस्य अलः अकारस्यैव लोपः स्यात् न तु समुदायस्य। अत्रोच्यते 'अलोऽन्त्यस्य' इति परिभाषा अत्र न प्रवर्तते। यतो हि 'आदेः परस्य' (पा.सू. १.१.५४) इत्यनेन सूत्रेण समुदायस्य आदेः

यकारस्यैव लोपो भवति। अर्थात् 'अलोऽन्त्यस्य' इति सूत्रं प्रबाध्य 'आदेः परस्य' इति सूत्रं प्रवर्तते। अवशिष्टस्य अकारस्य तु 'अतो लोपः' (पा.सू. ६.४.४८) इत्यनेन सूत्रेण लोपो भवति।

'न धातुलोप आर्धधातुके' (पा.सू. १.१.४) इत्येकं गुणस्य वृद्धेश्च निषेधविधायकं सूत्रम् अस्ति। अस्य सूत्रस्यार्थः भवति धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः इति। लोलुवः इत्याद्यत्रोदाहरणम्। तथाहि लोलूय इति यङन्तात् धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.सू. ३.१.१३४) इति सूत्रेण कर्त्रर्थे अचि प्रत्यये विहिते लोलूय अ इति स्थिते 'यङोऽचि च' (पा.सू. २.४.७४) इति सूत्रेण अचि प्रत्यये परे यङः लुकि कृते लोलू अ इति जाते तमेवाच्प्रत्ययमाश्रित्य 'सार्वधातुकार्धधातुकयोः' इत्यनेन सूत्रेण लकारोत्तरस्य ऊकारस्य गुणः प्राप्नोति। तस्य प्रतिषेधः क्रियते 'न धातुलोप आर्धधातुके' इत्यनेन सूत्रेण। ततः उवङि लोलुवः इति सिध्यति।

**३.३.१ आक्षेपः**

महाभाष्यकारेण 'न धातुलोप आर्धधातुके' इति सूत्रं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति यत् लोलू अ इति स्थिते 'सार्वधातुकार्धधातुकयोः' इत्यनेन सूत्रेण लकारोत्तरस्य ऊकारस्य गुणः कथं निवार्यते इति।

### ३.३.२ योगविभागेन समाधानम्

लोलू अ इति स्थिते ‘सार्वधातुकार्धधातुकयोः’ इत्यनेन सूत्रेण लकारोत्तरस्य ऊकारस्य गुणः कथं निवार्यते इति आक्षेपसमाधानार्थं महाभाष्यकारेण ‘यस्य हलः’ इत्यस्मिन् सूत्रे योगविभागः स्वीकृतः। योगविभागं स्वीकृत्य अत्र गुणस्य वृद्धेः वा निषेधः क्रियते। तथाहि योगविभागः क्रियते चेत् ‘यस्य’, ‘हलः’ चेति सूत्रद्वयं सिध्यति। तत्र ‘यस्य’ इति प्रथमसूत्रे ‘अतो लोपः’ इति सम्पूर्णं सूत्रम् अनुवर्तते। तेन प्रथमसूत्रस्य अर्थः भवति – यस्य अकारस्य लोपः भवति आर्धधातुके प्रत्यये परे इति। ‘हलः’ इति द्वितीयसूत्रस्य अर्थो भवति – हलः परस्य यस्य लोपो भवति आर्धधातुके प्रत्यये परे इति। तत्र लूञ्-छेदने इति धातोः यङि कर्त्रर्थे अचि प्रत्यये अनुबन्धलोपे लू य अ इति स्थिते ‘यस्य’ इति प्रथमसूत्रेण यङ्प्रत्ययस्य अकारस्य लोपे द्वित्वे हलादिशेषे लूलूय् अ इति जाते ‘यङोऽचि च’ इत्यनेन यङ्प्रत्ययस्य अवशिष्टस्य अंशस्य यकारस्यापि लोपे अभ्यासस्य गुणे लोलू अ इति जाते अच्प्रत्ययं निमित्तरूपेण स्वीकृत्य ‘सार्वधातुकार्धधातुकयोः’ इति सूत्रेण इगन्तस्य अङ्गस्य ऊकारस्य गुणे प्राप्ते लुप्तस्य अकारस्य स्थानिवद्भावेन अङ्गस्य अदन्तत्वादयं गुणः न भवति। ततः ‘अचि श्नुधातुभ्रुवां य्वोरियङुवङौ’ (पा.सू. ६.४.७७) इत्यनेन सूत्रेण उवङि ततः

सौ लोलुवः इति सिध्यति। ननु अकारस्य स्थानिवद्भावाद् उवङादेशोऽपि न प्राप्नोति। अत्रोच्यते 'दीङो युडचि क्ङिति' (पा.सू. ६.४.६३) इति सूत्रात् अचि इति पदमनुवर्त्य 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यस्य सूत्रस्य अर्थो भवति 'श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोः भ्रू इत्यस्य च अङ्गस्य इयङुवङौ भवतः अजादि प्रत्यये परे, अच्प्रत्यये च परे' इति। तेन विधानसामर्थ्यादत्र उवङादेशो भवत्येव। तदुक्तं महाभाष्यकारेण – 'अल्लोपे योगविभागः करिष्यते – अतो लोपः। ततः यस्य, यस्य च लोपो भवति। अत इत्येव। किमर्थमिदम्। लुकं वक्ष्यति तद्बाधनार्थम्। ततः हलः, हल उत्तरस्य च यस्य लोपो भवतीति।'[१]

### ३.३.३ समीक्षणम्

वस्तुतः अत्र महाभाष्यकारेण 'यस्य हलः' इत्यत्र योगविभागं स्वीकृत्य 'न धातुलोप आर्धधातुके' इति सूत्रं प्रत्याख्यातम्। 'न धातुलोप आर्धधातुके' इति सूत्रस्वीकारपक्षे तु योगविभागस्य आवश्यकता नास्ति। परन्तु योगविभागः स्वीक्रियते चेत् 'न धातुलोप आर्धधातुके' इति सूत्रं न कर्तव्यम् इति लघुः भवति। अतः योगविभागः स्वीक्रियते चेदेव वरम्।

**३.४. अयामन्ताल्वाय्येत्न्विष्णुषु (पा.सू. ६.४.५५)**

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र अय् इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। आम्-अन्त-आलु-आय्य-इत्नु-इष्णुषु इति सप्तमीबहुवचनान्तं पदम्। 'णेरनिटि' (पा.सू. ६.४.५१) इति सूत्रात् णेः इति पदम् अनुवर्तते। तेन सूत्रार्थो भवति – आमन्त आलु आय्य इत्नु इष्णु इत्येतेषु परतः णेः अयादेशो भवति इति। क्रमेण उदाहरणानि यथा – कारयञ्चकार, हारयाञ्चकार, गण्डयन्तः, मण्डयन्तः, स्पृहयालुः, गृहयालुः, स्पृहयाय्यः, गृहयाय्यः, स्तनयित्नुः, पोषयिष्णुः, पारयिष्णवः इत्यादीनि।

'णेरनिटि' इति णेः लोपविधायकं सूत्रमस्ति। सूत्रेऽस्मिन् पदद्वयं वर्तते। णेः इति षष्ठ्येकवचनान्तं पदम्। अनिटि इति सप्तम्येकवचनान्तं पदम्। सूत्रमिदम् अङ्गाधिकारे वर्तते। 'आर्धधातुके' इत्यधिकारेऽपि सूत्रमिदं वर्तते। तेन सूत्रार्थो भवति – अनिडादावार्धधातुके परे णेर्लोपः स्याद् इति। कारकः, हारकः, कार्यते, हार्यते इत्याद्यत्रोदाहरणम्। सूत्रे अनिटि इति पदग्रहणसामर्थ्यात् कारयिता, हारयिता इत्यादौ सेटि आर्धधातुके णेः लोपो न भवति।

### ३.४.१ आक्षेपः

'णेरनिटि' इति सूत्रे अनिटि इति पदस्य ग्रहणं न कर्तव्यमिति महाभाष्ये प्रतिपादितम्।[१०] यदि सूत्रे अनिटि इति पदस्य ग्रहणं न क्रियते तर्हि कारयिता, हारयिता इत्यादौ सेटि आर्धधातुकेऽपि णेः लोपः स्यात्। तत्कथं णेः लोपस्य निषेधः प्रतिपाद्यते इति आक्षेपः सुतरामुदेति।

### ३.४.२ योगविभागेन समाधानम्

कारयिता, हारयिता इत्यादौ सेटि आर्धधातुके णेः लोपस्य निषेधार्थं महाभाष्यकारेण 'अयामन्ताल्वाय्येत्न्विष्णुषु' इति सूत्रे योगविभागः स्वीकृतः। अर्थात् प्रकृतसूत्रे योगविभागं स्वीकृत्य महाभाष्यकारेण कारयिता, हारयिता इत्यादौ णेः लोपः न भवतीति प्रतिपादितम्। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'अय्' इति प्रथमसूत्रम्। 'आमन्ताल्वाय्येत्न्विष्णुषु' इति अपरं सूत्रम्। 'अय्' इति प्रथमसूत्रे 'णेरनिटि' इति सूत्रात् 'णेः' इति पदमनुवर्तते। 'निष्ठायां सेटि' (पा.सू. ६.४.५२) इति सूत्रात् 'सेटि' इति पदमनुवर्तते। तेन सूत्रार्थो भवति – णेः अयादेशो भवति सेटि आर्धधातुके इति। 'आमन्ताल्वाय्येत्न्विष्णुषु' इति द्वितीयसूत्रस्य अर्थो भवति – आम् अन्त आलु आय्य इत्नु इष्णु इत्येतेषु परतो णेरयादेशो भवतीति। तत्र प्रथमसूत्रेण विधीयमानः अयादेशः लोपस्य अपवादः

अस्ति। तेन कारयिता इत्यादौ सेटि लोपापवादस्य अयादेशस्य विधानात् अनिटि लोपः सिद्धः एव। अतः 'णेरनिटि' इति सूत्रे अनिटि इति पदस्य ग्रहणं न कर्तव्यम्। तदुक्तं महाभाष्यकारेण – 'अथवा उपरिष्टाद्योगविभागः करिष्यते। इदमस्ति निष्ठायां सेटि जनिता मन्त्रे शमिता यज्ञे। ततः अय्। अयादेशो भवति णेः सेटि। ततः आमन्ताल्वाय्येत्न्विष्णुषु। अय् भवतीत्येव।'[११] इति।

### ३.४.३ समीक्षणम्

'निष्ठायां सेटि' इति सूत्रं नियमार्थं कृतमिति स्वीकृत्य निष्ठायामेव सेटि णेर्लोपो भवति, नान्यत्र सेटि, तेन कारयिता, हारयिता इत्यादौ निष्ठाभिन्ने सेटि णेर्लोपो न भवति। अतः 'णेरनिटि' इति सूत्रे अनिटि इति पदस्य ग्रहणं न कर्तव्यम्, इत्यपि वक्तुं न शक्यते। यतो हि सेटि एव निष्ठायाम् इति विपरीतनियमोऽपि सम्भवेत्। तथा च सति कारयिता, हारयिता इत्यादौ स्यादेव णिलोपः। अतः 'अयामन्ताल्वाय्येत्न्विष्णुषु' इत्यत्र योगविभागं स्वीकृत्य कारयिता, हारयिता इत्यादौ णिलोपाभावः प्रतिपादनीयः।

## ३.५. एरनेकाचोऽसंयोगपूर्वस्य (पा.सू. ६.४.८२)

सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। तत्र एः इति षष्ठ्येकवचनान्तं पदम्। अनेकाचः इत्यपि षष्ठ्येकवचनान्तं पदम्। असंयोगपूर्वस्य इत्यपि

षष्ठ्येकवचनान्तं पदम्। 'इणो यण्' (पा.सू. ६.४.८१) इति सूत्रात् यण् इति पदमनुवर्तते। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (पा.सू. ६.४.७७) इति सूत्रे श्नुधातुभ्रुवामिति द्वन्द्वनिर्देशेऽपि धातोरिति पृथक्कृत्य षष्ठ्यन्तमनुवर्तते न तु श्नुभ्रुवावपि, इवर्णाभावात्। धातोरित्यनुवृत्तं पदम् आवर्तते, एकमवयवषष्ठ्यन्तम्, अपरं स्थानषष्ठ्यन्तम्। एरिति पदं धातोरिति षष्ठ्यन्तस्य विशेषणमस्ति। अतः तदन्तविधिना इवर्णान्तधातोरित्यर्थः सम्भवति। अवयवषष्ठ्यन्तं धातोः इति पदम् असंयोगपूर्वस्येत्यत्र संयोगांशेऽन्वेति। धात्ववयवसंयोगः पूर्वः यस्मात्स धात्ववयवसंयोगपूर्वः, तद्भिन्नः असंयोगपूर्वः, तस्य असंयोगपूर्वस्य। असंयोगपूर्वस्य इति एः इत्यस्य विशेषणम्। अधिकारात् लब्धम् अङ्गस्य इति स्थानषष्ठ्यन्तधातुना विशेष्यते, तेन तदन्तविधिरपि भवति। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्राद् अचि इति पदमपि अनुवर्तते। अचि इति पदम् अङ्गाक्षिप्तस्य प्रत्ययस्य विशेषमस्ति। तदादिविधौ अजादौ प्रत्यये इति भवति। सूत्रस्यास्य अर्थः उक्तः सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन – 'धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्याऽनेकाचोऽङ्गस्य यणस्यादजादौ प्रत्यये परे' इति। यदङ्गम् अङ्गमनेकाच् अस्ति, तस्य अङ्गस्य अन्ते यदि इवर्णान्तः असंयोगपूर्वः धातुः विद्यते, तर्हि तस्य धातोः इवर्णस्य

अजादिप्रत्यये परे यणादेशः भवति इत्यपि अर्थः 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषाबलात् वक्तुं शक्यते। उदाहरणं यथा – सेनान्यौ, कुमार्यौ, कुमार्यः इत्यादि।

'असिद्धवदत्राभात्' (पा.सू. ६.४.२२) इत्येकमधिकारसूत्रमस्ति। अनेन सूत्रेण असिद्धवदतिदेशः क्रियते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र असिद्धवत् इति अव्ययपदम्, अत्र इत्यपि अव्ययपदम्, आभात् इति पञ्चम्येकवचनान्तं पदमस्ति। आभात् इति पदस्य अर्थः – 'भस्य' (पा.सू. ६.४.१२९) इति अधिकारस्य परिसमाप्तिपर्यन्तमिति। अर्थात् षष्ठाध्यायस्य परिसमाप्तिपर्यन्तमिति बोध्यम्। सूत्रे अत्र इति पदस्य अर्थः अस्ति समानाश्रये कर्तव्ये इति। अत्र आश्रयशब्देन मूलस्थानी, निमित्तानि च गृह्यन्ते। तेन सूत्रार्थो भवति – प्रकृतसूत्रादारभ्य षष्ठाध्यायस्य चतुर्थपादस्य समाप्तिपर्यन्तं यानि सूत्राणि सन्ति तानि सूत्राणि समानाश्रये कर्त्तव्ये असिद्धानि भवन्तीति। अर्थात् ययोः सूत्रयोः मध्ये समानाश्रयः वर्तते, ते परस्परयोः विषये असिद्धे भवतः। तेन एकेन सूत्रेण कृतं कार्यमपरस्य सूत्रस्य कृतेऽसिद्धं भवति। उदाहरणं यथा – आयन् इत्यादि। तथाहि इण्-गतौ इति अदादिगणीयात् धातोः लङि प्रथमपुरुषबहुवचनविवक्षायाम् इ झि इति स्थिते 'झोऽन्तः' (पा.सू. ७.१.३) इति सूत्रेण झ् इत्यस्य अन्त्-आदेशे,

शपि शपः लुकि, इ अन्ति इति जाते 'इणो यण्' (पा.सू. ६.४.८१) इति सूत्रेण इणः इकारस्य यणादेशे य् अन्ति इति जाते 'आडजादीनाम्' (पा.सू. ६.४.७२) इति आडागमः न प्राप्नोति अनजादित्वात्। 'असिद्धवदत्राभात्' इति सूत्रबलादत्र आडागमः भवति। यतो हि 'इणो यण्' तथा 'आडजादीनाम्' इति सूत्रयोः मध्ये समानाश्रयो वर्तते। अतः 'इणो यण्' इति सूत्रेण कृतः यणादेशः 'आडजादीनाम्' इति सूत्रदृष्ट्या असिद्धः अस्ति। अतः अजादित्वादत्र आडागमः भवति। तेन आडागमे आ य् अन्ति इति जाते 'इतश्च' (पा.सू. ३.४.१००) इति सूत्रेण इकारलोपे 'संयोगान्तस्य लोपः' (पा.सू. ८.२.२३) इति सूत्रेण तकारलोपे आयन् इति रूपं सिध्यति।

### ३.५.१ आक्षेपः

महाभाष्यकारेण 'असिद्धवदत्राभात्' इति सूत्रं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति आयन् इत्यादौ य् अन्ति इति जाते 'आडजादीनाम्' इति सूत्रेण आडागमः कथं भवतीति।

### ३.५.२ योगविभागेन समाधानम्

महाभाष्यकारेण 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रे योगविभागं स्वीकृत्य आयन् इत्यादौ शङ्कायाः समाधानं कृतम्। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'एरनेकाचः' इति प्रथमं सूत्रम्।

'असंयोगपूर्वस्य' इति द्वितीयं सूत्रम्। तत्र 'एरनेकाचः' इति प्रथमसूत्रस्य अर्थो भवति – एरनेकाच इणो यण् भवतीति। द्वितीयसूत्रस्य अर्थो भवति – एरनेकाच असंयोगपूर्वस्य यण् भवतीति। ननु प्रथमसूत्रस्य अर्थे अनेकाच् य इण् तस्य इकारस्य यण् भवतीत्युक्तम्। अत्र आक्षेपो भवति यत् इण् आटं विना कथम् अनेकाच् भवतीति। अत्रोच्यते यतो हि आटं विना इण् अनेकाच् न भवति अतः अत्र अनुमीयते यत् पूर्वम् आट् भवति, ततः परं यण् भवति। एवञ्चात्र योगविभागसामर्थ्यात् पूर्वमाट् सिध्यति। अत्र पुनः शङ्का भवति यत् प्रथमसूत्रे एः इत्यस्य का आवश्यकता यतो हि इणः इति पदं पूर्वसूत्रात् अनुवर्तते एव। अत्रोच्यते लावस्थायामड् इति पक्षे 'आडजादीनाम्' इति सूत्रस्य प्रत्याख्याने 'आयन्' इत्यादिरूपसिद्ध्यर्थम् अत्र एः इत्यस्य ग्रहणं कर्तव्यम्। अर्थात् 'इणो यण्' इत्यत्र एः इत्यपकृष्य इकाररूपो यः इण् इति व्याख्यानं कर्तव्यम्। किञ्च 'आटश्च' इत्यस्य स्थाने 'अटश्च' इति सूत्रं कर्तव्यम्। तेन अन्तरङ्गत्वात् वृद्धौ ऐकारे ऐ अन्ति इति जाते ऐकारस्य 'इणो यण्' इति यण् न भवति, यतो हि अत्र अनेकाच् इण् नास्ति। अतः अत्र 'एचोऽयवायावः' (पा.सू. ६.१.७८) इति सूत्रेण आयादेशे इकारनकारलोपे आयन् इति रूपं सिध्यति। अतः 'एरनेकाचः' इति प्रथमसूत्रे एः इति पदस्य आवश्यकता अस्ति। एवञ्च 'असिद्धवदत्राभात्'

इति सूत्रस्य आवश्यकता नास्तीति सिद्धम्। तदुक्तं महाभाष्यकारेण – 'इण्यणादेशश्चापि न प्रयोजयति। यणादेशे योगविभागः करिष्यते – इणो यण् भवति। ततः – एरनेकाचः, एरनेकाच इणो यण् भवति। ततः – असंयोगपूर्वस्य, असंयोगपूर्वस्य यणभवति, एरनेकाच इत्येव।'[१२] इति।

### ३.५.३ समीक्षणम्

अत्र यद्यपि 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रे योगविभागं स्वीकृत्य आयन् इत्यादिरूपं सम्भवति, परन्तु 'असिद्धवदत्राभात्' इति सूत्रस्य अन्यानि बहूनि प्रयोजनानि सन्ति, तेषां दोषाणामपि वारणं करणीयम्। महाभाष्ये 'असिद्धवदत्राभात्' इति सूत्रस्य अस्वीकारे ये दोषाः भवन्ति ते, तथा तेषां दोषाणां परिहाराः अपि विस्तरेण आलोचिताः। एवञ्च वस्तुतः अत्र अनेकपरिहाराश्रयणे प्रतिपत्तिगौरवदोषः भवति। अतः योगविभागापेक्षया 'असिद्धवदत्राभात्' इति सूत्रस्वीकारे एव लाघवम्। अतः 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रे योगविभागो नावश्यकः।

## ३.६. उतश्च प्रत्ययादसंयोगपूर्वात् (पा.सू. ६.४.१०६)

'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हिप्रत्ययस्य लुक्-विधायकं सूत्रमस्ति। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। तत्र उतः इति पञ्चम्येकवचनान्तं पदम्। च इति अव्ययपदम्। प्रत्ययात् इति

पञ्चम्येकवचनान्तं पदम्। असंयोगपूर्वात् इत्यपि पञ्चम्येकवचनान्तं पदम्। 'अतो हेः' (पा.सू. ६.४.१०५) इति सूत्रात् हेः इति पदमनुवर्तते। 'चिणो लुक्' (पा.सू. ६.४.१०४) इति सूत्रात् लुक् इत्यनुवर्तते। तेन सूत्रार्थो भवति – असंयोगपूर्वः यः उकारः तदन्तात् प्रत्ययात् परस्य हेः लुक् स्यादिति। उदाहरणं यथा – कुरु, चिनु इत्यादि।

'असिद्धवदत्राभात्' (पा.सू. ६.४.२२) इत्येकम् अधिकारसूत्रमस्ति। असिद्धवदतिदेशः क्रियतेऽनेन सूत्रेण। पदत्रयात्मके अस्मिन् सूत्रे असिद्धवत् इति अव्ययपदम्, अत्र इत्यपि अव्ययपदम्, आभात् इति पञ्चम्येकवचनान्तं पदमस्ति। आभात् इति पदस्य अर्थः – 'भस्य' (पा.सू. ६.४.१२९) इति अधिकारस्य परिसमाप्तिपर्यन्तमिति। तेन सूत्रार्थो भवति – प्रकृतसूत्रादारभ्य षष्ठाध्यायस्य समाप्तिपर्यन्तं यानि सूत्राणि सन्ति तानि सूत्राणि समानाश्रये कर्त्तव्ये असिद्धानि भवन्तीति। उदाहरणं यथा – जहि इत्यादि। तथाहि हन्धातोः मध्यमपुरुषैकवचने सिपि शपि शपः लुकि सेर्ह्यादेशे हन् हि इति जाते 'हन्तेर्जः' (पा.सू. ६.४.३६) इति सूत्रेण हन्धातोः जादेशे जहि इति रूपं भवति। अत्र जादेशे कृते तस्य अदन्तत्वात् 'अतो हेः' (पा.सू. ६.४.१०५) इति सूत्रेण अदन्तात् अङ्गात् परस्य हेः लोपः प्राप्नोति। 'असिद्धवदत्राभात्' इति सूत्रबलादत्र लोपः न भवति। यतो हि 'हन्तेर्जः' तथा 'अतो हेः' इति

सूत्रयोः मध्ये समानाश्रयो वर्तते। अतः 'हन्तेर्जः' इति सूत्रेण कृतः जादेशः 'अतो हेः' इति सूत्रदृष्ट्या असिद्धः अस्ति। अतः अदन्तत्वाभावादत्र हेर्लोपः न भवति। तेन जहि इत्येव रूपं भवति।

### ३.६.१ आक्षेपः

महाभाष्यकारेण 'असिद्धवदत्राभात्' इति सूत्रं प्रत्याख्यातम्। अतः अत्र आक्षेपो भवति यत् जहि इत्यादौ जादेशे कृते तस्य अदन्तत्वात् 'अतो हेः' इति सूत्रेण हेः लोपः कथं न भवतीति।

### ३.६.२ योगविभागेन समाधानम्

महाभाष्यकारेण 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति सूत्रे योगविभागं स्वीकृत्य जहि इत्यादौ शङ्कायाः समाधानं कृतम्। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'उतश्च' इति प्रथमसूत्रम्। 'प्रत्ययादसंयोगपूर्वात्' इति द्वितीयं सूत्रम्। अत्र द्वितीयसूत्रात् प्रत्ययादिति 'अतो हेः' इति पूर्वसूत्रेऽपि अन्वेति। तेन 'अतो हेः' इति सूत्रस्य अर्थो भवति – अकारान्तात् प्रत्ययात् परस्य हेः लुग् भवतीति। अतः 'जहि' इत्यत्र हेर्लुग् न भवति, यतो हि हन्तेः जादेशः न प्रत्ययः। अत्र एका शङ्का उदेति यत् 'प्रत्ययात्' इति द्वितीयं सूत्रम् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति'[१३] इति परिभाषया 'उतश्च' इत्यस्यैव शेषः स्यात् न तु 'अतो

हेः' इत्यस्यापीति। अत्रोच्यते – 'प्रत्ययादित्युभयोः शेषः' इति। अर्थात् 'उतश्च' इति योगविभागसामर्थ्यादत्र उभयत्र सम्बन्धः भवति। असंयोगपूर्वात् इत्येतत्तु व्यावर्त्यसम्भवात् 'उतश्च' इत्यनेनैव सम्बध्यते, न 'अतो हेः' इत्यनेन। तदुक्तं प्रदीपटीकायाम् – 'असंयोगपूर्वादित्यत्र तु भेदेनापेक्षणादानन्तर्यात् उत इति सम्बध्यते, न त्वत इति।'[१४] इति। एवञ्च 'असिद्धवदत्राभात्' इति सूत्रस्य आवश्यकता नास्तीति सिद्धम्। तदुक्तं महाभाष्यकारेण – 'जभावश्चापि न प्रयोजयति। हिलोपे योगविभागः करिष्यते – अतो हेः। ततः – उतश्च, हेर्लुग्भवतीति। ततः – प्रत्ययात्। प्रत्ययादित्युभयोः शेषः।'[१५] इति।

**३.६.३ समीक्षणम्**

वस्तुतः अत्र यद्यपि 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति सूत्रे योगविभागं स्वीकृत्य जहि इत्यादिरूपं सम्भवति, परन्तु 'असिद्धवदत्राभात्' इति सूत्रस्य अन्यानि बहूनि प्रयोजनानि सन्ति, तेषां दोषाणामपि वारणं करणीयम्। तेन अनेकपरिहाराश्रयणे प्रतिपत्तिगौरवदोषः स्यात्। अतः योगविभागापेक्षया 'असिद्धवदत्राभात्' इति सूत्रस्वीकारे एव लाघवम्। अतः 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति सूत्रे योगविभागस्य आवश्यकता नास्ति।

## ३.७. अल्लोपोऽनः (पा.सू. ६.४.१३४)

प्रकृतमिदं सूत्रम् अङ्गाधिकारे वर्तते। अस्मिन् सूत्रे पदद्वयं वर्तते। तत्र अल्लोपः इति प्रथमैकवचनान्तं पदम्। अनः इति षष्ठ्येकवचनान्तं पदम्। 'भस्य' (पा.सू. ६.४.१२९) इत्यधिकारे वर्तते सूत्रमिदम्। तेन सूत्रार्थो भवति– भसंज्ञकस्य अङ्गस्य अन्ते यः अन् तस्य अकारस्य लोपः स्यादिति। उदाहरणं यथा – दध्ना, दध्ने इत्यादि।

'श्वयुवमघोनामतद्धिते' (पा.सू. ६.४.१३३) इत्येकं सम्प्रसारणविधायकं सूत्रमस्ति। अस्य सूत्रस्यार्थो भवति – श्वन्, युवन्, मघवन् इत्येतेषां भसंज्ञकानामङ्गानां तद्धितभिन्ने प्रत्यये परे सम्प्रसारणं स्यादिति। शुनः, शुना, शुने, यूनः, यूना, यूने, मघोनः, मघोना, मघोने इत्याद्यत्रोदाहरणम्।

### ३.७.१ आक्षेपः

अत्र आक्षेपः उदेति यत् 'श्वयुवमघोनामतद्धिते' इति सूत्रेण मघवता, मघवते इत्यादौ किमर्थं सम्प्रसारणं न भवति, यतो हि 'मघवा बहुलम्' (पा.सू. ६.४.१२८) इत्यनेन सूत्रेण तृ इत्ययमादेशे कृतेऽपि एकदेशविकृतस्यानन्यत्वात् सम्प्रसारणं प्राप्नोत्येव। यदि अत्रोच्यते प्रकृतसूत्रेण विधीयमानं सम्प्रसारणं नकारान्तानां श्वादीनामेव भवति न तु अनकारान्तानाम्। मघवञ्छब्दस्य त्रादेशपक्षे तु अन्नन्तत्वं नास्ति। किञ्च

एकदेशविकृतन्यायेनापि अन्नन्तत्वं न सिध्यति, सामान्यातिदिशे विशेषानतिदेशात्। अत्र सामान्यकार्यं भवति मघवञ्छब्दकार्यं, अन्नन्तमघवञ्छब्दकार्यं भवति विशेषकार्यम्। अन्नन्तत्वं हि मघवञ्छब्दस्य विशेषधर्मः। यस्य स आदेशस्तत्त्वेन तद्ग्रहणं न्याय्यम्। आदेशश्चायं नकारस्य मघवञ्छब्दस्य वा, न तु अनः। अत्र छिन्नपुच्छदृष्टान्तमूलकः लौकिकन्यायेनापि अन्नन्तत्वं न सिध्यति, अर्धविकारेण प्रत्यभिज्ञानाभावात्। तदुक्तं नागेशेन – 'सर्वे सर्वपदादेशाः' इत्यनेनापि मघवन्शब्दस्यैव स्थानित्वं, नानः। अर्द्धविकारे प्रत्यभिज्ञाभावान्नैकदेशविकृतन्यायावसरः। ध्वनितञ्चेदं 'श्वयुव' इत्यत्र भाष्ये इत्याहुः।' इति।[१६] तेन मघवञ्छब्दस्य त्रादेशपक्षे मघवता, मघवते इत्यादौ 'श्वयुवमघोनामतद्धिते' इति सूत्रेण सम्प्रसारणं न भवति अन्नन्तत्वाभावात्। तर्हि अत्र पुनः आक्षेपो भवति यत् 'श्वयुवमघोनामतद्धिते' इति सूत्रेण विधीयमानं सम्प्रसारणं नकारान्तानां श्वादीनामेव भवति न तु अनकारान्तानामिति कथं सिध्यतीति।

### ३.७.२ योगविभागेन समाधानम्

मघवता, मघवते इत्यादौ सम्प्रसारणस्य निषेधार्थम् 'अल्लोपोऽनः' इति सूत्रे योगविभागः स्वीकृतः महाभाष्यकारेण। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। 'अल्लोपः' इति प्रथमसूत्रम्। 'अनः' इति द्वितीयं

सूत्रम्। अत्र 'अनः' इति द्वितीयं सूत्रं 'श्वयुवमघोनामतद्धिते' इति सूत्रेण विधीयमानस्य सम्प्रसारणस्य तथा 'अल्लोपः' इति सूत्रेण विधीयमानस्य लोपस्य च नियामकः अस्ति। तेन 'श्वयुवमघोनामतद्धिते' इति सूत्रस्य अर्थः– अन्नन्तानां श्वादीनामतद्धिते परे संप्रसारणं स्यात् इति सम्पद्यते। अतः मघवता, मघवते इत्यादौ त्रादेशे अन्नन्तत्वाभावात् सम्प्रसारणं न भवति। तथैव 'अल्लोपः' इति सूत्रस्य अर्थः – अन्नन्तस्य अकारस्य लोपः भवति इति सम्पद्यते। अत्र एका शङ्का उदेति यत् 'अनः' इति द्वितीयं सूत्रम् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति' इति न्यायाद् 'अल्लोपः' इत्यस्य अनन्तरस्यैव शेषः स्यात् न तु 'श्वयुवमघोनामतद्धिते' इत्यस्यापीति। अत्रोच्यते – 'अनः' इत्युभयोः शेषः इति। अर्थात् 'अनः' इति योगविभागसामर्थ्यादत्र सम्प्रसारणलोपयोः उभयोः नियामकः भवति। तदुक्तं महाभाष्यकारेण 'श्वयुवमघोनामतद्धिते' इति सूत्रस्य भाष्ये – 'उपरिष्टाद्योगविभागः करिष्यते। 'श्वयुवमघोनामतद्धिते' 'अल्लोपः', अकारस्य च लोपो भवति। ततः 'अनः' इत्युभयोः शेषः।'[१७] इति।

### ३.७.३ समीक्षणम्

वस्तुतः मघवता, मघवते, युवतीः पश्य इत्यादौ सम्प्रसारणस्य निषेधार्थम् 'अल्लोपोऽनः' इति सूत्रे योगविभागः स्वीकर्तव्यः।

काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'श्वादीनामेतत् संप्रसारणं नकारान्तानामिष्यते। इह न भवति – युवतीः पश्य। मघवतः। मघवता। मघवते। तदर्थमुत्तरत्र योगविभागं कुर्वन्ति। अल्लोपः। अनः। अन इत्युभयोः शेष इति।'[१८] इति। सिद्धान्तकौमुदीकारेण अत्र योगविभागः न आलोचितः। अपि तु 'अल्लोपोऽनः' इति सूत्रात् अनः इत्यपकृष्य 'श्वयुवमघोनामतद्धिते' इति सूत्रस्यार्थः कृतः। तदुक्तं सिद्धान्तकौमुद्याम् – 'अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात्।... अन्नन्तानां किम्। मघवतः। मघवता। स्त्रियां मघवती।'[१९] इति।

### ३.८. आतो धातोः (पा.सू. ६.४.१४०)

अस्मिन् सूत्रे पदद्वयं वर्तते। तत्र आतः इति षष्ठ्येकवचनान्तं पदम्। धातोः इत्यपि षष्ठ्येकवचनान्तं पदम्। आतः इति पदं धातोः इति पदस्य विशेषणमस्ति। तेन तदन्तपरिभाषात्र प्रवर्तते। 'अल्लोपोऽनः' (पा.सू. ६.४.१३४) इति सूत्रात् लोप इत्यनुवर्तते। प्रकृतमिदं सूत्रम् अङ्गाधिकारे वर्तते। भस्य (पा.सू. ६.४.१२९) इत्यधिकारोऽप्यत्र वर्तते। तेन सूत्रार्थो भवति – आकारान्तो यः धातुः तदन्तस्य भस्याङ्गस्य लोपः स्यादिति। अत्र अलोऽन्त्यपरिभाषया अन्त्यस्य अलः लोपः भवति। उदाहरणं यथा –

विश्वपः इत्यादि। विश्वपाभिः, विश्वपाभ्यामित्यादौ अभत्वात् अल्लोपो न भवति।

### ३.८.१ आक्षेपः

अत्र आक्षेपो भवति यत् धातोः इति पदस्य ग्रहणं किमर्थं कृतम् इति। यतो हि 'आतोऽनापः' इत्येवं सूत्रं क्रियते चेदेव रमा इत्यादिषु आबन्तेषु लोपव्यावृत्तिः सिध्यति। यदि अत्रोच्यते 'आतोऽनापः' इत्येवं सूत्रं क्रियते चेत् हाहा इत्यादौ अपि आकारलोपः स्यात्। अतः 'आतो धातोः' इति सूत्रं कृतम्। तर्हि अत्र पुनः आक्षेपो भवति यत् 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (पा.सू. ७.१.३७), 'हलः श्नः शानज्झौ' (पा.सू. ३.१.८३) इत्यादौ सूत्रे क्त्वः श्नः इत्येवं प्रयोगः कथं सिद्धः इति। यतो हि क्त्वा श्ना इत्येतौ न धातुसंज्ञकौ अपि तु आकारान्तप्रत्ययौ।

### ३.८.२ योगविभागेन समाधानम्

क्त्वा, श्ना इत्यादौ आकारलोपः प्रकृतसूत्रेण न प्राप्नोति धातुत्वाभावात्। परन्तु अत्र आकारलोपः आवश्यकः। अतः अत्र महाभाष्यकारेण योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'आतः' इति प्रथमं सूत्रम्। 'धातोः' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रस्य अर्थो भवति – आकारान्तस्य भस्य अङ्गस्य लोपः स्यादिति।

द्वितीयसूत्रस्य अर्थो भवति – आकारान्तो यः धातुः तदन्तस्य भस्याङ्गस्य लोपः स्यादिति। तेन 'आतः' इति प्रथमसूत्रेण क्त्वः, श्नः इत्येतेषां सिद्धिर्भवति। 'धातोः' इति द्वितीयसूत्रेण आबन्तव्यावृत्तिः तथा हाहादिव्यावृत्तिरपि सिध्यति। अत्र पुनः शङ्का भवति यत् 'आतः' इति प्रथमसूत्रेणैव सिद्धे 'धातोः' इति द्वितीयसूत्रं किमर्थम्। अत्रोच्यते – 'इदं नित्यार्थं सत्पूर्वेण विकल्पं ज्ञापयति। सा च व्यवस्थितविभाषा – इति आबन्तस्याल्लोपाभावः, अन्यस्य यथाप्रयोगं विकल्पः। तदुक्तं महाभाष्यकारेण – 'योगविभागः करिष्यते – आतः, आकारलोपो भवति। ततः – धातोः, धातोश्चाकारस्य लोपो भवतीति।'[२०] इति।

### ३.८.३ समीक्षणम्

वस्तुतः अत्र योगविभागः स्वीक्रियते चेदेव वरम्। यतो हि 'आतोऽनापः' इत्येवं सूत्रं क्रियते चेदपि क्त्वायाम् इत्यादौ अव्याप्तिर्दृश्यते एव। यदि तत्र 'क्त्वायां वा प्रतिषेधः' इति निपातनात् सिद्धमिति उच्यते तर्हि 'समासेऽनञ्पूर्वे क्त्वो ल्यप्', 'हलः श्नः शानज्झौ' इत्याद्यपि निपातनात् सिद्धमिति वक्तुं शक्यते। अतः अत्र 'आतोऽनापः' इति सूत्रकरणापेक्षया योगविभागस्वीकारः एव वरम्। तदुक्तं नागेशभट्टेन – 'परे तु क्त्वः श्नः इत्यादिसिद्ध्यर्थम् 'आतोऽनाप' इति वक्तव्यम् इत्युक्ते 'आत' इति

योगविभागेन तत्संसाध्य तत्प्रत्याख्यातं भाष्ये।'[२१] इति। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं काशिकायाम् – 'आत इति योगविभागः। तेन '...क्त्वो ल्यप्' (७.१.३७) 'हलः श्नः शानज्...' (३.१.८३) इत्येवमादि सिद्धं भवति।'[२२] इति। सिद्धान्तकौमुदीकारेणाप्यत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'आत इति योगाविभागादधातोरप्याकारलोपः क्वचित्। क्त्वः। श्नः।'[२३] इति।

### ३.९. आत्मनेपदेष्वनतः (पा.सू. ७.१.५)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र आत्मनेपदेषु इति षष्ठ्यर्थे सप्तमी। तेन आत्मनेपदावयवस्य झकारस्येति भवति। अनतः इति पञ्चम्येकवचनान्तं पदम्। न अत् अनत्, तस्माद् अनतः इति विग्रहः। 'झोऽन्तः' (पा.सू. ७.१.३) इति सूत्रात् झः इति षष्ठ्यन्तं पदमनुवर्तते। 'अदभ्यस्तात्' (पा.सू. ७.१.४) इति सूत्रात् अत् इत्यनुवर्तते। तेन सूत्रार्थो भवति – अनकारान्तादङ्गादुत्तरस्य आत्मनेपदेषु यो झकारः तस्य अत् इत्ययमादेशो भवतीति। उदाहरणं यथा – सुन्वते, अरुन्धत इत्यादि।

'उभे अभ्यस्तम्' (पा.सू. ६.१.५) इत्यनेन सूत्रेण अभ्यस्तसंज्ञा विधीयते। द्विपदात्मकेऽस्मिन् सूत्रे उभे इति प्रथमाद्विवचनान्तं पदम्। अभ्यस्तम् इति प्रथमैकवचनान्तं पदम्। 'एकाचो द्वे प्रथमस्य' (पा.सू.

६.१.१) इति सूत्रात् द्वे इति पदमनुवर्तते। 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति' इति परिभाषया अत्र षष्ठाध्याये विहितं द्वित्वमेव स्वीक्रियते। तेन सूत्रार्थो भवति – 'षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः' इति।

**३.९.१ आक्षेपः**

'उभे अभ्यस्तम्' इति सूत्रे उभे इति पदग्रहणसामर्थ्यादत्र सहभूतयोः सापेक्षयोरेव अभ्यस्तसंज्ञा भवति। ननु उभेग्रहणस्य अस्ति अन्यत् प्रयोजनम्। यत्र उभे शब्दरूपे श्रूयेते तत्रैव अभ्यस्तसंज्ञा यथा स्यात्, यत्र च उभे शब्दरूपे न श्रूयेते तत्र अभ्यस्तसंज्ञा न स्यात् तदर्थं उभेग्रहणं कृतम्। अन्यथा ईर्त्सन्ति, ईप्सन्ति, ईर्त्सन्, ईप्सन् इत्यादावपि अभ्यस्तसंज्ञा स्यात्, सति च अभ्यस्तसंज्ञायाम् अद्भावः प्रसज्येत। अतः 'उभे अभ्यस्तम्' इति सूत्रे सहभूतयोः परस्परापेक्षयोः अभ्यस्तसंज्ञा यथा स्यात् तदर्थं वार्त्तिककारेण – 'अभ्यस्तसंज्ञायां सहग्रहणम्' इति वार्त्तिकं स्वीकृतम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः 'अभ्यस्तसंज्ञायां सहग्रहणम्' इति वार्त्तिकं विना ईर्त्सन्ति, ईप्सन्ति, ईर्त्सन्, ईप्सन् इत्यादौ अद्भावः कथं न भवतीति आक्षेपो भवति।

### ३.९.२ योगविभागेन समाधानम्

वस्तुतः ईर्त्संन्ति, ईर्त्सन् इत्यादावपि अभ्यस्तसंज्ञायाम् अद्भावः प्रसज्येत इति यदुच्यते तस्य समाधानं महाभाष्यकारेण 'आत्मनेपदेष्वनतः' इति सूत्रे योगविभागं स्वीकृत्य कृतम्। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'आत्मनेपदेषु' इति प्रथमं सूत्रम्। 'अनतः' इति द्वितीयं सूत्रम्। 'आत्मनेपदेषु' इति प्रथमसूत्रे 'अदभ्यस्तात्' इति सूत्रात् अत् इति प्रथमैकवचनान्तं पदमागच्छति। तेन प्रथमसूत्रस्यार्थो भवति – आत्मनेपदेषु च अद् भवतीति। 'अनतः' इति द्वितीयं सूत्रम् उभयोः शेषः। तदुक्तं महाभाष्यकारेण – 'अद्भावे तावन्न दोषः। सप्तमे योगविभागः करिष्यते – इदमस्ति 'अदभ्यस्तात्' इति। तत आत्मनेपदेषु। आत्मनेपदेषु चाद्भवति। अनत इत्युभयोः शेषः।'[२४] इति।

### ३.९.३ समीक्षणम्

वस्तुतः अत्र योगविभागं विनापि 'उभे अभ्यस्तम्' इति सूत्रे सहग्रहणस्य आवश्यकता नास्तीति प्रतिपादयितुं शक्यते। यतो हि 'एकाचो द्वे प्रथमस्य' इति सूत्रात् द्वे इति पदमनुवर्तते। अत्र द्वे इति पदानुवृत्त्यैव संज्ञिलाभो भवति। एवञ्च संज्ञिलाभे सत्यपि यद् उभेपदस्य ग्रहणं तत् समुदायप्रतिपत्त्यर्थमस्तीति बोध्यम्। अतः समुदायस्यैव अभ्यस्तसंज्ञा

भवति, न तु प्रत्येकमिति ज्ञायते। तदुक्तं काशिकाकारेण – 'द्वे इति वर्तमान उभेग्रहणं समुदायसंज्ञाप्रतिपत्त्यर्थम्।'[२५] इति। तेन 'उभे अभ्यस्तम्' इति सूत्रे सहग्रहणस्य आवश्यकतापि नास्ति। एवञ्च योगविभागं विनापि 'अभ्यस्तसंज्ञायां सहग्रहणम्' इति वार्त्तिकप्रत्याख्यानं सम्भवति। अतः प्रकृतसूत्रे योगविभागस्य आवश्यकता नास्ति।

### ३.१०. षड्भ्यो लुक् (पा.सू. ७.१.२२)

'षड्भ्यो लुक्' इदं सूत्रम् अङ्गाधिकारे वर्तते। अस्मिन् सूत्रे पदद्वयं वर्तते। षड्भ्यः इति पञ्चमीबहुवचनान्तं पदम्। लुक् इति प्रथमान्तं विधेयबोधकं पदम्। 'जश्शसोः शिः' (पा.सू. ७.१.२०) इति सूत्रात् जश्शसोः इति पदम् अनुवर्तते। तेन सूत्रार्थो भवति – षट्-संज्ञकादङ्गात् परस्य जस्-प्रत्ययस्य शस्-प्रत्ययस्य च लुक् भवतीति। षट्-संज्ञाविधायकं सूत्रद्वयं वर्तते, 'ष्णान्ता षट्' (पा.सू. १.१.२४), 'डति च' (पा.सू. १.१.२५) चेति। 'ष्णान्ता षट्' इत्यस्मिन् सूत्रे ष्णान्तेति स्त्रीलिङ्गनिर्देशः कृतोऽस्ति। प्रकृते च न किञ्चित् स्त्रीलिङ्गं श्रूयते, संख्यायाः अन्यत् प्रकृतमपि नास्ति। अतः अत्र स्त्रीलिङ्गनिर्देशात् 'ष्णान्ता' इत्यनेन विशेषणेन संख्या विशिष्यते। तेन सूत्रार्थो भवति – षकारान्तानां तथा नकारान्तानां संख्यावाचिशब्दानां षट् संज्ञा विधीयते इति। उदाहरणं यथा – पञ्चन्, षष्, सप्तन्, अष्टन् इत्यादि।

एवमेव 'डति च' इत्यनेन सूत्रेण डतिप्रत्ययान्तानां शब्दानां षट् संज्ञा विधीयते। उदाहरणं यथा – कति इत्यादि। सत्याञ्च षट्संज्ञायां प्रकृतसूत्रेण षट्संज्ञकाद् अङ्गात्परस्य जस्-प्रत्ययस्य शस्-प्रत्ययस्य च लुक् भवति। उदाहरणं यथा – पञ्चन् इति प्रातिदिकात् जस्-प्रत्यये प्रकृतसूत्रेण जसः लुकि 'नलोपः प्रातिपदिकान्तस्य' (पा.सू. ८.२.७) इत्यनेन नकारस्य लोपे पञ्च इति रूपं सिध्यति। एवमेव षट्, सप्त, अष्ट, नव इत्यादिरूपं बोध्यम्।

**३.१०.१ आक्षेपः**

शतशब्दात् जसि 'जश्शसोः शिः' इति सूत्रेण जसः शिभावे 'नपुंसकस्य झलचः' (पा.सू. ७.१.७२) इति सूत्रेण नुमि 'सर्वनामस्थाने चासम्बुद्धौ' (पा.सू. ६.४.८) इति सूत्रेण उपधादीर्घे शतानि इति रूपं भवति। ननु 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति न्यायेन नुमोऽङ्गभक्तत्वात् शतन् इत्यस्य नान्तसंख्याशब्दत्वात् षट्संज्ञा स्यात्। सत्याञ्च षट्संज्ञायां 'षड्भ्यो लुक्' इति जसः लुक् प्राप्नोति। एवमेव अष्टानाम् इत्यादौ 'अष्टन आ विभक्तौ' इत्यनेन सूत्रेण अष्टनः आत्वे कृते नकारान्तत्वाभावात् षट्संज्ञा न स्यात्। षट्संज्ञाभावाच्च 'षट्चतुर्भ्यश्च' (पा.सू. ७.१.५५) इत्यनेन सूत्रेण आम्प्रत्ययस्य नुट् आगमः न स्यात्। तेन अष्टानाम् इत्यादिरूपं न सिध्येत्। अत्र आक्षेपसमाधानार्थं वार्त्तिककारेण 'षट्संज्ञायामुपदेशवचनम्' इति

वार्त्तिकमुक्तम्। उपदेशावस्थायां तु शतशब्दः न नान्तः, अपि तु 'नपुंसकस्य झलचः' इति सूत्रेण नुमि कृते एव नान्तो भवति। अतः उपदेशावस्थायां नान्तत्वाभावात् षट्संज्ञा न भवति। अतः शतानि इत्यादौ षट्संज्ञाभावात् प्रकृतसूत्रेण जसः लुक् न भवति। परन्तु महाभाष्यकारेण इदं वार्त्तिकं प्रत्याख्यातम्। अतः अत्र आक्षेपो भवति यत् शतानि, सहस्राणि इत्यादौ जसः लुक् कथं न भवतीति।

**३.१०.२ योगविभागेन समाधानम्**

अत्र आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'षड्भ्यः' इत्येकं सूत्रम्। 'लुक्' इति द्वितीयं सूत्रम्। 'षड्भ्यः' इति प्रथमसूत्रस्य अर्थो भवति – षड्भ्यश्च यदुक्तम् अष्टाभ्योऽपि तद्भवति इति। षड्भ्यो हि जश्शसोर्लुक्, नुट् चोक्तः। तत्र नुड्विधाने सावकाशमिदमौश्विधानेन निरवकाशेन बाध्यते इति जश्शसोर्न लुगिति बोध्यम्। औशश्च लुक् न भवति, तद्विधानवैयर्थ्यापत्तेः। 'लुक्' इति द्वितीयसूत्रस्य अर्थो भवति – लुक् च भवति षड्भ्यः इति। तदुक्तं भाष्ये – 'एवं तर्हि सप्तमे योगविभागः करिष्यते– अष्टाभ्य औश्। ततः षड्भ्यः। षड्भ्यश्च यदुक्तमष्टाभ्योऽपि तद्भवति। ततः लुक्। लुक् च भवति षड्भ्य इति।'[२६] इति।

### ३.१०.३ समीक्षणम्

वस्तुतः अत्र योगविभागः नावश्यकः। यतो हि शतानि इत्यादौ 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति परिभाषाबलात् सर्वनामस्थानसन्निपातकृतो नुम् न विहन्ति। तदुक्तं भट्टोजिदीक्षितेन – 'शतानि सहस्राणीत्यत्र संनिपातपरिभाषया न लुक्। सर्वनामस्थानसंनिपातेन कृतस्य नुमस्तदविघातकत्वात्।'[२७] इति। अर्थात् सर्वनामस्थानं परत्वेन उपजीव्य प्रवृत्तस्य नुमः सन्निपातपरिभाषया सर्वनामस्थानभूतजश्शसोर्लुकं प्रति निमित्तत्वाभावः इति बोध्यम्। किञ्च अष्टन आत्वे कृतेऽपि न हानिः, यतो हि 'अष्टाभ्य औश्' इत्यत्र दीर्घग्रहणं ज्ञापयति यत् कृतात्वस्याप्यष्टनः संज्ञा स्यादिति। यतो हि अष्टन् इति शब्दस्य आकारादेशे कृते अष्टा इत्यस्मात् परयोः जश्शसोः प्रत्यययोः 'षड्भ्यो लुक्' इत्यनेन लुकि प्राप्ते, तदपवादत्वेन औश् इति आदेशः विधीयते। काशिकाकारेणात्र उपदेशावस्थायां या ष्णान्ता सा षट्संज्ञा यथा स्यादित्येवमर्थमन्तग्रहणमिति स्वीकृतम्। तदुक्तं तेन – 'अन्तग्रहणमौपदेशिकार्थम्। तेनेह न भवति – शतानि। सहस्राणि। अष्टानामित्यत्र नुड् (७.१.५५) भवति।'[२८] इति।

## ३.११. णलुत्तमो वा (पा.सू. ७.१.९१)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र णल् इति प्रथमैकवचनान्तं पदम्। उत्तमः इत्यपि प्रथमैकवचनान्तं पदम्। वा इति अव्ययपदम्। 'गोतो णित्' (पा.सू. ७.१.९०) इति पूर्वसूत्रात् णित् इति पदमनुवर्तते। तेन सूत्रार्थो भवति – लिट्-लकारस्य उत्तमपुरुषैकवचनस्य णल् प्रत्ययः विकल्पेन णित् स्यादिति। लिट्-लकारस्य परस्मैपदस्य प्रत्ययानां स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (पा.सू. ३.४.८२) इत्यनेन सूत्रेण णल्-अतुस्-उस्-थल्-अथुस्-अ-णल्-व-म इत्येते आदेशाः भवन्ति। तत्र यथासंख्यन्यायेन उत्तमपुरुषैकवचनस्य मिप्-प्रत्ययस्य स्थाने णल् आदेशः भवति। अयञ्च णलादेशः स्वयमेव णित् अस्ति। परन्तु प्रकृतसूत्रेण णलः णित्त्वं विकल्पेन विधीयते। तेन णित्वाभावपक्षे 'अचो ञ्णिति' (पा.सू. ७.२.११५) इत्यनेन अजन्तस्य अङ्गस्य वृद्धिः तथा 'अतः उपधायाः' (पा.सू. ७.२.११६) इत्यनेन अङ्गस्य उपधायाः अकारस्य वृद्धिरपि न भवति। तेन रूपद्वयं भवति। उदाहरणं यथा – चकर, चकार, पपच, पपाच इत्यादि।

### ३.११.१ आक्षेपः

महाभाष्यकारेण णलः णित्करणं 'अचो ञ्णिति' इत्यनेन अजन्तस्य अङ्गस्य वृद्ध्यर्थम् इति प्रतिपाद्य अन्ते प्रत्याख्यातम्। तदुक्तं भाष्ये –

'अवश्यमत्र णकारो वृद्ध्यर्थः कर्तव्यः णितीति वृद्धिर्यथा स्यात्। नार्थो वृद्ध्यर्थेन णकारेण।' इति। अतः अत्र आक्षेपो भवति यत् णलः णित्करणं न स्वीक्रियते चेत् चकार, पपाच इत्यादौ वृद्धिः कथं भवतीति।

### ३.११.२ योगविभागेन समाधानम्

चकार, पपाच इत्यादौ वृद्धिः कथं भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'अल्' इति प्रथमं सूत्रम्। 'उत्तमो वा' इति द्वितीयं सूत्रम्। 'अल्' इति प्रथमसूत्रे 'गोतो णित्' इति पूर्वसूत्रात् णित् इति पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – अल् च णित् भवतीति। 'उत्तमो वा' इति द्वितीयसूत्रस्यार्थो भवति – उत्तमपुरुषस्यैकवचनस्य अल् वा णित् स्यादिति। उत्तमपुरुषस्यैकवचनस्य अलोऽपि नित्यं णित्त्वे प्राप्ते द्वितीयसूत्रेण विकल्प्यते इति बोध्यम्। तदुक्तं महाभाष्यकारेण – 'णित्त्वे योगविभागः करिष्यते – इदमस्ति गोतो णित्। ततः अल्, अल् च णिद्भवति। ततः उत्तमो वा इति।'[२९] इति। णित्त्वे इत्यत्र निमित्तसप्तमी। अर्थात् णित्त्वार्थमित्यर्थः। तेन चकर, चकार, पपच, पपाच इत्यादि रूपं सिध्यति।

### ३.११.३ समीक्षणम्

यद्यपि 'णलुत्तमो वा' इत्यत्र योगविभागं स्वीकृत्य णलः णित्करणं प्रत्याख्यातुं शक्यते तथापि णित्करणे एव लाघवं भवति। योगविभागपक्षे च गौरवं भवति। यतो हि योगविभागपक्षे सूत्रद्वयं स्वीकरणीयम्। अतः अत्र योगविभागः न क्रियते चेदेव वरम्।

### ३.१२. णेरध्ययने वृत्तम् (पा.सू. ७.२.२६)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र णेः इति षष्ठ्येकवचनान्तं पदम्। अध्ययने इति सप्तम्येकवचनान्तं पदम्। वृत्तम् इति प्रथमैकवचनान्तं पदम्। सूत्रस्यास्यार्थो हि – ण्यन्तस्य वृतेर्निष्ठायाम् अध्ययनार्थे वृत्तमितीडभावो णिलुक् च निपात्यते इति। उदाहरणं यथा – वृत्तो गुणो देवदत्तेन, वृत्तं पारायणं देवदत्तेन इत्यादि।

'निष्ठायां सेटि' (पा.सू. ६.४.५२) इत्येकं सूत्रमस्ति। अस्मिन् सूत्रे पदद्वयं वर्तते। निष्ठायाम् इति सप्तम्येकवचनान्तं पदम्। सेटि इत्यपि सप्तम्येकवचनान्तं पदम्। 'णेरनिटि' (पा.सू. ६.४.५१) इति सूत्रात् णेः इति पदमागच्छति। 'अतो लोपः' (पा.सू. ६.४.४८) इति सूत्रात् लोपः इति पदमनुवर्तते। तेन सूत्रार्थो भवति – निष्ठायां सेटि परतो णेर्लोपो भवतीति। उदाहरणं यथा – कारितम्, हारितम् इत्यादि।

### ३.१२.१ आक्षेपः

महाभाष्यकारेण 'निष्ठायां सेटि' इति सूत्रं प्रत्याख्यातम्। अतः आक्षेपो भवति यत् कारितं, हारितम् इत्यादौ णेः लोपः कथं भवतीति।

### ३.१२.२ योगविभागेन समाधानम्

कारितम्, हारितम् इत्यादौ णेः लोपः कथं भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण 'णेरध्ययने वृत्तम्' इति सूत्रे योगविभागः स्वीकृतः। योगविभागं स्वीकृत्य सूत्रत्रयं सम्पादितम्, तेषां क्रमविपर्ययश्च स्वीकृतः। तथाहि 'णेः' इति प्रथमं सूत्रम्। 'वृत्तम्' इति द्वितीयं सूत्रम्। 'अध्ययने' इति तृतीयं सूत्रम्। तत्र 'णेः' इति प्रथमसूत्रे 'श्वीदितो निष्ठायाम्' (पा.सू. ७.२.१४) इति सूत्रात् निष्ठायाम् इति पदमनुवर्तते। 'नेड् वशि कृति' (पा.सू. ७.२.८) इति सूत्रात् न इट् चेति पदद्वयमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – ण्यन्तादुत्तरायाः निष्ठाया इट् न भवतीति। तेन कारितं, हारितम् इत्यादि रूपं सिध्यति। 'वृत्तम्' इति द्वितीयसूत्रेण वृत्तमिति निपात्यते। अत्र निष्ठायां परे णेः लोपः निपात्यते। अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्र इति नियमार्थं निपातः क्रियते। तेन कारितं, हारितम् इत्यादौ णेः लोपः न भवति। किञ्च गुणप्रतिषेधश्च अनेन सूत्रेण निपात्यते। अर्थात् णिलोपे प्रत्ययलक्षणेन वृत्तम् इत्यत्र लघूपधगुणः प्राप्नोति, अतः लघूपधगुणस्य निषेधोऽपि अत्र

निपात्यते। अधुना प्रश्नो भवितुमर्हति यत् कैमर्थक्यात् तत्रैव नियमो भवति यत्र विधेयो नास्ति, 'वृत्तम्' इति द्वितीयसूत्रस्य तु गुणप्रतिषेधो विधेयः, तर्हि अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्र इति नियमः कथं सम्भवतीति। अत्रोच्यते 'वृत्तम्' इत्यत्र एकशेषः आश्रियते। तेन एकस्य नियमार्थत्वम् अपरस्य च गुणप्रतिषेधार्थत्वं सिध्यति। ततः 'अध्ययने' इति तृतीयसूत्रेण नियमः क्रियते यत् अध्ययने एव गुणप्रतिषेधो णिलोपश्च निपात्यते, नान्यत्र। अतः वर्तितमन्नं, वर्तिता भिक्षा इत्यादौ णिलोपः गुणनिषेधश्च न भवति। तदुक्तं महाभाष्ये – 'एवं तर्हि नार्थः सेड्ग्रहणेन, नापि सूत्रेण। कथम्? सप्तमे योगविभागः करिष्यते। इदमस्ति – निष्ठायाम्, नेट् भवति। ततः – णेः। ण्यन्तस्य निष्ठायां नेट् भवति। कारितम्। हारितम्। ततः – वृत्तम्। वृत्तमिति च निपात्यते। किं निपात्यते? णेर्निष्ठायां लोपो निपात्यते। किं प्रयोजनम्? नियमार्थम्। अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्र। क्व मा भूत्? कारितम्। हारितम्। इहापि तर्हि प्राप्नोति – वर्तितमन्नं, वर्तिता भिक्षा। ततः– अध्ययने। अध्ययने चेत् वृतिर्वर्तते।'[३०] इति।

### ३.१२.३ समीक्षणम्

'णेरध्ययने वृत्तम्' इति सूत्रं विभज्य यद्यपि 'निष्ठायां सेटि' इति सूत्रस्य प्रत्याख्यानं सम्भवति तथापि अस्मिन् पक्षे गौरवदोषः भवति। यतो हि अत्र

सूत्रत्रयं स्वीकरणीयं, किञ्च तेषां क्रमविपर्ययोऽपि स्वीकरणीयः। अपि च 'वृत्तम्' इति द्वितीयसूत्रस्य आवृत्तिः पुनः तस्य एकशेषः स्वीकरणीयः। एवञ्च महद्गौरवं स्यात्। अतः अत्र योगविभागः नावश्यकः। सिद्धान्तकौमुदीकारेण, काशिकाकारेण चात्र योगविभागः न स्वीकृतः, अपि तु 'निष्ठायां सेटि' इति सूत्रस्य प्रयोजनं प्रतिपादितम्।

### ३.१३. आर्धधातुकस्येड् वलादेः (पा.सू. ७.२.३५)

प्रकृतमिदं सूत्रमङ्गाधिकारे वर्तते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र आर्धधातुकस्य इति षष्ठ्येकवचनान्तं पदम्। इट् इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। वलादेः इति षष्ठ्येकवचनान्तं पदम्। तेन सूत्रार्थो भवति– वलादेः आर्धधातुकस्य इडागमो भवतीति। उदाहरणं यथा – बभूविथ, बभूव, बभूविव, बभूविम इत्यादि।

### ३.१३.१ आक्षेपः

'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' (पा.सू. ६.४.६२) इत्यनेन सूत्रेण स्य सिच् सीयुट् तासि इत्येतेषु भावकर्मविषयेषु परेषु उपदेशे अजन्तानामङ्गानां हन् ग्रह दृश् इत्येतेषां च चिण्वत् कार्यं विकल्पेन विधीयते, यदा चिण्वत् तदा इडागमोऽपि विधीयते। अतः अत्र आक्षेपो भवति यत् अयम् इडागमः कस्य भवतीति। यतो हि

षष्ठीनिर्दिष्टस्य आगमो भवति, प्रकृतेऽस्मिन् सूत्रे स्यादयस्तु सप्तमीनिर्दिष्टाः सन्ति। यदि उच्यते स्यादीनां श्रुतत्वात् अश्रुतकल्पनायाः गरीयस्त्वात् प्रकृतानां स्यादीनामेव इडागमः उचितः, तर्हि अत्र पुनः शङ्का उदेति यत् अनुवर्तमानम् अङ्गमपि अत्र प्रकृतम्, अतः अङ्गस्यापि इडागमः प्राप्नोति। अतः इडागमोऽयं कस्य भवतीति आक्षेपः तिष्ठत्येव।

### ३.१३.२ योगविभागेन समाधानम्

'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति सूत्रेण इडागमः कस्य भवतीति शङ्कायाः समाधानं महाभाष्यकारेण 'आर्धधातुकस्येड् वलादेः' इति सूत्रस्य योगविभागद्वारा कृतम्। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'आर्धधातुकस्येड्' इति प्रथमसूत्रम्। 'वलादेः' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रस्य अर्थो भवति – 'यो यावान्कश्चिदिडागमः स सर्व आर्धधातुकस्यैव भवति' इति। तेन 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति सूत्रेणापि आर्धधातुकस्यैव इडागमो भवति। तेन स्यादीनामेव इडागमो भवति, न तु अजन्तानामङ्गानां तथा हन् ग्रह दृश् इत्येतेषामपि। 'वलादेः' इति द्वितीयसूत्रस्य अर्थो भवति – वलादेः आर्धधातुकस्य इडागमो भवतीति। तदुक्तं महाभाष्यकारेण – 'एवं तर्हि सप्तमे योगविभागः करिष्यते–

आर्धधातुकस्येट् यावानिण् नाम स सर्व आर्धधातुकस्य भवतीति विज्ञेयम्। ततः वलादेः, वलादेरार्धधातुकस्येट् भवतीति।'[३१] इति।

### ३.१३.३ समीक्षणम्

वस्तुतः 'आर्धधातुकस्येड् वलादेः' इति सूत्रे योगविभागस्य आवश्यकता नास्ति। यतो हि 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति सूत्रे स्यादयः यद्यपि सप्तम्या निर्दिष्टाः, तथापि यथा 'हनश्च वधः' (पा.सू. ३.३.७६) इति पञ्चमीनिर्दिष्टोऽपि हन्तिः प्रत्ययमुत्पाद्यादेशेन सम्बन्धमनुभवन् षष्ठ्यन्ततां प्रतिपद्यते तथा स्यादयोऽपि यदा आगमेन सम्बन्धमनुभवन्ति तदा षष्ठ्यन्ततां प्रतिपद्यन्ते। अतः स्यादीनामेव इडागमो भवति। किञ्च स्यादीनामेव श्रुतत्वात् तत् परित्यज्य अश्रुतकल्पनाया नास्ति औचित्यम्। अपि च अनुवर्तमानस्य अङ्गस्य इति पदस्य अर्थः – अङ्गस्य निमित्तं यत् तस्य इति स्वीकृत्य स्यादीनामेव इडागमः सिध्यति। किञ्च लक्ष्यविरोधादपि न अङ्गस्य इडागमः। तदुक्तं काशिकाकारेण – 'यदा चिण्वत् तदेडागमो भवति। कस्य? स्यसिच्सीयुट्तासीनामेवेति वेदितव्यम्। ते हि प्रकृताः। अङ्गस्य तु लक्ष्यविरोधाद् न क्रियते।'[३२] इति। बालमनोरमाकारेणोक्तं – 'स्यादिषु परेषु अङ्गस्य इ'डिति नार्थः, 'आर्धधातुकस्येड्वलादे'रित्यत्र

'आर्धधातुके' इति योगं विभज्य 'यावानिट् स आर्धधातुकस्यैवे'ति भाष्ये उक्तत्वात्।'[३३] इति। नागेशभट्टेनोक्तं – 'इड्विधायके स्यादीनामिति विभक्तिविपरिणामः। अङ्गस्य तु नेट्। भाष्ये आर्धधातुकस्येति योगं विभज्य 'यावानिट् स आर्धधातुकस्यैवे'ति परिभाषणात्, लक्ष्यानुरोधाच्च।'[३४] इति।

### ३.१४. उपदेशेऽत्वतः (पा.सू. ७.२.६२)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र उपदेशे इति सप्तम्येकवचनान्तं पदम्। अत्वतः इति पञ्चम्येकवचनान्तं पदम्। अत् अस्य अस्तीति अत्वान्। अर्थात् ह्रस्वाकारवान् इत्यर्थः। 'आर्धधातुकस्येड् वलादेः' (पा.सू. ७.२.३५) इति सूत्रात् इट् इति पदमनुवर्तते। 'तासि च क्लृपः' (पा.सू. ७.२.६०) इति सूत्रात् तासि इति पदमनुवर्तते। 'अचस्तास्वत् थल्यनिटो नित्यम्' (पा.सू. ७.२.६१) इति सूत्रात् थलि, अनिटः, नित्यम् इति पदत्रयमनुवर्तते। 'न वृद्भ्यश्चतुर्भ्यः' (पा.सू. ७.२.५९) इति सूत्रात् न इति पदमनुवर्तते। तेन सूत्रार्थो भवति – उपदेशे यो धातुरकारवान् तासौ नित्यानिट् तस्मात् तासाविव थलीडागमो न भवतीति। उदाहरणं यथा – पक्ता पपक्थ, यष्टा इयष्ठ, शक्ता शशक्थ इत्यादि।

'ऋतो भारद्वाजस्य' (पा. सू. ७.२.६३) इत्यपि इटः निषेधविधायकमेकं सूत्रमस्ति। सूत्रेऽस्मिन् 'आर्धधातुकस्येड् वलादेः' इति सूत्रात् इट् इति

पदमनुवर्तते। 'तासि च क्लृपः' इति सूत्रात् तासि इति पदमनुवर्तते। 'अचस्तास्वत् थल्यनिटो नित्यम्' इति सूत्रात् थलि, अनिटः, नित्यम् इति पदत्रयमनुवर्तते। 'न वृद्भ्यश्चतुर्भ्यः' इति सूत्रात् न इति पदमनुवर्तते। तेन सूत्रार्थो भवति – ऋकारान्ताद् धातोर्भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटस्थलीडागमो न भवतीति। उदाहरणं यथा – स्मर्ता सस्मर्थ, ध्वर्ता, दध्वर्थ इत्यादि।

### ३.१४.१ आक्षेपः

'ऋतो भारद्वाजस्य' इति विधिसूत्रमिति स्वीकर्तुं न शक्यते। यतो हि विधिपक्षे पूर्वयोगाभ्यां नित्यः प्रतिषेधः स्यात्, न तु विकल्पेन इति दोषः। तथाहि 'अचस्तास्वत् थल्यनिटो नित्यम्' इत्यनेन सूत्रेण विवयिथ, विवेथ इत्यादौ, 'उपदेशेऽत्वतः' इत्येनन सूत्रेण पेचिथ, पपक्थ इत्यादौ थलि नित्ये प्रतिषेधे प्राप्ते पक्षे इड्विधेयः। किञ्च अस्य सूत्रस्य विधिपक्षे जहर्थ इत्यत्रापि विकल्पे इण्निषेधः स्यात्, इष्यते च नित्यः प्रतिषेधः। प्रकृतसूत्रस्य नियमार्थत्वं स्वीक्रियते चेत् न दोषः। यतो हि सूत्रस्य नियमपक्षे सूत्रार्थो भवति – ऋकारान्तस्यैव धातोर्भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटस्थलीडागमो न भवति नान्यस्येति इति। पूर्वसूत्रद्वयविषये थलि इड्विकल्पः नियमफलम्। ननु नियमफलमन्यथापि प्रतिपादयितुं शक्यते।

तथाहि 'अचस्तास्वत् थल्यनिटो नित्यम्' इति सूत्रे भारद्वाजग्रहणं करिष्यते। अर्थात् 'अचस्तास्वत् थल्यनिटो नित्यं भारद्वाजस्य' इति सूत्रं क्रियते। एतस्मात् सूत्राच्च 'उपदेशेऽत्वतः' इत्यस्मिन् सूत्रे भारद्वाजस्य इति पदमनुवर्तते। ततः केवलम् 'ऋतः' इति सूत्रं क्रियते। तदुक्तं महाभाष्ये – 'यदि पुनरयं भारद्वाजः पुरस्तादपकृष्येत – अचस्तास्वत् थल्यनिटो नित्यं भारद्वाजस्य। उपदेशेऽत्वतः। भारद्वाजस्य। तत ऋतः। भारद्वाजस्येति निवृत्तम्।'[३५] इति। अत्रोच्यते पूर्वयोगे भारद्वाजग्रहणं कृत्वा तस्यैव 'उपदेशेऽत्वतः' इत्यत्रानुवर्तनं कृत्वा प्रकृतेऽस्मिन् सूत्रद्वये यद्यपि थलि इड्विकल्पः सम्भवति तथापि अत्र तन्न करणीयम्। यतो हि एवं क्रियते चेत् भारद्वाजः स्वमतात् प्रच्यावितो भवति। तत्र भारद्वाजस्य मतं हि पेचिथ पपिथ इति इड् भवति। अन्येषां मतं तु पपक्थ पपाथ इति इडभावः। परन्तु पूर्वरीत्या विकल्पविधानं क्रियते चेत् भारद्वाजस्य मतं पपक्थ पपाथ इति, अन्येषां मतं पेचिथ पपिथ इति इटः भावः इति मतविपर्ययः स्यात्। ननु मतविपर्यये नास्ति कोऽपि दोषः। यतो हि नित्येषु शब्देषु विकल्पे विधौ विकल्पमात्रं प्रदर्शयितव्यम्। तत्र कस्य किं मतम् इति न ग्राह्यम्। एवं वक्तुं न शक्यते। यतो हि विकल्पप्रतिपादनाय वाग्रहणे एव कर्तव्ये पूजार्थमाचार्या उपादीयन्ते। सा चैव पूजा भवति यदि येनाचार्येण यः शब्दः स्मृतः स तेनैव

स्मृतत्वेन उपदिश्यते। एवं हि तस्य स्मर्तृत्वेन प्रमाणत्वेन स्तुतिः कृता भवति। अत एव 'अङ्गार्ग्यगालवयोः' (पा.सू. ७.३.९९) इत्यादौ सूत्रे अनेकाचार्योपादानम् अर्थवद्भवति, विकल्पविधानस्य एकाचार्योपादानेनापि सम्भवात्। अतः 'अचस्तास्वत् थल्यनिटो नित्यम्' इति सूत्रे भारद्वाजग्रहणं कृत्वा तदेव 'उपदेशेऽत्वतः' इत्यस्मिन् सूत्रे अनुवर्त्य विकल्पविधानं न करणीयम्। अतः प्रकृतसूत्रं नियमसूत्रमस्ति इत्येव स्वीकरणीयम्। परन्तु 'ऋतो भारद्वाजस्य' इति सूत्रस्य नियमार्थत्वं कथं स्यात्। यतो हि जहर्थ इत्यादौ इड्प्रतिषेधः अनेन सूत्रेण विधीयते। यतो हि जहर्थ इत्यत्र परत्वाद् गुणे रपरत्वे च अजन्तत्वाभावेन उपदेशे अकारवत्त्वाभावेन च 'अचस्तास्वत् थल्यनिटो नित्यम्', 'उपदेशेऽत्वतः' चेति सूत्राभ्याम् इण्निषेधो न प्राप्नोति। एवञ्च निषेधाप्राप्तेः 'ऋतो भारद्वाजस्य' इति सूत्रं निषेधविध्यर्थमेव स्यात्, न नियमार्थम्। अतः 'ऋतो भारद्वाजस्य' इति सूत्रस्य नियमार्थत्वं कथं सिध्यतीति आक्षेपः भवति।

### ३.१४.२ योगविभागेन समाधानम्

'ऋतो भारद्वाजस्य' इति सूत्रस्य नियमार्थत्वप्रतिपादनाय वार्त्तिककारेण 'योगविभागात्सिद्धम्' इति वार्त्तिकं स्वीकृतम्। महाभाष्यकारेणापि 'उपदेशेऽत्वतः' इति सूत्रे योगविभागं स्वीकृत्य 'ऋतो भारद्वाजस्य' इति

सूत्रस्य नियमार्थत्वं प्रतिपादितम्। योगविभागं कृत्वा उपदेशे इति पदस्य पूर्वसूत्रे च संयोजनं कृतम्। तथाहि 'अचस्तास्वत्थल्यनिटो नित्यमुपदेशे' इति प्रथमं सूत्रम्। 'अत्वतः' इति द्वितीयं सूत्रम्। एवञ्च हरत्यादीनां गुणरपरयोः कृतयोः अनजन्तत्वेऽपि उपदेशे अजन्तत्वात् प्रतिषेधे सिद्धे अस्य नियमार्थत्वोपपत्तिः। योगविभागद्वारा उपदेशग्रहणापकर्षः कार्यः। यस्य यो मुख्य उपदेशः तस्य स एवाश्रीयते तदभावे तु गौणोऽपि इत्यर्थः। यद्यपि स्थान्युपदेशग्रहणेऽपि उपदेशत्वमस्ति तथापि तदुपदेशे तासौ नित्यानिड्भावः। प्रत्यासत्या यदुपदेशोऽत्वान् तदुपदेशविशिष्टस्यैव तासौ नित्यानिड्ग्रहणमुचितम् इति बोध्यम्। तदुक्तं महाभाष्यकारेण – 'योगविभागः करिष्यते। अचस्तास्वत्थल्यनिटो नित्यमुपदेशे। ततः – अत्वतः। अत्वतश्चोपदेश इति।'[३६] इति।

### ३.१४.३ समीक्षणम्

वस्तुतः अत्र योगविभागं विनापि 'ऋतो भारद्वाजस्य' इति सूत्रस्य नियमार्थत्वं सम्भवति। 'उपदेशेऽत्वतः' इति सूत्राद् उपदेशे इति पदम् 'अचस्तास्वत्थल्यनिटो नित्यम्' इत्यस्मिन् सूत्रे अपकृष्य 'ऋतो भारद्वाजस्य' इति सूत्रस्य नियमार्थत्वं सिध्यति। सिद्धान्तकौमुदीकारेण अत्र

योगविभागः न स्वीकृतः। उपदेशे इति पदस्य अपकर्षणं कृत्वा अत्र नियमार्थत्वं प्रतिपादितम्।

### ३.१५. बहुवचने झल्येत् (पा.सू. ७.३.१०३)

अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र बहुवचने इति सप्तम्येकवचनान्तं पदम्। झलि इत्यपि सप्तम्येकवचनान्तं पदम्। एत् इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। 'अतो दीर्घो यञि' (पा.सू. ७.३.१०१) इति सूत्रात् अतः इति षष्ठ्यन्तं पदमनुवर्तते। अनुवर्तमानम् अतः इति पदम् अधिकारलब्धस्य अङ्गस्य विशेषणमस्ति। तेन 'येन विधिस्तदन्तस्य' (पा.सू. १.१.७२) इति तदन्तविधौ अदन्तस्याङ्गस्येत्यर्थः सम्भवति। 'सुपि च' (पा.सू. ७.३.१०२) इति सूत्रात् सुपि इति सप्तम्यन्तं पदमनुवर्तते। झलि इति सुपि इत्यस्य विशेषणम्। 'यस्मिन् विधिस्तदादावल्ग्रहणे'[३७] इति परिभाषाबलात् अत्र तदादिविधौ झलादौ सुपि इति भवति। तेन सूत्रार्थो भवति – बहुवचने झलादौ सुपि परे अकारान्तस्याङ्गस्य एकारादेशो भवतीति। उदाहरणं यथा– रामेभ्यः, वृक्षेभ्यः इत्यादि।

### ३.१५.१ आक्षेपः

वृक्षान्, प्लक्षान् इत्यादौ 'प्रथमयोः पूर्वसवर्णः' (पा.सू. ६.१.१०२) इति सूत्रं प्रबाध्य 'अतो गुणे' (पा.सू. ६.१.९७) इत्यनेन सूत्रेण पररूपं प्राप्नोति।

यतो हि नाप्राप्ते विध्यन्तरे तस्यारम्भात् सर्वापवादत्वात् पररूपं पूर्वसवर्णदीर्घं बाधते। अतः अत्र वार्त्तिककारेण 'प्रथमयोः पूर्वसवर्णः' इत्यस्मिन् सूत्रे योगविभागः स्वीकृतः। तत्र 'प्रथमयोः' इत्येकं सूत्रम्। 'पूर्वसवर्णः' इत्यपरं सूत्रम्। प्रथमसूत्रस्य अर्थो भवति – प्रथमयोः अकः सवर्णदीर्घो भवतीति। द्वितीयसूत्रस्यार्थो भवति – पूर्वसवर्णदीर्घो भवत्यकः प्रथमयोरिति। एवञ्च योगविभागद्वारा पररूपं बाधते। परन्तु अत्र योगविभागः स्वीक्रियते चेत् वृक्षान् प्लक्षान् इत्यादौ 'तस्माच्छसो नः पुंसि' (पा.सू. ६.१.१०३) इति सूत्रेण नत्वं न स्यात्। यतो हि तच्छब्देनात्र अनन्तरो दीर्घः परामृश्यते। वृक्षान् प्लक्षान् इत्यादौ दीर्घस्य अनन्तरत्वाभावात् नत्वं न स्यात्।

### ३.१५.२ योगविभागेन समाधानम्

अत्र महाभाष्यकारेण 'बहुवचने झल्येत्' इत्यस्मिन् सूत्रे योगविभागं स्वीकृत्य समाधानमुक्तम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'बहुवचने' इति प्रथमं सूत्रम्। 'झल्येत्' इति द्वितीयं सूत्रम्। 'बहुवचने' इति प्रथमसूत्रे 'अतो दीर्घो यञि' इति सूत्रात् अतः इति पदं, तथा दीर्घः इति पदञ्चानुवर्तते। तेन प्रथमसूत्रार्थो भवति – बहुवचने च अतो दीर्घो भवतीति। 'झल्येत्' इति द्वितीयसूत्रस्य अर्थो भवति – एकारश्च भवति बहुवचने झलीति। वृक्षशब्दात् जसि अनुबन्धलोपे वृक्ष अस् इति स्थिते

पूर्वस्य दीर्घविधानात् अत इति तपरकरणात् दीर्घात् पररूपाभावः। अतः जसि 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घः। किञ्चात्र 'दीर्घाज्जसि च' (पा.सू. ६.१.१०५) इति सूत्रेण पूर्वसवर्णदीर्घप्रतिषेधः। वृक्षशब्दात् शसि अनुबन्धलोपे वृक्ष अस् इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घः। यतो हि अत्र पूर्वसवर्णदीर्घः भवति, अतः 'तस्माच्छसो नः पुंसि' इत्यनेन सूत्रेण नत्वं सिध्यति। 'बहुवचने' इति प्रथमसूत्रेणाकारान्तस्य अङ्गस्य बहुवचने सुपि दीर्घविधानात् तत्र जश्शसोः पररूपं बाध्यते। झलादावेत्वं दीर्घस्य अपवादो भविष्यतीतीष्टं सिद्धम्। तदुक्तं महाभाष्ये – 'अथवा – सप्तमे योगविभागः करिष्यते। इदमस्ति – अतो दीर्घो यञि, सुपि च इति। ततो वक्ष्यामि – बहुवचने। बहुवचने च अतो दीर्घो भवति। ततः – झल्येत्। एकारश्च भवति बहुवचने झलीति।'[३८] इति।

### ३.१५.३ समीक्षणम्

अत्र योगविभागः नावश्यकः। यतो हि 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषाबलादेव 'अतो गुणे' इति सूत्रेण विहितं पररूपम् 'अकः सवर्णे दीर्घः' इति सूत्रमेव बाधते, न तु 'प्रथमयोः पूर्वसवर्णः' इति सूत्रमपि। काशिकाकारेण सिद्धान्तकौमुदीकारेणापि अत्र योगविभागः न स्वीकृतः। अनया परिभाषया एव तत्र समाधानं कृतम्।

### ३.१६. ह्रस्वस्य गुणः (पा.सू. ७.३.१०८)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र ह्रस्वस्य इति षष्ठ्येकवचनान्तं पदम्। गुणः इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। 'सम्बुद्धौ च' (पा.सू. ७.३.१०६) इति सूत्रात् सम्बुद्धौ इति पदमनुवर्तते। किञ्च सूत्रमिदम् अङ्गाधिकारे वर्तते। तेन सम्पूर्णं सूत्रं भवति ह्रस्वस्य अङ्गस्य सम्बुद्धौ गुणः इति। अतः सूत्रार्थो भवति – ह्रस्वान्तस्य अङ्गस्य गुणो भवति सम्बुद्धौ परे इति। सूत्रस्यास्य उदाहरणं यथा – हे हरे, हे वायो इत्यादि।

### ३.१६.१ आक्षेपः

अत्र आक्षेपः उदेति यत् हे कुमारि, हे ब्रह्मबन्धु इत्येवमादीनां ह्रस्वान्ताङ्गानां प्रकृतसूत्रेण गुणः किमर्थं न भवतीति। यदि उच्यते यत् 'अम्बार्थनद्योर्ह्रस्वः' (पा.सू. ७.३.१०७) ह्रस्ववचनसामर्थ्यादत्र गुणो न भवतीति, एतदपि वक्तुं न शक्यते। यतो हि ह्रस्ववचनस्य अन्यत् प्रयोजनमस्ति। तत्र ह्रस्ववचनस्य प्रयोजनं हि पृथग्विभक्तेः अनुच्चारणम्। तथाहि यदि 'अम्बार्थानां ह्रस्वः' इत्युक्त्वा 'नद्या गुणो ह्रस्वस्य च' इत्युच्यते तदा पृथगुच्चारयितव्या भवति। तदा विभक्तिद्वयोच्चारणाद् गौरवं स्यात्। अतः 'अम्बार्थनद्योर्ह्रस्वः' इत्यत्र ह्रस्वविधानं पृथग्विभक्तेरुच्चारणं यथा न करणीयं भवेत् तदर्थं, न तु गुणनिषेधार्थम्। ननु यदि ह्रस्वविधानं

गुणनिषेधार्थं न स्यादपि तु ह्रस्वविधानं नद्याः गुणविध्यर्थमेव स्यात् तर्हि ह्रस्वं विधाय गुणे विधीयमाने प्रक्रियागौरवं भवति, अतः लाघवार्थं साक्षाद् गुणं विदध्यात् – 'अम्बार्थानां ह्रस्वः' ततः 'नदीह्रस्वयोर्गुणः' इति। किञ्च साक्षाद् गुणे विधीयमाने पृथग्विभक्तेरुच्चारणं विनापि कार्यं सिध्यति। अतः पृथग्विभक्तेरुच्चारणं यथा न करणीयं भवेत् तदर्थं ह्रस्वविधानमिति वक्तुं न शक्यते। अतः 'अम्बार्थनद्योर्ह्रस्वः' इत्यत्र ह्रस्वविधानसामर्थ्यात् हे कुमारि, हे ब्रह्मबन्धु इत्यादौ गुणः न भवति। ननु 'नदीह्रस्वयोर्गुणः' इति उच्यते चेत् 'जसि च' (पा.सू. ७.३.१०९) इति सूत्रेण जसि प्रत्यये परे नद्याः अपि गुणः प्राप्नोति, एकसमासनिर्देशात् द्वयोरपि नदीह्रस्वयोः अनुवृत्तिप्रसङ्गात्। यद्यपि समासनिर्दिष्टस्यापि एकदेशानुवृत्तिः दृष्टा, यथा – 'दामहायनान्ताच्च' (पा.सू. ४.१.२७) इति सूत्रे 'संख्याव्ययादेर्ङीप्' (पा.सू. ४.१.२६) इति सूत्रात् केवलं संख्याशब्दस्यानुवृत्तिर्भवति, तथापि समाधानान्तरसम्भवात् नैतदाश्रितमिति बोध्यम्। तेन जसि नद्यः, कुमार्यः इत्यादि रूपं न स्यादपि तु गुणे कृते कुमारयः, नदयः इत्येवमनिष्टं रूपं स्यात्। एवञ्च ह्रस्ववचनसामर्थ्यात् हे कुमारि, हे ब्रह्मबन्धु इत्यादौ गुणः न भवति इति वक्तुं न शक्यते। अतः हे कुमारि, हे ब्रह्मबन्धु इत्येवमादीनां ह्रस्वान्ताङ्गानां प्रकृतसूत्रेण गुणः किमर्थं न भवतीति आक्षेपः तिष्ठत्येव।

## ३.१६.२ योगविभागेन समाधानम्

हे कुमारि, हे ब्रह्मबन्धु इत्येवमादीनां ह्रस्वान्ताङ्गानां प्रकृतसूत्रेण गुणः किमर्थं न भवतीति शङ्कायाः समाधानं महाभाष्यकारेण प्रकृतसूत्रे योगविभागं स्वीकृत्य क्रियते। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'ह्रस्वस्य' इति प्रथमं सूत्रम्। 'गुणः' इति द्वितीयं सूत्रम्। प्रथमसूत्रे 'अम्बार्थनद्योर्ह्रस्वः' इति सूत्रात् अम्बार्थनद्योः ह्रस्वस्य चेति पदद्वयमनुवर्तते। तेन प्रथमसूत्रस्य अर्थो भवति – अम्बार्थनद्योः ह्रस्वस्य ह्रस्वः भवति इति। अत्र अम्बार्थानां पुनः ह्रस्वविधानस्य फलाभावात् केवलं नदीविषयमेतत् ह्रस्वविधानमिति बोध्यम्। 'गुणः' इति द्वितीयसूत्रस्य अर्थो भवति – ह्रस्वस्य गुणः भवति इति। तत्र प्रथमसूत्रेण ह्रस्वस्य पुनः ह्रस्वविधानसामर्थ्यात् हे कुमारि, हे ब्रह्मबन्धु इत्यादौ 'गुणः' इति द्वितीयसूत्रेण गुणः न भवति। तदुक्तं महाभाष्ये – 'एवं तर्हि योगविभागः करिष्यते – अम्बार्थनद्योर्ह्रस्वः। ततो ह्रस्वस्य। ह्रस्वस्य च ह्रस्वो भवति। किमर्थमिदम्। गुणं वक्ष्यति तद्बाधनार्थम्। ततो गुणः। गुणश्च भवति ह्रस्वस्य इति।'[३९] इति।

### ३.१६.३ समीक्षणम्

वस्तुतः अत्र योगविभागः न कर्तव्यः। योगविभागं विनापि पूर्वसूत्रानुवृत्त्या अत्र शङ्कायाः समाधानं कर्तुं शक्यते। तथाहि 'ह्रस्वस्य गुणः' इति सूत्रे 'अम्बार्थनद्योः' 'ह्रस्वः' इति पदद्वयमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – अम्बार्थनद्योः ह्रस्वः, ह्रस्वस्य गुणः इति। 'अम्बार्थनद्योर्ह्रस्वः' इति सूत्रेण ह्रस्वे सिद्धे वाक्यभेदेन अम्बार्थनद्योः पुनर्ह्रस्वविधानं गुणबाधनार्थमेव स्यात्। अत एव महाभाष्यकारेणापि उक्तम् – 'अथवा ह्रस्वस्य गुणः इत्यत्र अम्बार्थनद्योर्ह्रस्वः इत्येतदनुवर्तिष्यते।'[४०] इति। एवञ्चात्र यथान्यासेऽपि अम्बार्थनद्योर्ह्रस्वः इत्यस्य अनुवृत्त्या दोषपरिहारः सम्भवति। अतः अत्र योगविभागस्य आवश्यकता नास्ति।

### ३.१७. ऋदृशोऽङि गुणः (पा.सू. ७.४.१६)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र ऋदृशः इति षष्ठ्येकवचनान्तं पदम्। अङि इति सप्तम्येकवचनान्तं पदम्। गुणः इति प्रथमैकवचनान्तं पदम्। सूत्रमिदम् अङ्गाधिकारे वर्तते। तेन सूत्रार्थो भवति – ऋवर्णान्तानाम् अङ्गानां दृशेश्च अङि परे गुणो भवतीति। उदाहरणं यथा – अकरत्, अदर्शत् इत्यादि।

### ३.१७.१ आक्षेपः

अत्र आक्षेपो भवति यत् दृशेः कस्य स्थाने गुणः भवतीति। यतो हि महाभाष्ये 'इको गुणवृद्धी' इति सूत्रे पक्षद्वयम् आलोचितं, तच्छेषपक्षः, तदपवादपक्षश्च। अत्र तच्छब्देन 'अलोऽन्त्यस्य' इति परिभाषा ग्राह्या। तत्र तच्छेषपक्षे प्रकृतमिदं सूत्रम्, 'अलोऽन्त्यस्य' इति सूत्रं च एकवाक्यतां सम्पादयति। तेन तच्छेषपक्षे प्रकृतसूत्रस्य अर्थो भवति – ऋवर्णान्तानाम् अङ्गानां दृशेश्च अलोऽन्त्यस्य अङि परे गुणो भवतीति। तदपवादपक्षे नानावाक्यं भवति। तथाहि – अलोऽन्त्यस्य विधयो भवन्ति, इको गुणवृद्धी अन्त्यस्य च अनन्त्यस्य च इति। अर्थात् तदपवादपक्षे इकः गुणो भवति, स इक् अन्त्यो वा भवतु, अनन्त्यो वा। तत्र महाभाष्यकारेण उभयपक्षे दोषाः प्रदर्शिताः। अन्ते च गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपस्थितं भवति इति मतं प्रतिपादितम्। परन्तु पदोपस्थितिपक्षे विशेषणविशेष्यभावस्य कामचारात् गौरवदोषो भवति। अतः तच्छेषपक्षस्वीकारे ये दोषाः भवन्ति तेषां समाधानं कृत्वा महाभाष्यकारेण तच्छेषपक्ष एव सिद्धान्तरूपेण स्वीकृतः। एवञ्चात्र तच्छेषपक्षे दृशेः गुणः न स्यात्। यतो हि दृशेः अन्त्यः शकारः अस्ति, न तु इक्। अतः दृशेः अनन्त्यस्य इकः गुणः कथं भवति इति आक्षेपः सुतरामुदेति।

**३.१७.२ योगविभागेन समाधानम्**

अत्र महाभाष्यकारेण तच्छेषपक्षे दृशेः अनन्त्यस्य इकः गुणः कथं भवतीति शङ्कायाः समाधानार्थं प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'उरङि गुणः' इति प्रथमं सूत्रम्। 'दृशेश्च' इति द्वितीयं सूत्रम्। तत्र प्रथमसूत्रस्य अर्थो भवति – ऋकारस्य गुणो भवति अङि परे। तेन अकरोत् इत्यादिरूपं सिध्यति। द्वितीयसूत्रे 'उरङि गुणः' इति प्रथमसूत्रात् उः इति पदस्य अनुवृत्तिः भवति। तेन द्वितीयसूत्रस्य अर्थो भवति – अङि परे दृशेः ऋकारस्य गुणो भवति इति। तेन अदर्शत् इत्यादिरूपं सिध्यति। तदुक्तं महाभाष्यकारेण – 'दृशेरपि योगविभागः करिष्यते – उरङि गुणः उः अङि गुणो भवति। ततो दृशेः दृशेश्चाङि गुणो भवति। उरित्येव।'[४१] इति।

**३.१७.३ समीक्षणम्**

वस्तुतः अत्र योगविभागः स्वीक्रियते चेदेव वरम्। महाभाष्यकारेण योगविभागं स्वीकृत्य तच्छेषपक्ष एव स्वीकृतः। यतो हि इकः इति पदोपस्थितिपक्षे इकः विशेषणविशेष्यभावस्य कामचारात् न हि कश्चिदपि पक्षे नियमः स्यात्। तेन गौरवदोषः स्यात्। तथाहि तत्र प्रकृतषष्ठ्यन्तपदोपस्थितषष्ठ्यन्तपदयोर्मध्ये विशेषणविशेष्यभावः कामचारात्

भवति। अर्थात् गृह्यमाणषष्ठ्यन्तपदेन इकं विशेषयितुम्, अथवा उपस्थितषष्ठ्यन्तेन इका गृह्यमाणं षष्ठ्यन्तपदं विशेषयितुं स्वतन्त्रता विद्यते। यथा – 'मिदेर्गुणः' (पा.सू. ७.३.८२) इत्यत्र गृह्यमाणषष्ठ्यन्तं मिदेः इति पदं विशेषणं तथा इकः इति उपस्थितषष्ठ्यन्तपदं विशेष्यम् इति स्वीक्रियते। तेन सूत्रस्यार्थो भवति – मिदेः अङ्गस्य इको गुणो भवति शिति प्रत्यये परे इति। 'जुसि च' (पा.सू. ७.३.८३) इत्यत्रोपस्थितं षष्ठ्यन्तं पदं विशेषणं तथा गृह्यमाणषष्ठ्यन्तम् अङ्गस्य इति पदं विशेष्यमिति स्वीक्रियते। तेन सूत्रार्थो भवति – जुसि च प्रत्यये परे इगन्तस्य अङ्गस्य गुणो भवतीति। एवं लक्ष्यानुसारम् इकः इति पदं कुत्रचित् विशेषणं भवति कुत्रचिच्च विशेष्यं भवति। तेन सर्वत्र लक्ष्ये कार्यसिद्धिर्भवति। परन्तु कुत्र विशेषणं भवति कुत्र च विशेष्यं भवतीति नास्ति कोऽपि नियमः। तेन विशेषणविशेष्यभावस्य कामचारात् गौरवदोषः सिध्यति। अतः अत्र योगविभागं स्वीकृत्य तच्छेषपक्ष एव स्वीकार्यः।

### ३.१८. हलादिः शेषः (पा.सू. ७.४.६०)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र हलादिः इति प्रथमैकवचनान्तं पदम्। शेषः इत्यपि प्रथमैकवचनान्तं पदम्। 'अत्र लोपोऽभ्यासस्य' (पा.सू. ७.४.५८) इति सूत्रात् अभ्यासस्य इति पदमनुवर्तते। प्रकृतमिदं सूत्रम्

अङ्गाधिकारे वर्तते। तेन अनुवृत्तिसहितं सम्पूर्णं सूत्रं भवति – अभ्यासस्य आदिः हल् शेषः इति। 'एकाचो द्वे प्रथमस्य' (पा.सू. ६.१.१) इति सूत्रेण षाष्ठद्वित्वप्रकरणे ये द्वे विहिते तयोर्मध्ये यः पूर्वः अस्ति तस्य 'पूर्वोऽभ्यासः' (पा.सू. ६.१.४) इत्यनेन सूत्रेण अभ्याससंज्ञा विधीयते। तादृशस्य अभ्याससंज्ञकस्य आदिः हल् शिष्यते, अन्ये हलो लुप्यन्ते इति सूत्रार्थः। उदाहरणं यथा – पपाठ, पपाच इत्यादि।

### ३.१८.१ आक्षेपः

अत्र शङ्का भवति यत् हलादिः इत्यत्र षष्ठीसमासः अस्ति उत कर्मधारयसमासः अस्ति। तथाहि यदि षष्ठीसमासः स्वीक्रियते तर्हि तस्य अर्थो भवति हलाम् आदिः हलादिः इति। तेन सूत्रार्थो भवति – अभ्यासस्य ये हलः तेषामादिः शिष्यते इति। तदा 'अक्षु व्याप्तौ' इति धातोः लिट्-लकारे आनक्ष, आनक्षतुः, आनक्षुः इत्यादि रूपं न सिध्यति। तथाहि अक्ष् इति धातोः अजादित्वाद् द्वितीयस्यैकाचोऽभावात् प्रथमस्यैकाचो द्विर्वचने कृते अक्ष् अक्ष् अ इति स्थिते ककारः यद्यपि अभ्यासादिः नास्ति, तथापि हलादिर्भवति, यतो हि ककारे षकारापेक्षत्वमादित्वमस्ति तेन तस्य शेषत्वं स्यात्, लोपः न स्यात्। अतः हलादिः इत्यत्र षष्ठीसमासः अस्तीति स्वीकर्तुं न शक्यते। कर्मधारयसमासः स्वीक्रियते चेत् तस्य अर्थो भवति हल् च

असौ आदिश्च इति हलादिः। तेन सूत्रार्थो भवति – अभ्यासस्य आदिः हल् शिष्यते अन्ये हलो लुप्यन्ते इति। तदा आटतुः आटुः इत्यादि रूपं न सिध्यति। यतो हि अट् अट् अतुस् इति स्थिते अट् इत्यस्य अभ्यासस्य आदिवर्णः हल् नास्ति, तेन टकारस्य लोपः न प्राप्नोति, आदिशेषनिमित्तत्वाल्लोपस्य। एवञ्चात्र षष्ठीसमासः स्वीकर्तव्यः उत कर्मधारयसमासः इति आक्षेपः उदेति।

### ३.१८.२ योगविभागेन समाधानम्

अत्र महाभाष्यकारेण योगविभागः स्वीकृतः। योगविभागेनात्र शङ्कायाः समाधानं कृतम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'हल्' इति प्रथमं सूत्रम्। 'आदिः शेषः' इति द्वितीयं सूत्रम्। तत्र 'हल्' इति प्रथमसूत्रे 'अत्र लोपोऽभ्यासस्य' इति सूत्रात् लोपः अभ्यासस्य चेति पदद्वयमनुवर्तते। अतः सूत्रार्थो भवति – अभ्यासस्य हल् लुप्यते इति। तेन आटतुः, आनक्षतुः इत्यादौ अभ्यासस्य हलः लोपः सिध्यति। 'आदिः शेषः' इति द्वितीयसूत्रे प्रथमसूत्रात् हल् इति पदमनुवर्तते। 'अत्र लोपोऽभ्यासस्य' इति सूत्रात् अभ्यासस्य इति पदमनुवर्तते। तेन द्वितीयसूत्रार्थो भवति – अभ्यासस्य आदिः हल् शिष्यते इति। तेन पपाठ, पपाच इत्यादौ अभ्यासस्य आदिः हल् शिष्यते। तदुक्तं

महाभाष्यकारेण – 'अथवा योगविभागः करिष्यते। 'ह्रस्वः'। ह्रस्वादेशो भवत्यभ्यासस्य। ततो 'हल्'। हल् च लुप्यतेऽभ्यासस्य। तत 'आदिः शेषः'। आदिशेषश्च भवत्यभ्यासस्य।'[४२] इति।

### ३.१८.३ समीक्षणम्

वस्तुतः अत्र लोपस्य आदिशेषनिमित्तत्वं नास्तीति स्वीकृत्य योगविभागं विनापि शङ्कायाः समाधानं कर्तुं शक्यते। तथाहि 'ह्रस्वः' इति सूत्रे 'अत्र लोपोऽभ्यासस्य' इति सूत्रात् अभ्यासस्य लोपः चेति पदद्वयमनुवर्तते। तेन 'ह्रस्वः' इति सूत्रस्य अर्थो भवति – अभ्यासस्य ह्रस्वः, लोपश्च भवति। तत्र ह्रस्वभाविनां ह्रस्वो, लोपभाविनां लोपो भवति। अत्र ह्रस्वश्रुत्या 'अचश्च' इति परिभाषा उपतिष्ठते। तेन अभ्यासस्य अचः ह्रस्वः विधीयते। अयं विधीयमानः ह्रस्वः दीर्घस्य ह्रस्वस्य च लोपबाधनार्थोऽस्ति। यतो हि तत्र विशेषाभावादचां हलां च लोपः विधीयते। ततश्च विधीयमानः ह्रस्वः लोपापवादार्थोऽस्ति। अयञ्च ह्रस्वः बभूव इत्यादौ दीर्घस्य, पपाठ इत्यादौ ह्रस्वस्य स्थाने भवन् सर्वस्य अचः लोपं निवर्तयति। तेन केवलं हल्विषय एव लोपः इति सिध्यति। अर्थात् अत्र लोपः आदिशेषनिरपेक्षः अस्ति इति सिध्यति। एवञ्च आदेः हलोऽपि लोपः प्राप्नोति तन्निषेधार्थं 'हलादिः शेषः' इति सूत्रं क्रियते। सूत्रस्यास्य अर्थो भवति – अभ्यासस्य

आदिः हल् शिष्यते इति। अर्थात् अत्र अन्ये हलो लुप्यन्ते इति अधिकोऽर्थः नास्ति, अपि तु 'ह्रस्वः' इति सूत्रेण प्राप्तस्य लोपस्य निषेधो विधीयतेऽनेन सूत्रेण। तदुक्तं काशिकायाम् – 'आदिशेषनिमित्तोऽयमनादेर्लोपो विधीयते। तत्र अभ्यासजातेः आश्रयणात् क्वचिदपि वर्तमानो हलादिः अनादेः सर्वत्र निवृत्तिं करोति। अपरे तु ब्रुवते – शेषशब्दोऽयं निवृत्त्या विशिष्टमवस्थानमाह। तदवस्थानमुक्तितो यद्यपि प्रधानम्, अविधेयत्वात् तु तदप्रधानम्। निवृत्तिरेव तु विधेयत्वात् प्रधानम्। तत्र अयमर्थोऽस्य जायते – अभ्यासस्य अनादेर्हलो निवृत्तिः भवतीति। सा किम् इति आदेरविधेयां सतीमनिवृत्तिमपेक्षिष्यते इति।'[४३] इति। अत्र नागेशभट्टेनोक्तं – 'यद्यपि 'अभ्यासस्यादिर्हल् शिष्यते' इति वाक्ये आदिहल्वत एव ग्रहणात् प्रत्यासत्त्या शेषग्रहणसामर्थ्यलभ्याऽभ्यासस्यान्ये हलो लुप्यन्त इति वाक्ये तादृशस्यैवाभ्यासस्य ग्रहणं प्राप्नोति तथापि लक्ष्यानुसाराद्व्याप्तिन्यायाश्रयेण अभ्यासमात्रग्रहणं बोध्यम्। यद्वा संहितापाठेऽहलादिः शेष इति छेदः। अभ्यासस्याऽहल्, हलभावो भवति, यश्चादिः स तत्र शिष्यते इत्यर्थान्न दोषः। आदेर्हलः शेषोक्तेः प्रत्यासत्त्याऽन्यस्य हल एव लोपः, इतरनिवृत्तिपूर्वकावस्थाने शेषशब्दस्य वृत्तेरित्याशयेनाह – अन्ये हल इति।'[४४] इति।

१ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. १३६

२ तदेव, द्वितीयभागः, पृ.सं. २६०

३ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. २८१

४ तदेव., प्रदीपः, पृ.सं. २८१

५ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ६८०

६ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, त.बो., पृ.सं. २६०

७ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. ३०४

८ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, बा.म.र., पृ.सं. १८५

९ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. २०८

१० तदेव, पञ्चमभागः, पृ.सं. ३१५

११ तदेव, पृ.सं. ३१६

१२ तदेव, पृ.सं. २८८

१३ प.भा.शे., सम्पा. विश्वनाथमिश्रः, पृ.सं. २९०

१४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः,प्रदीपः, पृ.सं. २८९

१५ तदेव, पृ.सं. २८९

१६ ल.श.शे., सम्पा. बालशास्त्री, द्वितीयभागः, पृ.सं. ४१२

१७ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. ३५१

१८ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ७०६

१९ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. २५३

२० व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. ३५३

२१ ल.श.शे., सम्पा. बालशास्त्री, द्वितीयभागः, पृ.सं. २२६

२२ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ७०७

२३ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. १६९

---

२४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. १९
२५ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ५४०
२६ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. ३१३
२७ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. २५८
२८ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ११
२९ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, तृतीयभागः, पृ.सं. २८०
३० तदेव, पञ्चमभागः, पृ.सं. ३१७
३१ तदेव, पृ.सं. ३२३
३२ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ६९१
३३ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, बा.म.र., पृ.सं. ३४३
३४ तदेव, ल.श.शे., पृ.सं. ३४३
३५ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. १४२
३६ तदेव, पृ.सं. १४३
३७ प.भा.शे., सम्पा. विश्वनाथमिश्रः, पृ.सं.१३९
३८ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. ११४
३९ तदेव, षष्ठभागः, पृ.सं. २२८
४० तत्रैव
४१ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. १९०
४२ तदेव, षष्ठभागः, पृ.सं. २५४
४३ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ८१७
४४ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, ल.श.शे., पृ.सं. १५

* * *

# चतुर्थोऽध्यायः

## पदाधिकारस्थानां योगविभागानां समीक्षा

पाणिनीयव्याकरणे वर्णानां शब्दानां च संक्षेपेण निर्देशार्थं नैकाः संज्ञाः व्यवहृताः। तासु अन्यतमा अस्ति पदम् इति संज्ञा। 'अपदं न प्रयुञ्जीत' इति वचनानुसारं संस्कृतभाषायां वाक्येषु केवलं पदसंज्ञकस्यैव प्रयोगः भवति। ये शब्दाः पदसंज्ञकाः न सन्ति तेषां प्रयोगः वाक्ये नैव करणीयः इति अस्य नियमस्य आशयः। पदशब्देन 'शक्तं पदम्' इत्यनुसारं शक्तिविशिष्टस्यापि ग्रहणं भवति। अर्थात् यस्मिन् शब्दे अर्थाभिधानस्य शक्तिः वर्तते, तत् शब्दस्वरूपं पदशब्देन गृह्यते। एवञ्च शाब्दबोधे बहुत्र प्रत्ययानाम्, प्रातिपदिकानां, धातूनाञ्च निर्देशः दृश्यते। तत्र तेषां शक्तिग्राहकत्वात्पदत्वं स्वीकृत्य व्यवहारः दृश्यते। 'सुप्तिङन्तं पदम्'(पा.सू.१.४.१४)इति सूत्रादारभ्य 'स्वादिष्वसर्वनामस्थाने' (पा.सू. १.४.१७) इति सूत्रपर्यन्तं चतुर्भिः सूत्रैः पदसंज्ञा विधीयते। यद्यपि अष्टाध्याय्यां पदसंज्ञाविधायकानि चत्वारि सूत्राणि सन्ति, तथापि 'अपदं न प्रयुञ्जीत' इति वचने प्रयुक्तः पदम् इति शब्दः केवलं प्रथमसूत्रेण विहितायाः पदसंज्ञायाः एव बोधकः अस्ति। तत्र प्रथमसूत्रेण सुप्प्रत्ययान्तशब्दानां तिङ्प्रत्ययान्तशब्दानां च पदसंज्ञा विधीयते। अष्टाध्याय्यां 'पदस्य' (पा.सू. ८.१.१६) इत्यनेन सूत्रेण पदाधिकारः विधीयते। 'अपदान्तस्य मूर्धन्यः' (पा.सू. ८.३.५५) इति सूत्रं यावत् पदाधिकारो वर्तते। अस्मिन् अधिकारे सप्तसूत्राणां योगविभागः समीक्षितः। तत्रापि 'रदाभ्यां

निष्ठातो नः पूर्वस्य च दः’ इत्यस्य पदाधिकारस्थस्य सूत्रस्य योगविभागः ‘एकः पूर्वपरयोः’ (पा.सू. ६.१.८४) इत्यस्मिन् सूत्रभाष्ये आलोचितः।

## ४.१. सामान्यवचनं विभाषितं विशेषवचने (पा.सू. ८.१.७३)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र सामान्यवचनम् इति प्रथमैकवचनान्तं पदम्। विभाषितम् इत्यपि प्रथमैकवचनान्तं पदम्। विशेषवचने इति सप्तम्येकवचनान्तं पदम्। ‘आमन्त्रितं पूर्वमविद्यमानवत्’ (पा .सू. ८.१.७२) इति सूत्रात् आमन्त्रितम्, पूर्वम्, अविद्यमानवत् चेति पदत्रयमनुवर्तते। आमन्त्रिते, समानाधिकरणे चेति पदद्वयं पूर्वसूत्रादनुवर्तते। सम्बोधने या प्रथमा तदन्तस्य ‘सामन्त्रितम्’ (पा.सू. २.३.४८) इत्यनेन सूत्रेण आमन्त्रितसंज्ञा विधीयते। प्रकृतमिदं सूत्रं ‘पदस्य’ (पा.सू. ८.१.१६) इत्यधिकारे वर्तते। तेन सूत्रार्थो भवति – विशेषवचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वमामन्त्रितं बहुवचनान्तं विभाषितम् अविद्यमानवद् भवति इति। एवञ्च पूर्वं विद्यमानम् आमन्त्रितान्तं पदम् पक्षे विद्यमानवद् भवति , अपरपक्षे च अविद्यमानवद् भवति। तेन देवाः शरण्याः, देवाः शरण्याः, ब्राह्मणा वैयाकरणाः, ब्राह्मणा वैयाकरणाः इत्यादौ विद्यमानपक्षे द्वितीयस्य अनुदात्तत्वं भवति, अविद्यमानपक्षे च द्वितीयस्य अनुदात्तत्वं न भवति।

'नामन्त्रिते समानाधिकरणे' (पा.सू. ८.१.७३) इत्येकम् अविद्यमानवत्त्वस्य प्रतिषेधविधायकं सूत्रमस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र न इति अव्ययपदम्। आमन्त्रिते इति सप्तम्येकवचनान्तं पदम्। समानाधिकरणे इत्यपि सप्तम्येकवचनान्तं पदम्। 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वसूत्रात् आमन्त्रितम्, पूर्वम्, अविद्यमानवत् चेति पदत्रयमनुवर्तते। तेन सूत्रार्थो भवति – समानाधिकरणे आमन्त्रितान्ते परे पूर्वं विद्यमानम् आमन्त्रितान्तम् अविद्यमानवन्न भवतीति। 'आमन्त्रितं पूर्वमविद्यमानवत्' इति सूत्रेण विहितस्य अविद्यमानवत्त्वस्य प्रकृतसूत्रेण प्रतिषेधः क्रियते। तेन अग्ने गृहपते, माणवक जटिलकाध्यापक इत्यादौ पूर्वस्य विद्यमानवत्त्वात् परः अनुदात्तः भवति।

### ४.१.१ आक्षेपः

'नामन्त्रिते समानाधिकरणे' इत्यनेन सूत्रेण समानाधिकरणे आमन्त्रितान्ते परे आमन्त्रितान्तस्य अविद्यमानवत्त्वनिषेधः विधीयते तर्हि अघ्न्ये देवि सरस्वति इडे काव्ये विहव्ये इत्यादावपि पूर्वं विद्यमानस्य आमन्त्रितान्तस्य अविद्यमानवत्त्वनिषेधः स्यात्। यतो हि पर्यायशब्दानामपि सामानाधिकरण्यम् अस्त्येव। समानार्थत्वं हि सामानाधिकरण्यं, तेन पर्यायशब्दानां सामानाधिकरण्यं सिध्यति। तेन अविद्यमानत्त्वस्य निषेधे

अर्थात् विद्यमानत्वे सति 'आमन्त्रितस्य च' (पा.सू.८.१.१९) इत्यनेन अष्टमाध्यायस्थेन सूत्रेण पदात्परस्यापादादिस्थितस्य आमन्त्रितस्य सर्वमनुदात्तं स्यात्।

### ४.१.२ योगविभागेन समाधानम्

अघ्न्ये देवि सरस्वति इडे काव्ये विहव्ये इत्यादौ पूर्वं विद्यमानस्य आमन्त्रितान्तस्य अविद्यमानवत्त्वनिषेधः यथा न स्यात् तदर्थं महाभाष्यकारेण 'सामान्यवचनं विभाषितं विशेषवचने' इति सूत्रे योगविभागः स्वीकृतः, किञ्च योगविभागं कृत्वा सामान्यवचनम् इति पदं पूर्वसूत्रे संयोजितम्। तदुक्तं महाभाष्यकारेण – 'योगविभागः करिष्यते – नामन्त्रिते समानाधिकरणे सामान्यवचनम्। ततो विभाषितं विशेषवचने इति'।[१] एवञ्च योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तेन – 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति प्रथमं सूत्रम्। 'विभाषितं विशेषवचने' इति द्वितीयं सूत्रम्। प्रथमसूत्रस्य अर्थो भवति – समानाधिकरणे आमन्त्रितान्ते परे पूर्वं विद्यमानम् आमन्त्रितान्तं सामान्यवचनम् अविद्यमानवन्न भवतीति। पर्यायशब्दानां समानाधिकरणत्वेऽपि सामान्यवचनत्वं न सिध्यति। यतो हि सामान्यस्य विशेषापेक्षत्वं वर्तते। परस्य आमन्त्रितस्य विशेषत्वे पूर्वं सामान्यवचनं भवति नान्यथा। अतः सामान्यवचनत्वाभावात् 'नामान्त्रिते

समानाधिकरणे सामान्यवचनम्' इत्यनेन सूत्रेण अविद्यमानवत्त्वस्य प्रतिषेधो न भवति। अतः 'आमन्त्रितं पूर्वमविद्यमानवत्' इत्यनेन पूर्वसूत्रेण तेषामविद्यमानत्वं सिध्यति। तेन परं प्रति पूर्वस्य अविद्यमानत्वात् पदात्परत्वाभावात् निघाताभावे षष्ठाध्यायस्थेन 'आमन्त्रितस्य च' इत्यनेन सूत्रेण अग्न्यादीनां सर्वेषां शब्दानाम् आद्युदात्तत्वं भवति।

### ४.१.३ समीक्षणम्

वस्तुतः अत्र भाष्यं दृष्ट्वा एव अर्वाचीनैः वैयाकरणैः 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति सूत्रं पठितम्। पूर्वं तु 'नामन्त्रिते समानाधिकरणे' इत्येकं सूत्रं,'सामान्यवचनं विभाषितं विशेषवचने' इत्यपरं सूत्रमासीत्। तदुक्तं कैयटेन – 'नामन्त्रिते समानाधिकरणे इति सूत्रं पठितं, ततः सामान्यवचनं विभाषितं विशेषवचने इति द्वितीयं, ततश्च पर्यायशब्दानामपि सामानाधिकरण्याद् अविद्यमानवत्त्वनिषेधात् निघातप्रसङ्गः'[२] इति। अन्नम्भट्टेनापि उक्तं स्वकीये महाभाष्यप्रदीपोद्योतनटीकायां – 'भाष्यं दृष्ट्वा सामान्यवचनम् इत्यन्तं नामन्त्रिते इति सूत्रमाधुनिकैः पठ्यते। पूर्वं तु नामन्त्रिते समानाधिकरणे इत्येकं सूत्रम्। सामान्यवचनं विभाषितम् इत्याद्युत्तरसूत्रमिति शङ्कोपपत्तिरित्यर्थः।'[३] इति। अतः योगविभागं स्वीकृत्य एव परवर्तिवैयाकरणैः सूत्रद्वयं पृथक्तया

पठितम्। किञ्च द्वितीयसूत्रे बहुवचनम् इति पदमपि भाष्यं दृष्ट्वा एव योजितमिति ज्ञायते। तदुक्तं सिद्धान्तकौमुदीकारेण – 'अत्र भाष्यकृता बहुवचनमिति पूरितम्, सामान्यवचनमिति च पूर्वसूत्रे योजितम्। आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानवद्वा।'[४] इति।

## ४.२. उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पा.सू. ८.२.४)

सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। तत्र उदात्तस्वरितयोः इति षष्ठीद्विवचनान्तं पदम्। यणः इति पञ्चम्येकवचनान्तं पदम्। स्वरितः इति प्रथमैकवचनान्तं पदम्। अनुदात्तस्य इति षष्ठ्येकवचनान्तं पदम्। सूत्रमिदं पदाधिकारे वर्तते। तेन सूत्रार्थो भवति – उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यादिति। उदात्तयणः उदाहरणं यथा – कु॒मा॒र्यौ॑, कु॒मा॒र्यः॑, इत्यादि। तथाहि कुमारी औ, कुमारी जस् इत्यादौ 'अनुदात्तौ सुप्पितौ' (पा.सू. ३.१.४) इति सूत्रानुसारेण औजसावनुदात्तौ भवतः। तयोरुदात्तयणः परयोः अनुदात्तयोः स्वरितो भवति। तथाहि – कुमारशब्दः प्रातिपदिकस्वरेण अन्तोदात्तः। कुमारशब्दात् 'वयसि प्रथमे' (पा.सू. ४.१.२०) इत्यनेन सूत्रेण विधीयमानः ङीप्प्रत्ययः 'अनुदात्तौ सुप्पितौ' इति सूत्रानुसारेण पित्त्वात् अनुदात्तः। कुमार ई इत्यवस्थायां 'यस्येति च' (पा.सू. ६.४.१४८) इत्यनेन सूत्रेण ईकारे परे भस्य अङ्गस्य अकारस्य लोपे

संयोगे कुमारी इति भवति। अत्र ङीपि अनुदात्ते परे उदात्तस्य कुमारशब्दस्य रेफोत्तरस्य उदात्तस्याकारस्य लोपः जातः। तेन 'अनुदात्तस्य च यत्रोदात्तलोपः' (पा.सू. ६.१.१६१) अनेन सूत्रेण ङीपः ईकारः उदात्तः भवति। अतः अत्र ईकारस्य स्थाने यः यणादेशो भवति स उदात्तयण्, तस्मात् परस्यानुदात्तस्य स्वरित आदेशो भवति। स्वरितयणः उदाहरणं यथा – 'खलप्व्याशा' इत्यादि। तथाहि – खलं पुनातीति विग्रहे क्विप्प्रत्यये खलपूः इति स्थिते 'गतिकारकोपपदात् कृत्' (पा.सू. ६.२.१३९) इति सूत्रेण तत्पुरुषसमासे उपपदात्परस्य कृदन्तस्य प्रकृतिस्वरः भवति। खलपूः इत्यत्र 'धातोः' (पा.सू. ६.१.१६२) इति सूत्रबलात् धातोः अन्तः उदात्तः भवति। तेन खलपूः इति शब्दे उत्तरपदस्य प्रकृतिस्वरे कृते अन्तोदात्तः भवति। ततः सप्तम्येकवचने ङौ परे 'ओः सुपि' (पा.सू. ६.४.८३) इत्यनेन सूत्रेण धात्वन्त-अनेकाच्-अङ्गस्य धातोः असंयोगपूर्वस्य उवर्णस्य अजादौ सुप्-प्रत्यये परे यणादेशे खलप्व् इ इति भवति। ततः खलप्व् ङि इति अवस्थायाम् उदात्तस्योकारस्य स्थाने यः यणादेशः भवति, स वकाररूपयण् उदात्तयण् अस्ति, ततः उदात्तयणः परस्य सप्तम्येकवचनस्य 'अनुदात्तौ सुप्पितौ' इति सूत्रबलात् अनुदात्तस्य ङेः स्वरितत्वं भवति। ततः खलप्वि आशा इत्यवस्थायां स्वरितस्येकारस्य स्थाने 'इको यणचि' (पा.सू. ६.१.७७) इति

सूत्रेण यणादेशे संयोगे खलुप्व्याशा इति भवति। अत्र स्वरितस्येकारस्य स्थाने यः यणादेशः भवति स च यण् स्वरितयण् भवति। तस्मात् स्वरितयणः परस्याशाशब्दस्य अनुदात्तस्य आकारस्य स्वरितो भवति।

### ४.२.१ आक्षेपः

ननु खलप्व् ङि इति स्थिते वकाररूपात् उदात्तस्थानिकात् यणः परस्य अनुदात्तस्य सप्तम्येकवचनस्य प्रकृतसूत्रेण यत् स्वरितत्वं, तत् यणादेशे असिद्धं भवति। यतो हि 'इको यणचि' इति यण्विधायकं सूत्रं षष्ठाध्याये वर्तते। स्वरितत्वविधायकं प्रकृतसूत्रञ्च अष्टमाध्यायस्य द्वितीये पादे वर्तते। अतः 'पूर्वत्रासिद्धम्' (पा.सू. ८.२.१) इति सूत्रेण अत्र स्वरितत्वं यणादेशे असिद्धं भवति। एवञ्च यदि खलप्वि आशा इति अवस्थायां सप्तम्येकवचनस्य इकारस्य स्वरितत्वम् असिद्धं भवति तर्हि तत्स्थाने यो यण् स कथं स्वरितयण् भवति। एवञ्च आशाशब्दस्य आकारः स्वरितयणः परः न भवति। तेन कथम् आशाशब्दस्य अनुदात्तस्य आकारस्य स्वरितत्वं सिध्यतीति आक्षेपो भवति। अत्र वार्त्तिककारेण 'यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम्' इति वार्त्तिकं प्रणीतम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। तेन इकारस्य स्वरितत्वाभावात् तत्स्थानिकः यण् स्वरितस्थानिकः यण् न भवति। तेन स्वरितस्थानिकस्य यणः अभावात् खलुप्व्याशा इत्यादौ आशाशब्दस्य

अनुदात्तस्य आकारस्य स्वरितत्वं कथं सिध्यतीति आक्षेपो भवति। अत्रोच्यते आश्रयात् सिद्धत्वं भविष्यतीति। ननु आश्रयात् सिद्धत्वमिति स्वीक्रियते चेत् दध्याशा इत्यादावपि आशाशब्दस्य अनुदात्तस्य आकारस्य स्वरितत्वं प्राप्नोति। तथाहि दधिशब्दः 'नब्विषयस्यानिसन्तस्य'[५] इति फिट्-सूत्रेण आद्युदात्तः। 'अनुदात्तं पदमेकवर्जम्' (पा.सू. ६.१.१५८) इति सूत्रबलात् धकारोत्तरेकारः अनुदात्तः। तेन 'उदात्तादनुदात्तस्य स्वरितः' (पा.सू. ८.४.६६) इति सूत्रेण अनुदात्तस्य इकारस्य स्वरितत्वं विधीयते। एवञ्च इकारस्य स्वरितत्वस्य आश्रयात् सिद्धत्वे तत्स्थानिकात् स्वरितयणः परस्य आशाशब्दस्य आकारस्य स्वरितत्वं कथं न भवतीति आक्षेपः सुतरामुदेति।

### ४.२.२ योगविभागेन समाधानम्

दध्याशा इत्यादौ आशाशब्दस्य अनुदात्तस्य आकारस्य स्वरितत्ववारणाय महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'उदात्तयणः' इति प्रथमं सूत्रम्। 'स्वरितयणः' इति द्वितीयं सूत्रम्। प्रथमसूत्रस्यार्थो भवति – उदात्तयणः परस्याऽनुदात्तस्य स्वरितत्वं भवतीति। 'स्वरितयणः' इति द्वितीयसूत्रे उदात्तयणः इति पदं प्रथमसूत्रादनुवर्तते। तेन द्वितीयसूत्रस्यार्थो भवति – 'स्वरितयणश्च परस्यानुदात्तस्य स्वरितत्वं भवति, उदात्तयण इत्येव।

अर्थात् 'उदात्तयणः' इति प्रथमसूत्रेण यो निर्वृत्तः स्वरितः, तस्य स्वरितस्य स्थाने यो यण् ततः परस्य अनुदात्तस्य स्वरितत्वं भवतीत्यर्थः। दध्याशा इत्यादौ 'उदात्तादनुदात्तस्य स्वरितः' इति सूत्रेण विहितः स्वरितः अत्र न गृह्यते। तेन दध्याशा इत्यादौ आकारस्य न स्वरितप्रसङ्गः। तदुक्तं महाभाष्ये – 'एवं तर्हि योगविभागः करिष्यते। उदात्तयणः। उदात्तयणः परस्याऽनुदात्तस्य स्वरितो भवति। ततः स्वरितयणः। स्वरितयणश्च परस्यानुदात्तस्य स्वरितो भवति। उदात्तयण इत्येव।'[६] इति।

### ४.२.३ समीक्षणम्

'यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम्।' इति वार्त्तिकं स्वीक्रियते चेत् प्रकृतसूत्रे योगविभागस्य आवश्यकता नास्ति। परन्तु वार्त्तिकमस्वीकृत्य आश्रयात् सिद्धत्वं स्वीक्रियते चेत् दध्याशा इत्यादौ आकारस्य स्वरितत्ववारणाय योगविभागः आवश्यकः। तदुक्तं नागेशेन – 'न च 'स्वरितयण' इत्याश्रयात्सिद्धत्वम्, अतिप्रसङ्गात्। 'उदात्तादनुदात्तस्ये'ति विहितस्यापि सिद्धत्वापत्तेः। तथा च प्रत्यग्निरित्यादावपि एतत्प्रवृत्त्यापत्तिः। न च 'नोदात्तस्वरितोदय'मिति निषेधः, 'अनन्तरस्ये'ति न्यायेन 'उदात्तादनुदात्तस्ये'ति स्वरितस्यैव तेन निषेधात्। अन्यथा 'खलप्व्याशाऽन्याऽग्नि'मित्यादावप्यस्य निषेधापत्तिः। अत एव 'तित्स्वरितं'

'स्वरितो वाऽनुदात्ते' इत्यादीनां न निषेध इति चेन्न। योगविभागेन भाष्ये एव समाधानात्। 'उदात्तयणः'। उक्तोऽर्थः। ततः – 'स्वरितयणः'। इह पूर्वसूत्रम् अनुवर्तते। उदात्तयण इत्येवं निर्वृत्तस्वरितस्थानिकयण परस्येत्यर्थः। एवञ्चास्यैव आश्रयात्सिद्धत्वं, नान्यस्येति न दोषः।'[७] इति।

### ४.३. झलां जशोऽन्ते (पा.सू. ८.२.३९)

सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। झलाम् इति षष्ठीबहुवचनान्तं पदम्। जशः इति प्रथमाबहुवचनान्तं विधेयबोधकं पदम्। अन्ते इति सप्तम्येकवचनान्तं पदम्। सूत्रमिदं 'पदस्य' (पा.सू. ८.१.१६) इत्यधिकारे वर्तते। तेन सम्पूर्णं सूत्रं भवति – पदस्य अन्ते झलां जशः इति। सूत्रस्यास्य अर्थः उक्तः भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां – पदान्ते झलां जशः स्युः इति। सूत्रस्यास्य उदाहरणं यथा – पटत्पटदिति, वागीशः इत्यादि।

'झषस्तथोर्धोऽधः' (पा.सू. ८.२.४०) इति तकारस्य थकारस्य च धकारविधायकं सूत्रमस्ति। सूत्रेऽस्मिन् झषः इति पञ्चम्येकवचनान्तं पदम्। तथोः इति षष्ठीद्विचनान्तं पदम्। धः इति प्रथमान्तं विधेयबोधकं पदम्। अधः इति पञ्चम्येकवचनान्तं पदम्। सूत्रमिदं पदाधिकारे वर्तते। तेन सूत्रार्थो भवति– झषः परयोः तकारथकारयोः स्थाने धकारादेशो भवति, परन्तु धा-धातोः विषये अयं धकारादेशः न स्यादिति। यथा – धत्तः इत्यादौ धा-धातोः

तकारस्य धकारादेशो न भवति। तथाहि – धा-धातोः लट्-लकारे प्रथमपुरुषद्विवचने तसि शपि, शपः स्थाने श्लु-आदेशे, 'श्लौ' (पा.सू. ६.१.१०) इति सूत्रेण द्वित्वे, अभ्यासस्य ह्रस्वे, ध धा तस् इति जाते 'श्नाभ्यस्तयोरातः' (पा.सू. ६.४.११२) इति अभ्यस्तस्य आकारस्य लोपे 'अभ्यासे चर्च' (पा.सू. ८.४.५४) इति सूत्रेण अभ्यासस्य जश्त्वे द ध् तस् इति जाते 'दधस्तथोश्च' (पा.सू. ८.२.३८) इति सूत्रेण धा-धातोः दध् इत्यस्य एकाचः झषन्तस्य बशः स्थाने भष्-आदेशे धकारे ध ध् तस् इति स्थिते धध् इत्यत्र धकाररूपात् झषः परं विद्यमानस्य तकारस्य 'झषस्तथोर्धोऽधः' इति सूत्रेण धकारादेशः न भवति, यतो हि तस्मिन् सूत्रे अधः इति निर्दिष्टः अस्ति। ततः 'खरि च' (पा. सू. ८.४.५५) इत्यनेन सूत्रेण धकारस्य तकारे सकारस्य रुत्वविसर्गे धत्तः इति रूपं सिध्यति।

### ४.३.१ आक्षेपः

महाभाष्यकारेण 'झषस्तथोर्धोऽधः' इति सूत्रे अधः इति पदस्य ग्रहणं प्रत्याख्यातम्। अतः अत्र आक्षेपो भवति यत् धत्तः इत्यादौ धध् तस् इत्यवस्थायां धकाररूपात् झषः परं विद्यमानस्य तकारस्य धकारादेशः कथं न भवतीति।

### ४.३.२ योगविभागेन समाधानम्

महाभाष्यकारेण धत्तः इत्यादौ धकाररूपात् झषः परं विद्यमानस्य तकारस्य धकारादेशः यथा न स्यात् तदर्थं प्रकृतसूत्रे योगविभागः स्वीकृतः। अर्थात् 'झलां जशोऽन्ते' इति सूत्रे योगविभागं स्वीकृत्य 'झषस्तथोर्धोऽधः' इति सूत्रे अधः इति पदस्य ग्रहणं प्रत्याख्यातम्। तथाहि – योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'झलां जशः' इति प्रथमसूत्रम्। 'अन्ते' इति द्वितीयं सूत्रम्। 'झलां जशः' इति प्रथमसूत्रे 'दधस्तथोश्च' इति पूर्वसूत्रात् दधः इति षष्ठ्येकवचनान्तं पदं तथा तथोः इति सप्तमीद्विवचनान्तं पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – दधः झलां जशो भवन्ति तकारे थकारे च परे इति। 'अन्ते' इति द्वितीयसूत्रस्य अर्थो भवति – झलां जशो भवन्ति अन्ते च इति। एवञ्च दध् तस् इत्यवस्थायां 'झलां जशः' इति प्रथमसूत्रेण दधः अन्त्यस्य झलः धकारस्य स्थाने जशि दकारे दद् तस् इति भवति। अत्र योगविभागस्वीकारपक्षे 'झषस्तथोर्धोऽधः' इति धकारविधायकं सूत्रं 'झलां जशः' इति सूत्रात् परसूत्रमस्ति। तेन 'पूर्वत्रासिद्धम्' (पा.सू. ८.२.१) इति परिभाषासूत्रबलात् धकारविधायकसूत्रदृष्ट्या जश्-विधायकं सूत्रं सिद्धमस्ति। अतः जश्त्वस्य सिद्धत्वात् झषन्तत्वाभावात् धत्वं न भवति। तेन धत्तः इत्यादौ तसः तकारस्य धकारः न भवतीति सिद्धमिष्टम्।

किञ्च 'दधस्तथोश्च' इति भष्-विधायकं सूत्रं 'झलां जशः' इति जश्-विधायकसूत्रापेक्षया पूर्वसूत्रमस्ति। 'झलां जशः' इति जश् –विधायकसूत्रं 'दधस्तथोश्च' इति भष्-विधायकसूत्रापेक्षया परसूत्रमस्ति। तेन 'पूर्वत्रासिद्धम्' इति परिभाषासूत्रबलात् भष्-विधायकसूत्रदृष्ट्या जश्-विधायकसूत्रम् असिद्धमस्ति। अतः 'दधस्तथोश्च' इति सूत्रेण झषन्तं मत्वा भष् तु भवत्येव। तेन बशः दकारस्य भषि धकारे धद् तस् इति जाते 'खरि च' इत्यनेन सूत्रेण दकारस्य तकारे सकारस्य रुत्वविसर्गे धत्तः इति रूपं सिध्यति। तदुक्तं महाभाष्ये – 'अध इति शक्यमवक्तुम्। कस्मान्न भवति – धत्तः धत्थ इति। जश्त्वे योगविभागः। जश्त्वे योगविभागः करिष्यते। इदमस्ति दधस्तथोश्चेति। ततो वक्ष्यामि – झलां जशः। झलां जशो भवन्ति दधस्तथोः। ततः अन्ते। अन्ते च झलां जशो भवन्तीति। तत्र जश्त्वे कृतेऽझषन्तत्वान्न भविष्यति।'[८] इति।

### ४.३.३ समीक्षणम्

'झषस्तथोर्धोऽधः' इति सूत्रे यदि अधः इति पदस्य ग्रहणं न क्रियते तर्हि योगविभागः करणीयः एव। अन्यथा धत्तः इत्यादौ धध् तस् इत्यवस्थायां धकाररूपात् झषः परं विद्यमानस्य तकारस्य धकारादेशः नैव निवार्यते। अतः धत्तः इत्यादौ तकारस्य धकारवारणाय 'झलां जशोऽन्ते' इति सूत्रे

योगविभागः आवश्यकः। पदमञ्जरीकारेणात्र उक्तम् – 'अधः इति शक्यमवक्तुम्। इह कस्मान्न – धत्तः, धत्थ इति? जश्त्वे योगविभागः करिष्यते 'दधस्तथोश्च', 'झलां जशः' – झलां जशो भवन्ति दधस्तथोः, ततः अन्ते – अन्ते च झलां जशो भवन्ति, तत्र 'पूर्वत्रासिद्धम्' इति भष्भावे जश्त्वस्यासिद्धत्वाज्झषन्तत्वम्। धत्वे परस्मिन् सिद्धं जश्त्वमित्यझषन्तत्वाद्धत्वाभाव इति सिद्धमिष्टम्।' इति।

### ४.४. रदाभ्यां निष्ठातो नः पूर्वस्य च दः (पा.सू. ८.२.४२)

सूत्रेऽस्मिन् षट् पदानि सन्ति। तत्र रदाभ्याम् इति पञ्चमीद्विवचनान्तं पदम्। निष्ठातः इति षष्ठ्येकवचनान्तं पदम्। नः इति प्रथमैकवचनान्तं पदम्। पूर्वस्य इति षष्ठ्येकवचनान्तं पदम्। च इत्यव्ययपदम्। दः इति षष्ठ्येकवचनान्तं पदम्। सूत्रमिदं पदाधिकारे वर्तते। तेन सूत्रार्थो भवति – रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्, निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च इति। रदाभ्यामित्यत्र अकारौ उच्चारणार्थौ, अतः रेफदकाराभ्यामित्यर्थो भवति। निष्ठातः इत्यस्य निष्ठातकारस्येत्यर्थः। रेफात्परस्य निष्ठातकारस्य उदाहरणं यथा – आस्तीर्णं, विस्तीर्णं, विशीर्णं, निगीर्णम् इत्यादि। दकारात्परस्य निष्ठातकारस्य उदाहरणं यथा – भिन्नः, भिन्नवान्, छिन्नः, छिन्नवान् इत्यादि।

'एकः पूर्वपरयोः' (पा.सू. ६.१.८४) इत्येकमधिकारसूत्रमस्ति। सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र एकः इति प्रथमैकवचनान्तं पदम्। पूर्वपरयोः इति षष्ठीद्विवचनान्तं पदम्। 'ऋत उत्' (पा.सू. ६.१.१११) इति सूत्रपर्यन्तम् अयमधिकारो वर्तते। अस्मिन् अधिकारे उक्ताः आदेशाः पूर्वपरयोः स्थाने एकादेशरूपेण भवन्ति इत्यर्थः। अर्थात् पूर्ववर्णस्य तथा परवर्णस्य उभयोः स्थाने मिलित्वा एकः एव आदेशः भवतीति बोध्यम्। उदाहरणं यथा – उपेन्द्रः इत्यादि। अस्मिन् उदाहरणे 'आद्गुणः' (पा.सू. ६.१.८७) इत्यनेन सूत्रेण विहितः एकाररूपः गुणः अवर्णस्य तथा इवर्णस्य उभयोः स्थाने मिलित्वा एक एव आदेशः भवति। यतो हि 'आद्गुणः' इति सूत्रम् 'एकः पूर्वपरयोः' इत्यधिकारे वर्तते।

### ४.४.१ आक्षेपः

महाभाष्यकारेण 'एकः पूर्वपरयोः' इत्यस्मिन् सूत्रे एकपदस्य ग्रहणं प्रत्याख्यातम्। एवञ्च अत्र आक्षेपो भवति यत् यदि एकपदस्य ग्रहणं न क्रियते तर्हि पूर्ववर्णस्य स्थाने तथा परवर्णस्य स्थाने भिन्नः भिन्नः आदेशः कथं न स्यादिति। उक्तञ्च काशिकायाम् – 'एकग्रहणं पृथगादेशनिवृत्त्यर्थं, स्थानिभेदाद्धि भिन्नादिषु नत्ववद् द्वावादेशौ स्याताम्।'[१] इति। यद्यत्रोच्यते आदेशः प्रधानभूतः अस्ति। स्थानि गुणभूतमस्ति। अतः

गुणभूतस्थान्यनुरोधेन प्रधानभूतस्य आदेशस्य भेदकल्पना नैव समीचीना। प्रधानानुरोधी हि गुणो भवति, न पुनर्गुणानुरोधि प्रधानम्। तर्ह्यत्र पुनः आक्षेपो भवति यत् यदि एकपदग्रहणं विनापि भिन्नः भिन्नः आदेशः न स्यात् तर्हि 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यनेन सूत्रेण द्वयोः स्थानिनोः द्वौ आदेशौ कथं भवतः, अत्रापि द्वयोः स्थानिनोः एक एव आदेशः स्यादिति।

### ४.४.२ योगविभागेन समाधानम्

'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यनेन सूत्रेण द्वयोः स्थानिनोः द्वौ आदेशौ कथं भवतः इति शङ्कानिवारणार्थं महाभाष्यकारेण 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यस्मिन् सूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'रदाभ्यां निष्ठातो नः' इति प्रथमं सूत्रम्। 'पूर्वस्य च दः' इति द्वितीयं सूत्रम्। एवञ्च प्रथमसूत्रेण रेफदकाराभ्यां परस्य निष्ठातकारस्य नत्वं विधीयते। द्वितीयसूत्रेण च निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य नत्वं विधीयते। तदुक्तं 'एकः पूर्वपरयोः' इति सूत्रभाष्ये – 'कथं यदुक्तं – व्याकरणेऽपि ह्यन्यत्र द्वयोः स्थानिनोः द्वावादेशौ भवतः – 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः', 'उभौ साभ्यासस्य' इति। इह तावत् – रदाभ्यां निष्ठातो नः, पूर्वस्य च दः – इति द्वे वाक्ये। कथम्? योगविभागः करिष्यते –

रदाभ्यां निष्ठातो नः। ततः पूर्वस्य च दः इति। इहापि – उभौ साभ्यासस्य इति। उभौग्रहणसामर्थ्याद् द्वावादेशौ भविष्यतः'[१०] इति।

### ४.४.३ समीक्षणम्

वस्तुतः 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यत्र योगविभागस्य आवश्यकता नास्ति। प्रकृतसूत्रे चकारग्रहणं कृतमस्ति। तेन चकारेणैवात्र वाक्यभेदः सम्भवति। अतः चकारग्रहणादेव द्वयोः स्थानिनोः द्वौ आदेशौ सम्भवतः। अतः वाक्यद्वयार्थं 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यत्र योगविभागः न करणीयः। किञ्च 'एकः पूर्वपरयोः' इत्यस्मिन् सूत्रे एकपदस्य ग्रहणपक्षे योगविभागस्य नास्ति कापि आवश्यकता। अत्र नागेशेनोक्तं – 'गुण इत्यादेर्विधेयसमर्पकत्वेन तत्रैकत्वसङ्ख्याया विवक्षणेनोभयोः पूर्वपरयोरेकवाक्यतयैव विधेयान्वयेन च 'अनयोः पूलयोः कटं कुरु' इत्यादित इवोभयसम्बन्ध्येकविधेयस्यैव प्रतीतेरेकग्रहणं स्पष्टार्थम्।'[११] इति।

### ४.५. रायो हलि (पा.सू. ७.२.८५)

सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र रायः इति षष्ठ्येकवचनान्तं पदम्। हलि इति सप्तम्येकवचनान्तं पदम्। 'अष्टन आ विभक्तौ' (पा.सू. ७.२.८४) इति पूर्वसूत्रात् आ इति प्रथमैकवचनान्तं पदं, विभक्तौ इति सप्तम्येकवचनान्तं पदं

च अनुवर्तते। तेन सूत्रार्थो भवति – रैशब्दस्य आकारोऽन्तादेशः स्याद्धलि विभक्तौ इति। राः, राभ्याम् इत्याद्यत्रोदाहरणम्।

'ष्णान्ता षट्' (पा.सू. १.१.२४) इत्येकं षट्संज्ञाविधायकं सूत्रमस्ति। अस्मिन् सूत्रे ष्णान्ता इति प्रथमैकवचनान्तं पदम्। षट् इत्यपि प्रथमैकवचनान्तं पदम्। 'बहुगणवतुडति संख्या' (पा.सू. १.१.२३) इति सूत्रात् संख्या इति प्रथमान्तं पदमनुवर्तते। तेन सूत्रार्थो भवति – षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यादिति। षकारान्ताः नकारान्ताः संख्याशब्दाः षट्संज्ञकाः भवन्ति इति बोध्यम्। अनेन सूत्रेण पञ्चन्, षष्, सप्तन्, अष्टन्, नवन्, दशन्, एकादशन्, द्वादशन्, त्रयोदशन्, चतुर्दशन्, पञ्चदशन्, षोडषन्, सप्तदशन्, अष्टादशन्, नवदशन् इत्येतेषां सर्वेषां षट् इति संज्ञा विधीयते।

### ४.५.१ आक्षेपः

ननु अष्टानाम् इत्यादौ 'अष्टन आ विभक्तौ' इत्यनेन सूत्रेण अष्टनः आत्वे कृते नकारान्तत्वाभावात् षट्संज्ञा न स्यात्। षट्संज्ञाभावाच्च 'षट्चतुर्भ्यश्च' (पा.सू. ७.१.५५) इत्यनेन सूत्रेण आम्प्रत्ययस्य नुट् आगमः न स्यात्। तेन अष्टानाम् इत्यादिरूपं न सिध्येत्। अत्र आक्षेपसमाधानार्थं वार्त्तिककारेण 'षट्संज्ञायामुपदेशवचनम्' इति वार्त्तिकमुक्तम्। अष्टानाम् इत्यादौ अष्टनः उपदेशावस्थायां नान्तत्वात् षट्संज्ञा सिध्यति। परन्तु महाभाष्यकारेण इदं

वार्त्तिकं प्रत्याख्यातम्। अतः अत्र आक्षेपो भवति यत् अष्टानाम् इत्यादौ अष्टनः आत्वे नान्तत्वाभावात् षट्संज्ञाभावे नुट् कथं भवतीति।

### ४.५.२ योगविभागेन समाधानम्

अष्टानाम् इत्यादौ अष्टनः आत्वे नान्तत्वाभावात् षट्संज्ञाभावे नुट् कथं भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण 'रायो हलि' इति सूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'रायः' इति प्रथमं सूत्रम्। 'हलि' इति द्वितीयं सूत्रम्। 'रायः' इति प्रथमसूत्रे 'अष्टन आ विभक्तौ' इति पूर्वसूत्रात् आ इति प्रथमान्तं पदं तथा विभक्तौ इति सप्तम्यन्तं पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – विभक्तौ परे रायः आकारादेशो भवतीति। 'हलि' इति द्वितीयं सूत्रम् 'अष्टन आ विभक्तौ', 'रायः' इत्यनयोः उभयोः सूत्रयोः शेषः। अर्थात् अष्टनः रायश्च विभक्तौ यदात्वं तत् हलादौ विभक्तौ परे एव भविष्यतीति बोध्यम्। अजाद्योः जश्शसोः आत्वं तु 'अष्टाभ्य औश्' इत्यत्र कृतात्वनिर्देशात् ज्ञापकाद् भविष्यति। एवञ्च अष्टानाम् इत्यादौ 'षट्चतुर्भ्यश्च' इत्यनेन सूत्रेण आदौ नुट् विधीयते,यतो हि नुटि सत्येव हलादिविभक्तिः सम्भवति। ततः 'अष्टन आ विभक्तौ' इति सूत्रेण आत्वं विधीयते। तदुक्तं 'ष्णान्ता षट्' इति सूत्रभाष्ये – 'अथवा – उपरिष्टाद्

योगविभागः करिष्यते – अष्टन आ विभक्तौ। ततो रायः। रायश्च विभक्तावाकारादेशो भवति। हलीत्युभयोः शेषः।'[१२] इति।

### ४.५.३ समीक्षणम्

वस्तुतः अत्र योगविभागस्य आवश्यकता नास्ति। यतो हि योगविभागं कृत्वा अष्टनः रायश्च यदात्वं तद्धलादौ विभक्तौ परे एव भवतीति अर्थः स्वीक्रियते चेत् प्रियाष्टौ, प्रियाष्टा इत्यादिरूपं न सिध्यति, हलादिविभक्त्यभावात्। किञ्च हलादिविभक्तिलाभार्थं यदि 'षड्भ्यश्तुर्भ्यश्च' इत्यनेन सूत्रेण आदौ नुट् विधीयते तर्हि प्रियाष्टानौ प्रियाष्टानः इत्याद्यनिष्टरूपं प्राप्नोति। अतः 'हलि' इति विभज्य उभयशेषतया न योज्यम्। काशिकायामुक्तम् – 'अन्तग्रहणमौपदेशिकार्थम्। तेनेह न भवति – शतानि। सहस्राणि। अष्टानामित्यत्र नुड् भवति।'[१३] इति। सिद्धान्तकौमुदीकारेणात्रोक्तं – 'शतानि सहस्राणीत्यत्र संनिपातपरिभाषया न लुक्। सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तदविघातकत्वात्।'[१४] इति।

### ४.६. विभाषा पृष्टप्रतिवचने हेः (पा.सू. ८.२.९३)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र विभाषा इति प्रथमैकवचनान्तं पदम्। पृष्टप्रतिवचने इति सप्तम्येकवचनान्तं पदम्। पृष्टस्य प्रतिवचनम्, आख्यानं पृष्टप्रतिवचनम्। हेः इति षष्ठ्येकवचनान्तं पदम्।

'वाक्यस्य टेः प्लुत उदात्तः' (पा.सू. ८.२.८२) इति सूत्रात् प्लुतः इति पदमनुवर्तते। तेन सूत्रार्थो भवति – पृष्टप्रतिवचने हेः विभाषया प्लुतो भवतीति। उदाहरणं यथा – अकार्षीः कटं देवदत्त? अकार्षं हि३, अकार्षं हि, अलावीः केदारं देवदत्त? अलाविषं हि३, अलाविषं हि इत्यादि।

'अग्नीत्प्रेषणे परस्य च' (पा.सू. ८.२.९२) इत्येकं प्लुतविधायकं सूत्रमस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र अग्नीत्प्रेषणे इति सप्तम्येकवचनान्तं पदम्। परस्य इति षष्ठ्येकवचनान्तं पदम्। च इति अव्ययपदम्। अग्नीत्प्रेषणे इत्यस्यार्थः अग्नीधः ऋत्विग्विशेषस्य प्रेषणे नियोजने इति। 'ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः' (८.२.९१) इति पूर्वसूत्रात् आदेः इति पदमनुवर्तते। 'वाक्यस्य टेः प्लुत उदात्तः' इति सूत्रात् प्लुतः इति पदमनुवर्तते। तेन सूत्रार्थो भवति – 'अग्नीत्कर्मके अध्वर्युकर्तृके प्रेषणे आदेः प्लुतो भवति, ततः परस्य द्वितीयस्य च अचः' इति। उदाहरणं यथा – आ३ श्रा३वय, ओ३श्रा३वय इत्यादि।

### ४.६.१ आक्षेपः

'अग्नीत्प्रेषणे परस्य च' इत्यस्य सूत्रस्य अग्नीत्कर्मके अध्वर्युकर्तृके प्रेषणे आदेः प्लुतो भवति, ततः परस्य द्वितीयस्य चाचः इत्यर्थः स्वीक्रियते चेदपि उद्धरा३ उद्धर, आहरा३ आहर इत्यादौ अन्त्यस्य प्लुतः कथं भवतीति आक्षेपः

सूतरामुदेति। उद्धरा३ उद्धर, आहरा३ आहर इत्यादौ अन्त्यस्य प्लुतविधानार्थं वार्त्तिककारेण 'बहुलमन्यत्र' इति वार्त्तिकं कृतम्। 'बहुलमन्यत्र' इत्यत्र अन्यत्र शब्देन ओश्रावयाश्रावयाभ्यामन्यत्र इति ग्राह्यं, न तु अग्नीत्प्रेषणादन्यत्र। तेन ओश्रावयाश्रावयाभ्यामन्यत्राग्नीत्प्रेषणे बहुलं प्लुतो भवतीत्यर्थः सिध्यति प्रकृतवार्त्तिकस्य। बहुलवचनाच्च न आदेः न परस्य, अपि तु अन्त्यस्यैव प्लुतो भवति। अत्र अन्त्यस्यैव इत्यनेन पूर्वान्त्यस्यैव इति ग्राह्यम्। तेन उद्धरा३ उद्धर, आहरा३ आहर इत्यादौ अन्त्यस्य प्लुतो सिध्यति। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः उद्धरा३ उद्धर, आहरा३ आहर इत्यादौ अन्त्यस्य प्लुतः कथं भवतीति आक्षेपः तिष्ठत्येव।

### ४.६.२ योगविभागेन समाधानम्

उद्धरा३ उद्धर, आहरा३ आहर इत्यादौ अन्त्यस्य प्लुतः कथं भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। किञ्च योगविभागं कृत्वा विभाषा इति पदस्य पूर्वसूत्रे संयोजनं कृतम्। तथाहि 'अग्नीत्प्रेषणे परस्य च विभाषा' इति प्रथमं सूत्रम्। 'पृष्टप्रतिवचने हेः' इति द्वितीयं सूत्रम्। ननु 'अग्नीत्प्रेषणे परस्य च विभाषा' इति प्रथमसूत्रे विभाषापदसंयोजनात् पक्षे आश्रावय इति प्लुतरहितपदं स्यात्। अत्रोच्यते योगविभागद्वारा व्यवस्थितविभाषा गृह्यते। एवञ्च व्यवस्थितविभाषया

आ३श्रा३वय, ओ३श्रा३वय इत्यादौ प्लुत एव भवति। अत्र पुनः शङ्का उदेति यत् बहुलग्रहणाभावे उद्धरा३ उद्धर, आहरा३ आहर इत्यादौ अन्त्यस्य प्लुतः कथं स्यादिति। अत्रोच्यते व्यवहितेऽपि परशब्दो वर्तते इति। अर्थात् 'अग्नीत्प्रेषणे परस्य च विभाषा' इति सूत्रे परशब्दस्य व्यवहितेऽपि सम्भवात् आश्रावय इत्यत्र अव्यवहितपरं गृह्यते, अन्यत्र व्यवहितपरमिति बोध्यम्। अत्रापि व्यवस्थितविभाषा एव नियामिका भवति। तदुक्तं 'अग्नीत्प्रेषणे परस्य च' इति सूत्रभाष्ये – 'योगविभागः करिष्यते – 'अग्नीत्प्रेषणे परस्य च विभाषा'। ततः 'पृष्टप्रतिवचने हेः'। विभाषेत्येव।'[१५] इति।

### ४.६.३ समीक्षणम्

वस्तुतः अत्र योगविभागस्य आवश्यकता नास्ति। यतो हि छन्दोवत् सूत्राणि भवन्ति इति छान्दसत्वात् प्लुतव्यत्ययो भविष्यति। काशिकाकारेणापि उक्तम् – 'इह तु उद्धरा३ उद्धर, अभिहरा३ अभिहर इति छान्दसः प्लुतव्यत्ययः।'[१६] इति। अतः अत्र योगविभागस्य आवश्यकता नास्ति।

### ४.७. कुप्वोः ≍क≍पौ च (पा.सू. ८.३.३७)

सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। कुप्वोः इति सप्तमीद्विवचनान्तं पदम। ≍क≍पौ प्रथमाद्विवचनान्तं पदम्। च इति अव्ययपदम्। 'विसर्जनीयस्य सः' (पा.सू.८.३.३४)इति सूत्रात् विसर्जनीयस्य इति पदमनुवर्तते। तेन सूत्रार्थो

भवति – कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ भवतः, चकाराद् विसर्जनीयश्च। ≍क≍पौ इत्यत्र कपौ उच्चारणार्थौ, वस्तुतः अत्र जिह्वामूलीयोपध्मानीयावेवादेशौ। जिह्वामूलीयः इति कश्चन अयोगवाहवर्णः अस्ति। प्रकृतसूत्रेण विसर्जनीयात् परः ककारः खकारः वा अस्ति चेदेव जिह्वामूलीयरूपस्य अयोगवाहवर्णस्य विधानं क्रियते। जिह्वामूलीयवर्णस्य उच्चारणमर्धविसर्गसदृशम् अस्ति। अस्य उच्चारणस्थानं जिह्वामूलमस्ति। तदुक्तं सिद्धान्तकौमुद्यां – 'जिह्वामूलीयस्य जिह्वामूलम्'[१७] इति। जिह्वामूलीयस्य निर्देशः ≍ इत्यनेन चिह्नेन क्रियते। एवमेव उपध्मानीयः इति कश्चन अयोगवाहवर्णः अस्ति। विसर्गात् परः पकारः फकारः वा अस्ति चेदेव उपध्मानीयरूपस्य अयोगवाहवर्णस्य विधानं क्रियते प्रकृतसूत्रेण। उपध्मानीयवर्णस्यापि उच्चारणम् अर्धविसर्गसदृशं भवति। अस्य उच्चारणस्थानम् औष्ठौ स्तः। तदुक्तं सिद्धान्तकौमुद्याम् – 'उपूपध्मानीयानामोष्ठौ'[१८] इति। उपध्मानीयस्यापि निर्देशः ≍ इत्यनेन चिह्नेन क्रियते। प्रकृतसूत्रे यद्यपि कुप्वोः इत्यनेन कवर्गपवर्गयोः ग्रहणं भवति, तथापि विसर्जनीयस्य स्थाने जिह्वामूलीयोपध्मानीययोः विधानं केवलं खर्-वर्णे परे एव भवति। यतो हि 'खरवसानयोर्विसर्जनीयः' (पा.सू. ८.३.१५) इत्यनेन सूत्रेण खरि परे एव विसर्जनीयस्य विधानं भवति। खर्-प्रत्याहारे वर्गवर्णेषु

केवलं वर्गद्वितीयवर्णाः, वर्गप्रथमवर्णाश्च अन्तर्भवन्ति। एवञ्च प्रकृतसूत्रस्य प्रसक्तिः ककारे परे खकारे वा परे, एवमेव पकारे परे, फकारे वा परे एव विद्यते। उदाहरणं यथा – वृक्ष≍करोति, वृक्षः करोति। वृक्ष≍खनति, वृक्षः खनति। वृक्ष≍पचति, वृक्षः पचति। वृक्ष≍फलति, वृक्षः फलति इत्यादि।

### ४.७.१ आक्षेपः

वृक्षः करोति इत्यादौ पदान्ते विद्यमानस्य विसर्गस्य खरि परे 'विसर्जनीयस्य सः' इत्यनेन सूत्रेण सकारादेशे प्राप्ते तं प्रबाध्य प्रकृतसूत्रेण जिह्वामूलीयः विधीयते। अधुना आक्षेपो भवति यत्, यथा वृक्षः करोति इत्यादौ 'विसर्जनीयस्य सः' इति सूत्रं प्रबाध्य प्रकृतसूत्रेण जिह्वामूलीयः विधीयते तथैव वासः क्षौमम्, अद्भिः प्सातम् इत्यादौ 'शर्परे विसर्जनीयः' (८.३.३५) इति सूत्रं प्रबाध्य प्रकृतसूत्रेण जिह्वामूलीयोपध्मानीयौ कथं न भवतः इति।

### ४.७.२ योगविभागेन समाधानम्

वासः क्षौमम्, अद्भिः प्सातम् इत्यादौ 'कुप्वोः ≍क≍पौ च' इत्यनेन सूत्रेण 'शर्परे विसर्जनीयः' इति सूत्रं कथं न बाध्यते इति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'कुप्वोः' इति प्रथमं सूत्रम्। '≍क≍पौ च' इति द्वितीयं सूत्रम्। 'कुप्वोः' इति प्रथमसूत्रे 'शर्परे विसर्जनीयः' इति

सूत्रात् शर्परे विसर्जनीयः चेति पदद्वयमनुवर्तते। किञ्च 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इति पदमनुवर्तते। तेन सूत्रार्थो भवति – कुप्वोः शर्परयोर्विसर्जनीयस्य विसर्जनीयो भवतीति। '≍क≍पौ च' इति द्वितीयसूत्रे प्रथमसूत्रात् कुप्वोः इति पदमनुवर्तते। तेन द्वितीयसूत्रस्य अर्थो भवति – विसर्जनीयस्य ≍क≍पौ च भवतः कुप्वोः। द्वितीयसूत्रे शर्परे इति न अनुवर्तते। द्वितीयसूत्रेण सामान्यतः प्राप्तयोः ≍क≍पयोः बाधनार्थं प्रथमसूत्रेण शर्परयोः कुप्वोः विसर्जनीयः विधीयते। वासः क्षौमम्, अद्भिः प्सातम् इत्यादौ '≍क≍पौ च' इति द्वितीयसूत्रेण प्राप्तयोः जिह्वामूलीयोपध्मानीययोः निवृत्तिः क्रियते 'कुप्वोः' इति प्रथमसूत्रेण। अतः वासः क्षौमम्, अद्भिः प्सातम् इत्यादौ न दोषः। तदुक्तं महाभाष्यकारेण – 'एवं तर्हि योगविभागः करिष्यते। शर्परे विसर्जनीयः। वा शरि। ततः कुप्वोः। कुप्वोश्च शर्परयोर्विसर्जनीयस्य विसर्जनीयो भवतीति। किमर्थमिदम्? कुप्वोः ≍क≍पौ वक्ष्यति तद्बाधनार्थम्। ततः ≍क≍पौ च। ≍क≍पौ च भवतः। कुप्वोरित्येव। शर्परयोरिति निवृत्तम्।'[१९] इति।

### ४.७.३ समीक्षणम्

'कुप्वोः ≍क≍पौ च' इत्यस्मिन् सूत्रे 'शर्परे विसर्जनीयः' इति सम्पूर्णसूत्रानुवृत्त्या वाक्यभेदेन व्याख्यानं क्रियते चेदपि इष्टसिद्धिर्भविष्यति।

परन्तु वाक्यभेदेन व्याख्याने गौरवदोषो भविष्यति। वस्तुतः योगविभागपक्षेऽपि प्रसक्तयोः ≍क≍पयोः निवृत्तिः इति प्रतिपत्तिगौरवमस्ति। अत एव महाभाष्यकारेण योगविभागपक्षं प्रतिपाद्य अनुवृत्तिपक्षोऽपि प्रतिपादितः। तदुक्तं महाभाष्ये – 'अथवा 'शर्परे विसर्जनीय' इत्येतत् 'कुप्वोः ≍क≍पौ च' इत्यत्रानुवर्तिष्यते'[२०] इति। वस्तुतः योगविभागपक्षे प्रसक्तयोः ≍क≍पयोः निवृत्तिः, अनुवृत्तिपक्षे तु प्रसङ्ग एव नास्ति इति विशेषः। सिद्धान्तकौमुदीकारेण 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' इति परिभाषया 'कुप्वोः ≍क≍पौ च' इति सूत्रं 'शर्परे विसर्जनीयः' इत्यस्य बाधको न भवतीति प्रतिपादितम्। तदुक्तं – 'येन नाप्राप्तन्यायेन 'विसर्जनीयस्य सः' इत्यस्यापवादोऽयं, न तु 'शर्परे विसर्जनीयः' इत्यस्य। तेन वासः क्षौमम् इत्यादौ विसर्ग एव।'[२१] इति। काशिकायामुक्तं – 'विसर्जनीयस्य सः' (८.३.३४) इत्येतस्मिन् नाप्राप्त इदमारभ्यत इत्येतस्य बाधकम्, 'शर्परे विसर्जनीयः' (८.३.३५) इत्येतत्तु न बाध्यते – वासः क्षौमम् अद्भिः प्सातम्। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति 'शर्परे विसर्जनीयः' (८.३.३५) इत्येतदेव भवति। केचित् तु एतदर्थं योगविभागं कुर्वन्ति। कुप्वोः शर्परयोः विसर्जनीयस्य विसर्जनीय आदेशो भवति। किमर्थमिदम्? ≍क≍पौ चेति वक्ष्यति, तद्बाधनार्थमिति।'[२२] इति।

१ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. ७४
२ तदेव, प्रदीपः, पृ.सं. ७४
३ म.भा.प्र.व्या., दशमभागः, उद्योतनम्, पृ.सं ३४२
४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ६२५
५ फि.सू., २६
६ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. ८५
७ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, द्वितीयभागः, ल.श.शे., पृ.सं. ६२७
८ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. ११६
९ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ५६२
१० व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. ८२
११ ल.श.शे., सम्पा. बालशास्त्री, प्रथमभागः, पृ.सं. २७५
१२ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, प्रथमभागः, पृ.सं. ३१३
१३ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ११
१४ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. २५८
१५ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. १४७
१६ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ८७६
१७ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. १७
१८ तदेव, पृ.सं. १६
१९ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. १७४
२० तदेव, पृ.सं. १७५
२१ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. १०२
२२ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ८८९

* * *

# पञ्चमोऽध्यायः

## अवशिष्टानां योगविभागानां समीक्षा

अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशयोगविभागाः अत्र समीक्षिताः।

### ५.१. अदसो मात् (पा.सू. १.१.१२)

प्रकृतेऽस्मिन् सूत्रे पदद्वयं वर्तते। तत्र अदसः इति षष्ठ्येकवचनान्तं पदम्। मात् इति पञ्चम्येकवचनान्तं पदम्। 'ईदूदेद्द्विवचनं प्रगृह्यम्' (पा.सू. १.१.११) इति सूत्रात् ईदूदेद् प्रगृह्यम् चेति पदद्वयमनुवर्तते। अदसः इत्यत्र अवयवषष्ठी अस्ति। मात् इत्यत्र दिग्योगे पञ्चमी अस्ति। अतः अत्र परः इति शब्दः अध्याह्रियते। तेन सूत्रार्थः भवति – अदश्शब्दावयवात् मकारात् परौ ईदूतौ प्रगृह्यसंज्ञौ भवतः इति। अदश्शब्दावयवात् मकारात् परौ ईदूतौ कुत्र भवतः इति शङ्कायामुच्यते – अदश्शब्दस्य मकारात् परम् ईत् तथा ऊत् पुंलिङ्गे प्रथमायाः बहुवचने, प्रथमायाः द्वितीयायाः च द्विवचने दृश्यते। स्त्रीलिङ्गे तथा नपुंसकलिङ्गे प्रथमायाः द्विवचने द्वितीयायाः द्विवचने च अदश्शब्दस्य मकारात् परम् ऊत् प्राप्यते। तथाहि – अदश्शब्दात् पुंलिङ्गे प्रथमाद्विवचने अमू इति रूपं भवति। अदस्-शब्दात् पुंलिङ्गे प्रथमाबहुवचने अमी इति रूपं भवति। स्त्रीलिङ्गे तथा नपुंसकलिङ्गे अदश्शब्दात् प्रथमायाः द्विवचने द्वितीयायाः च द्विवचने अमू इति रूपं भवति। अत्र 'अदसोऽसेर्दादु

दो मः' (पा.सू. ८.२.८०) इति सूत्रस्य असिद्धत्वात् 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यनेनैव सूत्रेण प्रगृह्यसंज्ञा सिध्यति। यतो हि अदे इति एदन्तं द्विचनमस्ति। पुंलिङ्गस्य द्विवचने तु अदौ इति भवति। अतः 'अदसो मात्' इति सूत्रस्य उदाहरणं केवलं पुंलिङ्गस्य प्रथमाद्विवचनस्य अमू तथा प्रथमाबहुवचनस्य अमी इति भवति। अर्थात् अदस्-शब्दस्य पुंलिङ्गस्य अमी तथा अमू एतयोः रूपयोः प्रकृतसूत्रेण प्रगृह्यसंज्ञा भवति।

पाणिनीयव्याकरणे प्रगृह्यसंज्ञाकरणस्य मुख्यं प्रयोजनमस्ति अच्सन्धिविषयकः प्रकृतिभावः। 'प्लुतप्रगृह्याः अचि नित्यम्' (पा.सू. ६.१.१२५) इत्यनेन सूत्रेण प्रकृतिभावः विधीयते। सूत्रस्यास्यार्थो हि – प्लुतसंज्ञकवर्णेभ्यः प्रगृह्यसंज्ञकशब्देभ्यश्च परं विद्यमानैः अच्-वर्णैः सह सन्धिकार्यं न भवति, अपि तु प्रकृत्या अर्थात् मूलस्वरूपेणैव तिष्ठति इति। उदाहरणं यथा – अमी आसाते, अमू आसाते इत्यादि। अत्र मकारात्परस्य ईकारस्य ऊकारस्य च प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्याः अचि नित्यम्' इत्यनेन अच्सन्धौ प्रकृतिभावः भवति। अर्थात् 'इको यणचि' इति सूत्रेण यणादेशः न भवति।

**५.१.१ आक्षेपः**

'अदसो मात्' इति सूत्रस्य अदश्शब्दावयवात् मकारात् परौ ईदूतौ प्रगृह्यसंज्ञौ भवतः इत्यर्थः स्वीक्रियते चेत् अमी आसाते, अमू आसाते, अमू अत्र इत्येतादृशेषु प्रयोगेषु ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः प्राप्नुवन्ति। तथाहि – 'एत ईद् बहुवचने' (पा.सू. ८.२.८१) इति ईत्वविधायकं सूत्रं त्रिपादीस्थमस्ति। 'अदसोऽसेर्दादु दो मः' (पा.सू. ८.२.८०) इति ऊत्वविधायकं सूत्रमपि त्रिपादीस्थमस्ति। तेन अद् ई इत्यवस्थायां 'आद्गुणः' इति गुणे, अदे इति जाते 'एत ईद् बहुवचने' इति सूत्रेण विहितः ईकारः 'अदसो मात्' इति सूत्रं प्रति 'पूर्वत्रासिद्धम्' (पा.सू. ८.२.१) इति सूत्रबलाद् असिद्धो भवति। यतो हि 'अदसो मात्' इति सपादसप्ताध्यायीस्थं सूत्रमस्ति। तेन अमी आसाते इत्यत्र ईकारस्य असिद्धत्वात् अदे आसाते इत्यवस्थायाम् 'एचोऽयवायावः' (पा.सू. ६.१.७८) इति सूत्रेण अयादेशः प्राप्नोति। अदस्-शब्दात् औप्रत्यये त्यदाद्यत्वे पररूपे अद औ इति जाते 'वृद्धिरेचि' (पा.सू. ६.१.८८) इति सूत्रेण वृद्धौ अदौ इति स्थिते 'अदसोऽसेर्दादु दो मः' इति सूत्रेण विहितः ऊकारः 'अदसो मात्' इति सूत्रं प्रति असिद्धो भवति, यतो हि 'अदसोऽसेर्दादु दो मः' इति त्रिपादीस्थं सूत्रमस्ति, 'अदसो मात्' इति सपादसप्ताध्यायीस्थं सूत्रमस्ति। तेन अमू आसाते इत्यादौ ऊकारस्य

असिद्धत्वात् अदौ आसाते इत्यवस्थायाम् 'एचोऽयवायावः' इति सूत्रेण आवादेशः प्राप्नोति। एवमेव 'एत ईद् बहुवचने' इति ईत्वस्य असिद्धत्वात् अदे अत्र इत्यादौ 'एङः पदान्तादति' (पा.सू. ६.१.१०९) इत्यनेन सूत्रेण पूर्वरूपैकादेशः प्राप्नोति। अमी आसाते, अमू आसाते, अमू अत्र इत्येतादृशेषु प्रयोगेषु ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः यथा न स्युः तदर्थं वार्त्तिककारेण 'मात्प्रगृह्यसञ्ज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः' इति वार्त्तिकं स्वीकृतम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः अमी आसाते, अमू आसाते, अमू अत्र इत्येतादृशेषु प्रयोगेषु ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः कथं न भवन्तीति आक्षेपः सुतरामुदेति।

### ५.१.२ योगविभागेन समाधानम्

अमी आसाते, अमू आसाते, अमू अत्र इत्यादौ ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः कथं न भवन्तीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'अदसः' इत्येको योगः। 'मात्' इत्यपरो योगः। 'अदसः' इति प्रथमसूत्रे 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्राद् ईदूदेद् प्रगृह्यम् चेति पदद्वयमनुवर्तते। अदसः इत्यत्र सम्बन्धसामान्ये षष्ठी। तेन प्रथमसूत्रार्थो भवति – अदसः ईदादयः प्रगृह्यसंज्ञकाः भवन्तीति। 'मात्'

इति द्वितीयसूत्रेऽपि 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्राद् ईदूदेद् प्रगृह्यं चेति पदद्वयमनुवर्तते। किञ्च 'अदसः' इति प्रथमसूत्रमप्यत्रानुवर्तते। तेन द्वितीयसूत्रस्य अर्थो भवति – अदसः मकारात् परे विद्यमानाः ईदादयः प्रगृह्यसंज्ञकाः भवन्तीति। तत्र 'अदसः' इति प्रथमो योगः मीत्वादीनामसिद्धपक्षे प्रगृह्यसंज्ञानिमित्तम्। 'मात्' इति द्वितीयो योगः मीत्वादीनां सिद्धपक्षे प्रगृह्यसंज्ञानिमित्तम्। अतः योगविभागः स्वीक्रियते चेत् उभयपक्षेऽपि न दोषः।

### ५.१.३ समीक्षणम्

'अदसो मात्' इति वचनसामर्थ्यात् अर्थात् अदसो मात्परस्य प्रगृह्यसंज्ञाविधानसामर्थ्याद् मीत्वं, मुत्वञ्च सिद्धं भवति। तेन अयादयः आदेशाः न भवन्ति। तदुक्तं तत्त्वबोधिनीटीकाकारेण – 'अदसो मात्' इति सूत्रं प्रति मूत्वमीत्वं च नासिद्धम्। आरम्भसामर्थ्यात्।'[१] इति। अत्रोच्यते आरम्भसामर्थ्यात् मूत्वमीत्वं च सिद्धमिति वक्तुं न शक्यते। यतो हि यत्र ईत्वादयः आदेशाः सिद्धाः तत्र प्रगृह्यसंज्ञाकार्यार्थमिदं सूत्रमस्ति न तु ईत्वादीनां सिद्धत्वसम्पादनद्वारा प्रकृतिभावरूपप्रगृह्यसंज्ञाकार्यार्थम्। ननु ईत्वादीनां सिद्धे किं तत् प्रगृह्यसंज्ञाकार्यमिति चेदुच्यते – 'अणोऽप्रगृह्यस्यानुनासिकः' (पा.सू. ८.४.५७) इति सूत्रेण विहितः

अनुनासिकादेशः न भवति प्रगृह्यसंज्ञकत्वात्। 'अणोऽप्रगृह्यस्यानुनासिकः' इति सूत्रं त्रिपादीस्थमस्ति। अतः एतत्सूत्रदृष्ट्या ईत्वादयः सिद्धा एव सन्ति। अतः अनुनासिकादेशप्रतिषेधे 'अदसो मात्' इति वचनं चरितार्थं भवति। अतः अत्र वचनसामर्थ्यात् ईत्वादयः सिद्धाः इति वक्तु न शक्यते। तेन 'अदसो मात्' इति सपादसप्ताध्यायीस्थसूत्रदृष्ट्या 'अदसोऽसेर्दादु दो मः' इति त्रिपादीस्थसूत्रद्वारा विहितानाम् ईत्वादीनामसिद्धत्वात् अदे अदौ इत्येवमेव रूपं तिष्ठति। तेन अयादयः आदेशाः प्राप्नुवन्ति एव।

वस्तुतः अत्र योगविभागस्य आवश्यकता नास्ति। यद्यपि 'अणोऽप्रगृह्यस्यानुनासिकः' इत्यादौ चारितार्थ्यात् वचनसामर्थ्यात् प्रगृह्यसंज्ञा वक्तुं न शक्यते। तथापि 'स्वरितो वाऽनुदात्ते पदादौ' (पा.सू. ८.२.६) इति सूत्रस्थवार्त्तिकानुसारं तु प्रगृह्यसंज्ञा सिध्यति। तथाहि – अदस 'ईत्वोत्वे स्वरे बहिष्पदलक्षणे', 'प्रगृह्यसंज्ञायां च' इति वार्त्तिकद्वयमुक्तम्। अत्र बहिष्पदलक्षणे इत्यस्य आशयः द्वितीयपदस्थे इति। अर्थात् यदि अजादिपदं परं वर्तते तर्हि अदसः ईत्वादेशः ऊत्वादेशश्च अयाद्यादेशप्रसङ्गे सिद्धो वक्तव्यः इति प्रथमवार्त्तिकार्थः। तेन एकपदस्थे अचि तु असिद्धे एव ईत्वोत्वे। अतः अमुया अमुयोः इत्यादौ अयादेशे न बाधः। प्रगृह्यसंज्ञाप्रसङ्गे च ईत्वादेशः तथा ऊत्वादेशः सिद्धो वक्तव्यः इति द्वितीयवार्त्तिकार्थः। ननु

ईत्वादयः सिद्धाः इति स्वीक्रियते चेत् सककारे अर्थात् अमुकेऽत्र इत्यादौ दोषः स्यात्। तथाहि – अदसः मकारात् परं यत् ईदन्तम् ऊदन्तम् एदन्तं तत् प्रगृह्यसंज्ञं भविष्यति। तेन अकच्सहितस्य अदसः यत् अमुके इति रूपं भवति तत्रापि प्रगृह्यसंज्ञा प्राप्नोति। यतो हि अमुके इत्यत्रापि मकारात् परम् उके इति एदन्तं वर्तते। तस्य प्रगृह्यसंज्ञायाम् अमुकेऽत्र इत्यत्र 'एङः पदान्तादति' (पा.सू. ६.१.१०९) इति पूर्वरूपसन्धिः न स्यात्। अत्र उच्यते– माद्ग्रहणेन गृह्यमाणम् ईदूदेद्विशेष्यते, न तु ईदाद्यन्तम्। अर्थात् मात् परं यत् ईद् ऊद् एत् तस्य प्रगृह्यसंज्ञा भवति। न तु यत् ईदन्तम्, ऊदन्तम्, एदन्तं तत् प्रगृह्यसंज्ञं भवति। तेन अमुकेऽत्र इत्यत्र न दोषः। यतो हि अत्र मकारात् परम् एत् नास्ति, अपि तु एदन्तमस्ति। अतः अत्र योगविभागः न क्रियते चेदपि न दोषः।

### ५.२. तृतीयासमासे (पा.सू. १.१.३०)

प्रकृतेऽस्मिन् सूत्रे तृतीयासमासे इति सप्तम्येकवचनान्तं पदम्। 'सर्वादीनि सर्वनामानि' (पा.सू. १.१.२७) इति इति सूत्रात् सर्वादीनि सर्वनामानि चेति पदद्वयमनुवर्तते। 'न बहुव्रीहौ' (पा.सू. १.१.२९) इति सूत्रात् न इति अव्ययपदमनुवर्तते। तेन प्रकृतसूत्रार्थो भवति – सर्वादीनि तृतीयासमासे सर्वनामसंज्ञकानि न भवन्तीति। मासेन पूर्वः इत्यत्र

'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' (पा.सू. २.१.३१) इत्यनेन सूत्रेण तृतीयातत्पुरुषसमासे प्रक्रियाकार्ये मासपूर्व इति निष्पद्यते। ततः मासपूर्व इत्यस्य 'कृत्तद्धितसमासाश्च' (पा.सू. १.२.४६) इत्यनेन सूत्रेण समासत्वात् प्रातिपदिकत्वेन स्वादिप्रत्ययाः भवन्ति। ततः प्रथमाबहुवचने, चतुर्थ्येकवचने, पञ्चम्येकवचने च क्रमेण मासपूर्वाः, मासपूर्वाय, मासपूर्वात् इत्येतादृशानि रूपाणि भवन्ति। पूर्वशब्दः सर्वादिगणे पठ्यते। तेन 'सर्वादीनि सर्वनामानि' इत्यनेन सूत्रेण तस्य सर्वनामसंज्ञा भवति। तेन मासपूर्वस्मै इत्येवं रूपं स्यात्, न तु मासपूर्वाय इति। अतः तृतीयासमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञानिषेधार्थमेव 'तृतीयासमासे' इति सूत्रमारब्धम्।

### ५.२.१ आक्षेपः

अत्र आक्षेपः भवति यत् 'विभाषा दिक्समासे बहुब्रीहौ' (पा.सू. १.१.२८) इति सूत्रात् समासे इति पदस्य अनुवृत्तिः सम्भवति तथापि प्रकृतसूत्रे समासे इति पदं किमर्थं गृहीतमिति। अत्रोच्यते मासपूर्वाय देहि, मासेन पूर्वाय देहि इत्यादौ उभयत्र सर्वनामसंज्ञायाः निषेधः यथा स्यात् तदर्थं प्रकृतसूत्रे पुनः समासे इति पदस्य ग्रहणं कृतम्। पुनरप्यत्र आक्षेपः भवति यत् प्रकृतसूत्रे समासे इति पदस्य ग्रहणं क्रियते चेत् कथं मासपूर्वाय

देहि, मासेन पूर्वाय देहि इत्यादौ उभयत्र सर्वनामसंज्ञायाः निषेधः सम्भवतीति।

### ५.२.२ योगविभागेन समाधानम्

मासपूर्वाय देहि, मासेन पूर्वाय देहि इत्यादौ उभयत्र सर्वनामसंज्ञायाः निषेधार्थं महाभाष्यकारेण योगविभागः स्वीकृतः। तथाहि योगविभागः क्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'तृतीया' इति प्रथमं सूत्रम्। 'असमासे' इति द्वितीयं सूत्रम्। तृतीयासमासे इत्यत्र दीर्घसन्धिः अस्ति। 'तृतीया' इति प्रथमसूत्रे 'सर्वादीनि सर्वनामानि' इति इति सूत्रात् सर्वादीनि सर्वनामानि चेति पदद्वयमनुवर्तते। 'न बहुव्रीहौ' इति सूत्रात् न इति अव्ययपदमनुवर्तते। 'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रात् समासे इति पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – तृतीयासमासे सर्वादीनि सर्वनामसंज्ञकानि न भवन्तीति। तेन मासपूर्वाय देहीत्यादौ तृतीयासमासे पूर्वशब्दस्य सर्वनामसंज्ञा न जाता। अतः चतुर्थ्येकवचने 'सर्वनाम्नः स्मै' इति सूत्रेण ङेः स्मै इत्यादेशो न जातः। तेन मासपूर्वाय इत्येव रूपं भवति न तु मासपूर्वस्मै इति। 'असमासे' इति द्वितीयसूत्रस्य अर्थो भवति – असमासे अपि तृतीयायाः परं विद्यमानानि सर्वादीनि सर्वनामसंज्ञानि न भवन्तीति। असमासः इत्यत्र पर्युदासप्रतिषेधोऽस्ति। अतः असमासपदेन

समाससदृशस्य वाक्यस्य ग्रहणम्। सादृश्यञ्चात्र समाससमानपदार्थकत्वेन प्रयोगार्हत्वेन च। तेन मासेन पूर्वाय देहि, संवत्सरेण पूर्वाय देहीत्यादौ वाक्ये पूर्वशब्दस्य न सर्वनामसंज्ञा। तेन मासेन पूर्वस्मै देहि, संवत्सरेण पूर्वस्मै देहि इत्यादि रूपं न भवति। अर्थात् मुख्यतृतीयासमासदशायां विग्रहवाक्यदशायाञ्च सर्वादिगणपठितशब्दानां सर्वनामसंज्ञा न भवति। तेन उभयत्रापि सर्वनामसंज्ञाप्रयुक्तं कार्यं न भवति। तदुक्तं महाभाष्ये – 'अथवा – समास इति वर्तमाने पुनः समासग्रहणस्यैतत् प्रयोजनम्। योगाङ्गं यथोपजायेत। सति च योगाङ्गे योगविभागः करिष्येत – तृतीया, तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। मासपूर्वाय देहि, संवत्सरपूर्वाय देहि। ततः असमासे, असमासे च तृतीयायाः सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। मासेन पूर्वाय देहि।'[२] इति।

### ५.२.३ समीक्षणम्

'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रात् समासे इति पदमनुवर्तते तथापि प्रकृतसूत्रे समासे इति पदस्य ग्रहणं तृतीयासमासपदं तृतीयासमासार्थानां पदानां बोधकं यथा स्यात् तदर्थं कृतमिति प्रतिपादितं सिद्धान्तकौमुद्याम्। तथाहि तादर्थ्यात्ताच्छब्द्यम् इति न्यायेनात्र तृतीयासमासपदं तृतीयासमासार्थपदबोधकम् इति स्वीक्रियते। तेन

प्रयोगार्हस्य लौकिकवाक्यस्य अत्र ग्रहणं भवति। यतो हि मासेन पूर्वाय इति विग्रहवाक्यादेव मासपूर्वाय इति तृतीयासमासः भवति, अतः मासेन पूर्वाय इति पदद्वयं तृतीयासमासार्थमस्ति। तस्मादत्र तृतीयासमासपदेन मासेन पूर्वाय इति पदद्वयस्य ग्रहणं भवति। तेन मासेन पूर्वाय इत्यादौ विग्रहवाक्ये पूर्वशब्दस्य सर्वनामसंज्ञा न भवति। अतः मासेन पूर्वाय इत्यादौ 'सर्वनाम्नः स्मै' इत्यादीनि सर्वनामसंज्ञानिमित्तककार्याणि न भवन्ति। ननु यदि सर्वत्र तृतीयासमासार्थे वाक्ये सर्वनामसंज्ञायाः निषेधः स्यात् तर्हि त्वयका कृतम्, मयका कृतम् इत्यादौ 'अव्ययसर्वनाम्नामकच् प्राक् टेः' (पा.सू. ५.३.७१) इति अकच्प्रत्ययो न स्यात्। यतो हि त्वयका कृतं, मयका कृतम् इत्यादि वाक्यमपि 'कर्तृकरणे कृता बहुलम्' (पा.सू. २.१.३२) इति सूत्रेण विहितः यः समासः तदर्थमस्ति। सर्वनामसंज्ञाभावादत्र कप्रत्यये त्वत्केन कृतं, मत्केन कृतम् इत्येवं रूपं स्यात्। अत्रोच्यते लक्षणप्रतिपदोक्तपरिभाषया अत्र 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्र-श्लक्ष्णैः' इति सूत्रेण विहितस्यैव समास्य ग्रहणं न तु 'कर्तृकरणे कृता बहुलम्' इति सूत्रेण विहितस्य। तेन त्वयका कृतं, मयका कृतमित्यादौ न दोषः। ननु यदि तृतीयासमासपदं तृतीयासमासार्थपदबोधकमिति स्वीक्रियते तर्हि समुदाये अर्थात् मुख्ये तृतीयासमासे सर्वनामसंज्ञायाः निषेधः न स्यात्। तेन मासपूर्वाय इत्यादौ

तृतीयासमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञायां मासपूर्वस्मै इत्यनिष्टं रूपं स्यात्। अत्रोच्यते – वाक्यभेदेन मुख्ये समासे निषेधः भवतीति। तथाहि– तृतीया इति प्रथमं वाक्यम्। अत्र तृतीया इति लुप्तषष्ठीकं पदमस्ति। 'विभाषा दिक्समासे बहुव्रीहौ' इत्यस्मात् सूत्रात् समासे इत्यनुवर्तते। अत्रानुवर्तमानं समासपदं प्राथमकल्पिकसमासपरमस्ति। अर्थात् तृतीया इति प्रथमवाक्यद्वारा मासपूर्वाय इत्यादौ मुख्यसमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञायाः निषेधो भवति। 'समासे' इति द्वितीयं वाक्यम्। अत्र तृतीया इति अनुवर्तते। अत्र समासे इत्यस्यार्थः अस्ति समासार्थवाक्ये इति। तेन द्वितीयवाक्यस्यार्थो भवति – तृतीयासमासार्थवाक्ये सर्वादिगणपठितशब्दानां सर्वनामसंज्ञा न भवतीति। तेन 'तृतीया' इति प्रथमवाक्येन प्राथमकल्पिकसमासे अर्थात् मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधः, 'समासे' इति द्वितीयवाक्येन च समासार्थवाक्ये अर्थात् विग्रहे सर्वनामसंज्ञायाः निषेधो भवति। अतः मासपूर्वाय देहि, मासेन पूर्वाय देहि इत्यादौ न कुत्रापि दोषः।

वस्तुतः अत्र योगविभागः क्रियते चेदेव वरम्। यतो हि अनुवर्तमानस्य समासपदस्य समासार्थवाक्यबोधकत्वस्वीकारे न कापि हानिः। अतः समासार्थवाक्यबोधनार्थं पुनः समासपदग्रहणस्य आवश्यकता नास्ति। अपि

च पुनर्गृहीतस्य समासपदस्य समासार्थवाक्यबोधकत्वस्वीकारे प्राथमकल्पिकसमासे अर्थात् मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधः न भवति। मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधार्थं पृथक्तया वाक्यभेदस्य आवश्यकता भवति। वाक्यभेदश्च योगविभागं विना न सम्भवति। अतः योगविभागेन उभयत्र सर्वनामसंज्ञायाः निषेधः क्रियते चेदेव वरम्।

### ५.३. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु (पा.सू. १.१.५८)

द्विपदात्मके अस्मिन् सूत्रे न इति अव्ययपदम्। पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु इति सप्तम्यन्तं पदम्। 'स्थानिवदादेशोऽनल्विधौ' (पा.सू. १.१.५६) इति सूत्रात् स्थानिवत्, आदेशः चेति पदद्वयमनुवर्तते। 'अचः परस्मिन् पूर्वविधौ' (पा.सू. १.१.५७) इति सूत्रात् अचः, परस्मिन्, पूर्वविधौ चेति पदत्रयमनुवर्तते। तेन सम्पूर्णसूत्रं भवति – पदान्तद्विर्वचनवरेयलोपस्वरसवर्णा-नुस्वारदीर्घजश्चर्विधिषु अचः आदेशः परस्मिन् स्थानिवद् न इति। प्रकृतसूत्रार्थो भवति – पदान्ते द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् इति। स्थानिनः स्थाने यदा कश्चन आदेशः विधीयते तदा स्थानिनः गुणधर्माः चतुर्भिः सूत्रैः आदेशे अपि अतिदिश्यन्ते। तेषु चतुर्षु सूत्रेषु प्रकृतमिदं सूत्रं

स्थानिवद्भावनिषेधविधायकं सूत्रमस्ति। 'अचः परस्मिन् पूर्वविधौ' इत्यनेन पूर्वसूत्रेण विहितः स्थानिवद्भावः पूर्वोक्तेषु दशसु पूर्वविधिषु प्रकृतसूत्रेण निषिध्यते। अर्थात् परनिमित्तकः अजादेशः पदान्तादिषु पूर्वोक्तेषु दशसु पूर्वविधिषु कर्तव्ये स्थानिवत् न भवतीति बोध्यम्।

### ५.३.१ आक्षेपः

ननु वरेयलोपविधिं प्रति न स्थानिवद्भवतीत्युच्यते चेत् अप्सु यायावरः प्रवपेत पिण्डान् इत्यादौ यायावरः इति रूपं न सिध्यति। तथाहि – या प्रापणे इति धातोः यङ्प्रत्यये निष्पन्नात् यायाय इति धातोः 'यश्च यङः' (पा.सू. ३.२.१७६) इति सूत्रेण वरच्प्रत्यये अनुबन्धलोपे यायाय वर इति जाते 'अतो लोपः' (पा.सू. ६.४.४८) इति सूत्रेण यकारोत्तरस्य अकारस्य लोपे यायाय् वर इति स्थिते, अल्लोपस्य स्थानिवत्त्वेन 'लोपो व्योर्वलि' (पा.सू. ६.१.६६) इति सूत्रेण यलोपे अप्राप्ते तत्र स्थानिवत्त्वनिषेधार्थं वरेयलोपग्रहणं कृतमिति उच्यते चेत् यङ्प्रत्ययस्य ङित्त्वात् 'आतो लोप इटि च' (पा.सू. ६.४. ६४) इत्यनेन सूत्रेण द्वितीययकारोत्तरस्याकारस्य लोपे कर्तव्ये अल्लोपः स्थानिवत् स्यादेव। तेन वरेयलोपग्रहणे कृतेऽपि यायावरः इति रूपं कथं सिध्यतीति आक्षेपः उदेति।

### ५.३.२ योगविभागेन समाधानम्।

अप्सु यायावरः प्रवपेत पिण्डान् इत्यादौ यायावरः इति रूपं कथं सिध्यति इति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तदुक्तं महाभाष्ये – 'अथवा योगविभागः करिष्यते। वरे लुप्तं न स्थानिवत्। ततः – यलोपविधिं प्रति न स्थानिवत्' इति।[३] वरे लुप्तं न स्थानिवत् इत्यनेन आलोपेऽपि कर्तव्ये अल्लोपो न स्थानिवत् इति बोध्यम्।

### ५.३.३ समीक्षणम्

वस्तुतः अत्र योगविभागस्य आवश्यकता नास्ति। प्रकृतसूत्रे वरे इति पृथक् पदम्। यलोप इति पृथक् पदम्। वरे इत्यत्र निपातनाद् लुक् न भवति। तदुक्तं काशिकाकारेण – 'वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद् भवति। अप्सु यायावरः प्रवपेत पिण्डान्। यातेर्यङन्ताद् 'यश्च यङः' (३.२.१७६) इति वरचि कृते 'अतो लोपः' (६.४.४८) परनिमित्तकः, तस्य स्थानिवत्त्वाद् 'आतो लोप इटि च' (६.४.६४) इत्याकारलोपः स्याद्, अस्माद् वचनाद् न भवति। यलोप – यलोपविधिं प्रत्यजादेशो न स्थानिवद् भवति। कण्डूतिः। कण्डूयतेः क्तिचि कृते 'अतो लोपः' (६.४.४८) परनिमित्तको 'लोपो व्योर्वलि' (६.१.६६) इति यलोपे स्थानिवत् स्याद्, अस्माद् वचनाद् न भवति।'[४] इति।

## ५.४. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (पा.सू. २.३.१७)

प्रकृतेऽस्मिन् सूत्रे चत्वारि पदानि सन्ति। तत्र मन्यकर्मणि इति सप्तम्येकवचनान्तं पदम्। अनादरे इत्यपि सप्तम्येकवचनान्तं पदम्। विभाषा इति प्रथमैकवचनान्तं पदम्। अप्राणिषु इति सप्तमीबहुवचनान्तं पदम्। 'चतुर्थी सम्प्रदाने' (पा.सू. २.३.१३) इति सूत्रात् चतुर्थी इति पदमनुवर्तते। तेन सूत्रार्थो भवति – मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवत्यनादरे गम्यमाने इति। मन्यतेः कर्म मन्यकर्म तस्मिन् मन्यकर्मणि इति बोध्यम्। अत्र अनादरपदस्यार्थः तिरस्कारः इति। प्रकृतसूत्रस्य उदाहरणं यथा – न त्वां तृणं मन्ये, न त्वां तृणाय मन्ये इत्यादि।

### ५.४.१ आक्षेपः

अत्र आक्षेपः भवति यत्, यदि प्रकृतसूत्रेण प्राणिवर्जिते मन्यकर्मणि विकल्पेन चतुर्थी विभक्तिः विधीयते तर्हि न त्वां शुने मन्ये इत्यादौ चतुर्थी विभक्तिः कथं भवतीति। यतो हि प्रकृते उदाहरणे श्वा मन्यकर्म अस्ति। श्वा तु प्राणिरेवास्ति, तर्हि न त्वां शुने मन्ये इत्यत्र चतुर्थी कथं भवतीति आक्षेपः उदेति।

## ५.४.२ योगविभागेन समाधानम्

न त्वां शुने मन्ये इत्यादौ चतुर्थी विभक्तिः कथं सिध्यतीति शङ्कायाः समाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'मन्यकर्मण्यनादरे विभाषा' इति प्रथमं सूत्रम्। 'अप्राणिषु' इति द्वितीयं सूत्रम्। 'मन्यकर्मण्यनादरे विभाषा' इति प्रथमसूत्रे 'चतुर्थी सम्प्रदाने' इति सूत्रात् चतुर्थी इति पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – मन्यकर्मणि विभाषा चतुर्थी विभक्तिर्भवत्यनादरे गम्यमाने इति। एवञ्च न त्वां शुने मन्ये इत्यादौ मन्यकर्मणि चतुर्थी विभक्तिः सिध्यति। 'अप्राणिषु' इति द्वितीयसूत्रेऽपि 'चतुर्थी सम्प्रदाने' इति सूत्रात् चतुर्थी इति पदमनुवर्तते किञ्च सम्पूर्णं प्रथमसूत्रञ्च अनुवर्तते। तेन द्वितीयसूत्रार्थो भवति – मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवत्यनादरे गम्यमाने इति। तेन न त्वां तृणाय मन्ये इत्यादौ चतुर्थी विभक्तिः सिध्यति। तदुक्तं महाभाष्ये – 'एवं तर्हि योगविभागः करिष्यते – मन्यकर्मण्यनादरे विभाषा। ततः अप्राणिषु। अप्राणिषु च विभाषेति।'[५] इति।

### ५.४.३ समीक्षणम्

वस्तुतः योगविभागः स्वीक्रियते चेत् अतिव्याप्तिदोषो भवति। तथाहि– 'मन्यकर्मण्यनादरे विभाषा' इत्यनेन प्रथमसूत्रेण यथा न त्वा शुने मन्ये इत्यत्र चतुर्थी भवति तथैव न त्वा काकं मन्ये, न त्वा शुकं मन्ये इत्यादावपि चतुर्थी प्राप्नोति। ननु 'योगविभागादिष्टसिद्धिः' इति परिभाषाबलात् न त्वा शुने मन्ये इत्यादौ एव इष्टसिद्ध्यर्थं चतुर्थी सिध्यति, न तु न त्वा काकं मन्ये इत्यादौ अनिष्टे चतुर्थ्याः प्रसक्तिः। अतः अत्र अतिव्याप्तिदोषः न भवति। इत्यपि वक्तुं न शक्यते। यतो हि योगविभागस्य इष्टसिद्ध्यर्थत्वेन 'मन्यकर्मण्यनादरे विभाषा' इत्यादेः सामान्यवाक्यस्य असार्वत्रिकत्वात् यद्यपि न त्वा काकं मन्ये इत्यादौ अनिष्टे चतुर्थ्याः प्रसक्तिः न भवति तथापि अप्राणिविषयकविभाषाविधायकस्य 'अप्राणिषु' इत्यादेः विशेषवाक्यस्य सार्वत्रिकत्वात् न त्वा नावं मन्ये इत्यादौ अप्राणिविषये तु विभाषया चतुर्थी विभक्तिः प्राप्नोत्येव। एवञ्च योगविभागः स्वीक्रियते चेत् न त्वा नावं मन्ये इत्यादौ अतिव्याप्तिदोषः भवत्येव। अतः महाभाष्यकारेणापि अत्र उपायान्तरेण आक्षेपसमाधानं कृतम्। 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इत्यस्मिन् प्रकृतसूत्रे अप्राणिषु इत्यस्य स्थाने अनावादिषु इति स्वीकृतः। अर्थात् 'मन्यकर्मण्यनादरे विभाषाऽनावादिषु' इति सूत्रस्वरूपं स्वीकृतम्।

एवञ्च प्राणिषु अप्राणिषु वा यत्र यत्र चतुर्थी नेष्यते ते नावादिष्वन्तर्भविष्यन्ति। तदुक्तं महाभाष्ये – 'यदेतद् अप्राणिषु इति, एतद् अनावादिषु इति वक्ष्यामि। इमे च नावादयो भविष्यन्ति। न त्वा नावं मन्ये यावत्तीर्णं न नाव्यम्। न त्वान्नं मन्ये यावद् भुक्तं न श्राद्धमिति। अत्र येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्ति।'[६] इति। काशिकाकारेण सिद्धान्तकौमुदीकारेण चात्र योगविभागः न स्वीकृतः। 'अप्राणिष्वित्यपनीय नौकाकान्नशुकश्रृगालवर्ज्येष्विति वाच्यम्' इति वार्त्तिकं स्वीकृत्य अत्र आक्षेपसमाधानं कृतम्। परन्तु वार्त्तिकस्वीकारपक्षे गौरवदोषो भवति। अतः 'मन्यकर्मण्यनादरे विभाषाऽनावादिषु' इति सूत्रस्वरूपं स्वीक्रियते चेदेव वरम्।

### ५.५. कृत्यानां कर्तरि वा (पा.सू. २.३.७१)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र कृत्यानाम् इति षष्ठीबहुवचनान्तं पदम्। कर्तरि इति सप्तम्येकवचनान्तं पदम्। वा इत्यव्ययपदम्। 'षष्ठी शेषे' (पा.सू. २.३.५०) इति सूत्रात् षष्ठी इति पदमनुवर्तते। तेन सूत्रार्थो भवति – कृत्यानां प्रयोगे कर्तरि वा षष्ठी विभक्तिर्भवतीति। 'कृत्याः' (पा.सू. ३.१.९५) इत्यधिकृत्य विहिताः केचन कृत्प्रत्ययविशेषाः कृत्यप्रत्ययाः, तेषां योगे कर्तरि षष्ठी विकल्पेन स्यादिति

बोध्यम्। ‘कर्तृकर्मणोः कृति’ (पा.सू. २.३.६५) इति सूत्रेण नित्यं षष्ठीप्राप्ते अनेन सूत्रेण विकल्पेन षष्ठी विधीयते। उदाहरणं यथा – मया मम वा सेव्यो हरिः इत्यादि।

### ५.५.१ आक्षेपः

नेतव्या व्रजं गावः कृष्णेन, ग्राममाक्रष्टव्या शाखा यज्ञदत्तेन इत्यादौ कृत्यप्रत्ययप्रयोगे ‘उभयप्राप्तौ कर्मणि’ (पा.सू. २.३.६६) इति सूत्रं प्रबाध्य प्रकृतसूत्रेण कर्तरि विकल्पेन षष्ठीविभक्तिः कथं न भवतीति आक्षेपः भवति। किञ्च ‘कर्तृकर्मणोः कृति’ इत्यनेन सूत्रेण कर्मणि नित्यं षष्ठीविभक्तिः कथं न भवतीत्यपि आक्षेपः उदेति।

### ५.५.२ योगविभागेन समाधानम्

अत्र आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र ‘कृत्यानाम्’ इति प्रथमं सूत्रम्। ‘कर्तरि वा’ इति द्वितीयं सूत्रम्। ‘कृत्यानाम्’ इति प्रथमसूत्रे ‘उभयप्राप्तौ कर्मणि’ इति सूत्रात् उभयप्राप्तौ इति पदमनुवर्तते। ‘न लोकाव्ययनिष्ठाखलर्थतृनाम्’ इति सूत्रात् न इति पदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति – कृत्यप्रत्यययोगे कर्तृकर्मणोरुभयोः प्रसक्ता षष्ठी न

स्यादिति। उदाहरणं यथा – नेतव्या व्रजं गावः कृष्णेन, ग्राममाक्रष्टव्या शाखा यज्ञदत्तेन इत्यादि। 'कर्तरि वा' इति द्वितीयसूत्रे 'कृत्यानाम्' इति प्रथमं सूत्रम् अनुवर्तते। तेन द्वितीयसूत्रार्थो भवति – कृत्यप्रत्यययोगे कर्तरि षष्ठी वा स्यादिति। अस्य उदाहरणं यथा – मया मम वा सेव्यो हरिः इत्यादि। द्वितीयसूत्रं तु अनुभयप्राप्तिविषयकमिति बोध्यम्। तदुक्तं महाभाष्ये– 'एवं तर्हि योगविभागः करिष्यते – कृत्यनाम्, कृत्यानां प्रयोगे षष्ठी न भवतीति। किमुदाहरणम्। ग्राममाक्रष्टव्या शाखा। ततः कर्तरि वा इति'[७] इति।

**५.५.३ समीक्षणम्**

वस्तुतः अत्र योगविभागः अवश्यं कर्तव्यः। सिद्धान्तकौमुदीकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं तेन – 'अत्र योगो विभज्यते। कृत्यानाम्। उभयप्राप्तौ इति न इति चानुवर्तते। तेन नेतव्या व्रजं गावः कृष्णेन। ततः कर्तरि वा। उक्तोऽर्थः।'[८] इति। काशिकाकारेण तु 'उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः' इति वार्त्तिकं स्वीकृत्य समाधानं कृतम्।

## ५.६. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा.सू. २.४.२)

प्रकृतेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र द्वन्द्वः इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। प्राणितूर्यसेनाङ्गानाम् इति षष्ठीबहुवचनान्तं पदम्। 'द्विगुरेकवचनम्' (पा.सू. २.४.१) इति पूर्वसूत्रात् एकवचनम् इति पदमनुवर्तते। प्राणितूर्यसेनाङ्गानीति द्वन्द्वगर्भषष्ठीसमासः। द्वन्द्वान्ते श्रूयमाणः अङ्गशब्दः प्रत्येकं सम्बध्यते। तेन प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च इति वाक्यत्रयं सम्पद्यते। तेन सूत्रार्थो भवति – प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च द्वन्द्वः एकवत् स्यादिति। उदाहरणं यथा – पाणिपादम्, मार्दङ्गिकपाणविकम्, रथिकाश्वारोहम् इत्यादि।

### ५.६.१ आक्षेपः

अत्र आक्षेपः मनसि उदेति यत् पाणिमार्दङ्गिकाश्वारोहा इत्यादौ एकवद्भावः कथं न भवतीति। अत्र वार्त्तिककारेण 'प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणम्' इति वार्त्तिकं स्वीकृत्य समाधानं कृतम्। प्रकृतवार्त्तिकबलात् यदङ्गवाचि पूर्वपदं तदङ्गवाच्येव यदि उत्तरपदं स्यात् तर्हि एकवद्भावो भवतीति सिध्यति। अर्थात् प्राण्यङ्गानां प्राण्यङ्गैः,तूर्याङ्गानां तूर्याङ्गैः तथा सेनाङ्गानां सेनाङ्गैः एव यदि द्वन्द्वसमासो भवति तर्हि एकवद्भावो भवति नान्यथा इति बोध्यम्। तेन पाणिमार्दङ्गिकाश्वारोहा इत्यादौ

एकवद्भावः न भवति। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति यत् पाणिमार्दङ्गिकाश्वारोहा इत्यादौ एकवद्भावः कथं न भवतीति।

### ५.६.२ योगविभागेन समाधानम्

पाणिमार्दङ्गिकाश्वारोहा इत्यादौ एकवद्भावः कथं न भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। योगविभागं स्वीकृत्य अत्र त्रीणि सूत्राणि सम्पादयन्ति। तत्र 'प्राण्यङ्गानाम्' इति प्रथमं सूत्रम्। 'तूर्याङ्गानाम्' इति द्वितीयं सूत्रम्। 'सेनाङ्गानाम्' इति तृतीयं सूत्रम्। तदुक्तं महाभाष्ये – 'योगविभागः करिष्यते – प्राण्यङ्गानाम्। ततः तूर्याङ्गानाम्। ततः सेनाङ्गानाम्। इति।'[१]

### ५.६.३ समीक्षणम्

वस्तुतः अत्र योगविभागस्य आवश्यकता नास्ति। यतो हि प्राणितूर्यसेनाङ्गानाम् इत्यत्र बहुवचनान्तः अङ्गशब्दः प्रत्येकम् अभिसम्बध्यते। किञ्च प्राणितूर्यसेनानाम् एकम् अङ्गं न सम्भवतीति सामर्थ्यादेव प्रत्येकपरिसमाप्तिः अङ्गशब्दस्य सिध्यति। तेन बहुवचनान्तस्य अङ्गशब्दस्य प्रत्येकं परिसमाप्तिः अन्यथा सिध्यति। अतः अस्मात्

ग्रहणकसूत्रात् लक्ष्यसंस्कारकं बहुवचनान्ताङ्गशब्दघटितं वाक्यत्रयं सम्पद्यते। अतः शङ्करदोषो न भवति। तदुक्तं काशिकाकारेण – 'अङ्गशब्दस्य प्रत्येकं वाक्यपरिसमाप्त्या त्रीणि वाक्यानि सम्पद्यन्ते। प्राण्यङ्गानां द्वन्द्व एकवद् भवति, तथा तूर्याङ्गानां सेनाङ्गानां च।'[10] इति। अन्ते महाभाष्यकारेणापि योगविभागः न कर्तव्यः इति उक्तम्। तदुक्तं – 'स तर्हि योगविभागः कर्तव्यः। न कर्तव्यः। प्रत्येकमङ्गशब्दः परिसमाप्यते।'[11] इति।

## ५.७. उपसर्गादृति धातौ (पा.सू. ६.१.९१)

त्रिपदात्मकेऽस्मिन् सूत्रे उपसर्गात् इति पञ्चम्येकवचनान्तं पदम्। ॠति इति सप्तम्येकवचनान्तं पदम्। धातौ इत्यपि सप्तम्येकवचनान्तं पदम्। 'आद्गुणः' (पा.सू. ६.१.८७) इति सूत्रात् आत् इति पदमनुवर्तते। 'वृद्धिरेचि' (पा.सू. ६.१.८८) इति सूत्रात् वृद्धिः इति पदमनुवर्तते। 'एकः पूर्वपरयोः' (पा.सू. ६.१.८४) इति सूत्रमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – आत् उपसर्गात् ॠति धातौ पूर्वपरयोः एकः वृद्धिः इति। प्रकृतसूत्रस्यार्थो हि – अवर्णान्तादुपसर्गादृकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवतीति। 'उपसर्गादृति धातौ' इत्यनेन सूत्रेण 'आद्गुणः' इति सूत्रेण प्राप्तं गुणं प्रबाध्य वृद्धिः विधीयते। उदाहरणं यथा – उपार्च्छति, प्रार्च्छति इत्यादि।

'न माङ्योगे' (पा.सू. ६.४.७४) इत्येकं सूत्रं वर्तते। द्विपदात्मकेऽस्मिन् सूत्रे न इति अव्ययपदम्। माङ्योगे इति सप्तम्यन्तं पदम्। 'आडजादीनाम्' (पा.सू. ६.४.७२) इति सूत्रात् आट् इति पदमनुवर्तते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (पा.सू. ६.४.७१) इति सूत्रात् लुङ्लङ्लृङ्क्षु, अट् चेति पदद्वयम् अनुवर्तते। तेन सूत्रार्थो भवति – माङ्योगे लुङ्लङ्लृङ्क्षु अडाटौ न स्तः इति। उदाहरणं यथा – मा भवान् भूत् इत्यादि।

### ५.७.१ आक्षेपः

ननु 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति' इति परिभाषाबलात् 'न माङ्योगे' इति सूत्रेण 'आडजादीनाम्' इति सूत्रेण विहितम् आट् एव निषिध्यते, न तु 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण विहितम् अट् अपि। परन्तु अटः अपि प्रतिषेधः इष्टः। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रात् अट् अपि अनुवर्तते, तेन अटः अपि निषेधः सिध्यतीति उच्यते चेत् 'आडजादीनाम्' इति सूत्रेण अजादीनामपि अट् प्राप्नोति। अटि कृते पुनराट् भविष्यति इति वक्तुं न शक्यते, यतो हि अकार्षीत्, अहार्षीत् इत्यादौ अपि अटि कृते पुनराट् प्राप्नोति। किञ्च यदि अजादीनामपि अडेव स्यात् तर्हि 'आटश्च' (पा.सू. ६.१.९०) इति सूत्रेण वृद्धिः न स्यात्। 'अटश्च' इत्येव सूत्रं कृत्वा दोषो निवार्यते इति चेद् अकार्षीत् इत्यत्र अपि वृद्धिः प्राप्नोति। किञ्च

स्वप्-धातोः कर्तरि लङि मध्यमपुरुषैकवचने सिपि शपि 'अदिप्रभृतिभ्यः शपः' (पा.सू. २.४.७२) इति शपः लुकि 'अङ्गार्ग्यगालवयोः' (पा.सू. ७.३.९९) इति सिपः अटि स्वप् अट् स् इति स्थिते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमे अट् स्वप् अ स् इति जाते 'ससजुषो रुः' (पा.सू. ८.२.६६) इति रुत्वे अस्वप् अ रु हसति इति जाते 'हशि च' (पा.सू. ६.१.११४) इति रोः उत्वे अस्वप् अ उ हसति इति स्थिते 'आद्गुणः' इति गुणे अस्वपो हसति इति सिध्यति। यदि 'अटश्च' इति सूत्रं क्रियते तर्हि अस्वप् अ उ हसति इति स्थिते वृद्धिः प्राप्नोति। अत्र वार्त्तिककारेण 'धातौ वृद्धिमटः स्मरेत्' इति वार्त्तिकं स्वीकृत्य समाधानं कृतम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति यत् यदि 'अटश्च' इति सूत्रं क्रियते तर्हि अस्वप् अ उ हसति इति स्थिते वृद्धिः कथं न भवतीति।

### ५.७.२ योगविभागेन समाधानम्

'अटश्च' इति सूत्रं क्रियते तर्हि अस्वप् अ उ हसति इति स्थिते वृद्धिः कथं न भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण 'उपसर्गादृति धातौ' इति सूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'उपसर्गादृति' इति प्रथमं सूत्रम्। 'धातौ' इति द्वितीयं सूत्रम्। तदुक्तं महाभाष्ये – 'योगविभागः करिष्यते – अटः अचि

वृद्धिर्भवति। ततः उपसर्गादृति – वृद्धिर्भवति। ततः धातौ इत्युभयोः शेषः।'[१२] इति।

### ५.७.३ समीक्षणम्

वस्तुतः अत्र 'धातौ वृद्धिमटः स्मरेत्' इति वार्त्तिकप्रत्याख्यानाय 'उपसर्गादृति धातौ' इति सूत्रे योगविभागः स्वीकृतः। परन्तु 'धातौ वृद्धिमटः स्मरेत्' इति वार्त्तिकस्य आवश्यकता नास्ति। यतो हि 'अटश्च' इति सूत्रकरणस्य आवश्यकता नास्ति। अत्र 'न माङ्योगे' इति पृथक् सूत्रकरणसामर्थ्यादेव ज्ञायते यत् सर्वस्य प्राकरणिकस्य प्रतिषेधः इष्टः इति। यतो हि यद्ययमनन्तरस्याट एव प्रतिषेधः स्यात् तर्हि तत्संयुक्तमेव प्रतिषेधं कुर्यात् – आडजादीनाममाङ्योगे इति। अत एव काशिकाकारेण उक्तं – 'माङ्योगे लुङ्लङ्लृङ्क्षु यदुक्तं तन्न भवति'[१३] इति। किञ्च मण्डूकप्लुतिन्यायेनात्राटोऽनुवृत्तिः क्रियते चेदपि न दोषः। अतः 'उपसर्गादृति धातौ' इति सूत्रे योगविभागस्य आवश्यकता नास्ति।

### ५.८. अमि पूर्वः (पा.सू. ६.१.१०६)

सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र अमि इति सप्तम्येकवचनान्तं पदम्। पूर्वः इति प्रथमैकवचनान्तं पदम्। 'इको यणचि' (पा.सू. ६.१.७७) इति

सूत्रात् अचि इति पदमनुवर्तते। 'अकः सवर्णे दीर्घः' (पा.सू. ६.१.१०१) इति सूत्रात् अकः इति पदमनुवर्तते। सूत्रमिदम् 'एकः पूर्वपरयोः' (पा.सू. ६.१.८४) इत्यधिकारे वर्तते। तेन सूत्रार्थो भवति – अमि परतोऽकः पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशो भवतीति। उदाहरणं यथा – वृक्षम्, प्लक्षम् इत्यादि।

**५.८.१ आक्षेपः**

वृक्षान्, प्लक्षान् इत्यादौ 'प्रथमयोः पूर्वसवर्णः' (पा.सू. ६.१.१०२) इति सूत्रं प्रबाध्य 'अतो गुणे' (पा.सू. ६.१.९७) इत्यनेन सूत्रेण पररूपं प्राप्नोति। यतो हि नाप्राप्ते विध्यन्तरे तस्यारम्भात् सर्वापवादत्वात् पररूपं पूर्वसवर्णदीर्घं बाधते। अतः अत्र वार्त्तिककारेण 'प्रथमयोः पूर्वसवर्णः' इत्यस्मिन् सूत्रे योगविभागः स्वीकृतः। तत्र 'प्रथमयोः' इत्येकं सूत्रम्। 'पूर्वसवर्णः' इत्यपरं सूत्रम्। प्रथमसूत्रस्य अर्थो भवति – प्रथमयोः अकः सवर्णदीर्घो भवतीति। द्वितीयसूत्रस्यार्थो भवति – पूर्वसवर्णदीर्घो भवत्यकः प्रथमयोरिति। परन्तु अत्र योगविभागः स्वीक्रियते चेत् वृक्षम् प्लक्षम् इत्यादि रूपं न स्यात्। यतो हि योगविभागेन यथा 'अतो गुणे' इति सूत्रेण विहितं पररूपं बाधते तथैव 'अमि पूर्वः' इति सूत्रेण विहितं पूर्वरूपमपि बाधेत। तेन वृक्षम् प्लक्षम् इत्यादावपि दीर्घः स्यात्।

### ५.८.२ योगविभागेन समाधानम्

वृक्षम् प्लक्षम् इत्यादौ प्राप्तं दीर्घं निवारणार्थं महाभाष्यकारेण 'अमि पूर्वः' इत्यस्मिन् सूत्रे योगविभागः स्वीकृतः। योगविभागेनात्र आक्षेपसमाधानं कृतम्। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'अमि' इति प्रथमं सूत्रम्। 'पूर्वः' इति द्वितीयं सूत्रम्। 'अमि' इति प्रथमसूत्रे 'नादिचि' (पा.सू. ६.१.१०४) इति सूत्रात् न इति अव्ययपदमनुवर्तते। तेन प्रथमसूत्रार्थो भवति अमि यदुक्तं तत् न भवतीति। 'पूर्वः' इति द्वितीयसूत्रस्य अर्थो भवति – पूर्वश्च भवत्यमीति। 'प्रथमयोः' इति योगविभागेन प्राप्तः दीर्घोऽपि न भवति। तदुक्तं महाभाष्ये – 'अम्यपि योगविभागः करिष्यते – अमि। अमि यदुक्तं तन्न भवतीति। ततः – पूर्वः। पूर्वश्च भवत्यमीति।'[१४]

### ५.८.३ समीक्षणम्

वस्तुतः अत्र योगविभागः नावश्यकः। यतो हि 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषाबलेनैव 'अतो गुणे' इति सूत्रेण विहितं पररूपम् 'अकः सवर्णे दीर्घः' इति सूत्रमेव बाधते, न तु 'प्रथमयोः पूर्वसवर्णः' इति सूत्रमपि। तेन 'प्रथमयोः पूर्वसवर्णः' इति सूत्रे योगविभागः न करणीयः। अतः 'अमि पूर्वः' इति सूत्रेऽपि योगविभागस्य

आवश्यकता नास्ति। तदुक्तं काशिकाकारेण 'अतो गुणे' (६.१.९७) इति यदकारे पररूपं तदकः सवर्णे दीर्घत्वमेव बाधते, न तु पूर्वसवर्णदीर्घत्वम् – 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते' (परि. ५९) इति।'[१५] इति।

## ५.९. कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलो दासीभाराणां च (पा.सू. ६.२.४२)

प्रकृतेऽस्मिन् सूत्रे नव पदानि सन्ति। तत्र कुरुगार्हपत इति लुप्तविभक्तिकं पदम्। रिक्तगुरु इत्यपि लुप्तविभक्तिकं पदम्। असूतजरति इति प्रथमैकवचनान्तं पदम्। अश्लीलदृढरूपा इति प्रथमैकवचनान्तं पदम्। पारेवडवा इति प्रथमैकवचनान्तं पदम्। तैतिलकद्रूः इति प्रथमैकवचनान्तं पदम्। पण्यकम्बलः इत्यपि प्रथमैकवचनान्तं पदम्। दासीभाराणाम् इति षष्ठीबहुचनान्तं पदम्। च इति अव्ययपदम्। 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (पा.सू. ६.२.१) इति सूत्रात् प्रकृत्या पूर्वपदं चेति पदद्वयमनुवर्तते। तेन सूत्रार्थो भवति – एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृतिस्वरं भवतीति। उदाहरणं यथा – कुरूणां गार्हपतं कुरुगार्हपतम् इत्यादि।

### ५.९.१ आक्षेपः

वृजिगार्हपतस्यापि पूर्वपदं प्रकृतिस्वरयुतमिष्यते। अतः वार्त्तिककारेण 'कुरुवृज्योर्गार्हपते' इति वार्त्तिकं स्वीकृतम्। परन्तु महाभाष्यकारेण

वार्त्तिकमिदं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति यत् वृजिगार्हपतस्य पूर्वपदं प्रकृतिस्वरयुतं कथं सिध्यतीति।

### ५.९.२ योगविभागेन समाधानम्

वृजिगार्हपतस्य पूर्वपदं प्रकृतिस्वरयुतं कथं सिध्यतीति आक्षेपसमाधानार्थं महाभाष्यकारेण प्रकृतसूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलः' इति प्रथमं सूत्रम्। 'दासीभाराणां च' इति द्वितीयं सूत्रम्। दासीभाराणां च इति बहुवचननिर्देशात् दासीभारादीनां च इति बोध्यम्। अर्थात् दासीभारशब्दसहचरितेषु तद्रूपारोपेण बहुवचननिर्देशः। तेन अत्र गणपाठः संगृहीतो भवति। एवञ्च वृजिगार्हपतशब्दस्यापि गणपाठेन ग्रहणात् पूर्वपदं प्रकृतिस्वरयुतं सिध्यति। तदुक्तं महाभाष्ये – 'योगविभागः करिष्यते – कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलः इति। ततः – दासीभाराणां च इति। तत्र बहुवचननिर्देशात् दासीभारादीनां च – इति विज्ञास्यते'[१६] इति।

### ५.९.३ समीक्षणम्

अत्र योगविभागः स्वीक्रियते चेत् 'कुरुवृज्योर्गार्हपते' इति वार्त्तिकस्य आवश्यकता नास्ति। वार्त्तिकं स्वीक्रियते चेत् योगविभागस्य आवश्यकता नास्ति। काशिकायां, सिद्धान्तकौमुद्याञ्च वार्त्तिकमेव दृश्यते। महाभाष्ये तु योगविभागद्वारा 'कुरुवृज्योर्गार्हपते' इति वार्त्तिकं प्रत्याख्यातम्।

### ५.१०. अट्कुप्वाङ्नुम्व्ययायेऽपि (पा.सू. ८.४.२)

द्विपदात्मकेऽस्मिन् सूत्रे अट्कुप्वाङ्नुम्व्यवाये इति सप्तम्यन्तं पदम्। अपि इति अव्ययपदम्। 'रषाभ्यां नो णः समानपदे' (पा.सू. ८.४.१) इति सूत्रमनुवर्तते। अतः प्रकृतसूत्रार्थो भवति – अट्कवर्गपवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवमिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे इति। उदाहरणं यथा – करणम्, अर्केण, दर्पेण, पर्याणद्धं, बृंहणम् इत्यादि।

### ५.१०.१ आक्षेपः

ननु सूत्रे रषाभ्याम् इत्युक्तं, तर्हि मातृणां, पितृणाम् इत्यादौ कथं णत्वं सिध्यति। यतो हि अत्र तु रषाभ्यां नकारो नास्ति, अपि तु ऋकारात्परमस्ति। रषाभ्याम् उच्यमानं णत्वम् ऋकारान्न प्राप्नोति। ऋवर्णस्थात् रेफात् परत्वात् णत्वं भविष्यतीत्यपि वक्तुं न शक्यते। यतो हि

षकारसाहचर्यादत्र ज्ञायते यत् सूत्रे रेफवर्णः णत्वं प्रति निमित्तत्वेनाश्रितः। अत्र ऋवर्णस्थो रेफो न वर्णः, अपि तु वर्णैकदेशः। न हि वर्णैकदेशो वर्णग्रहणेन गृह्यते। अतः ऋवर्णस्थरेफोऽत्र न गृह्यते। ननु रश्रुतिसामान्यनिर्देशात् णत्वं सिद्धम्। अर्थात् तस्याः केवलाया ऋवर्णस्थायाश्च वर्णत्वावर्णत्वकृतभेदं त्यक्त्वा केवलं यत् सामान्यं रश्रुतिमात्रं तदिह निर्दिश्यते, न तु वर्णात्मिकैव रेफव्यक्तिः। तेन मातृणां, पितृणाम् इत्यादौ णत्वं सिद्धम्, ऋवर्णे हि तस्य रश्रुतिसामान्यस्य विद्यमानत्वात्। एतदपि वक्तुं न शक्यते। तथाहि ऋकारे त्रयोऽज्भागाः सन्ति, तन्मध्यवर्ती तुरीयो रेफः, तत्र रश्रुतिसामान्यनिर्देशादपि णत्वं न सिध्यति, योऽसौ रेफात् परोऽज्भागस्तेन व्यवधानात्। अतः अत्र वार्त्तिककारेण 'रषाभ्यां णत्वे ऋकारग्रहणम्' इति वार्त्तिकं स्वीकृतम्। परन्तु महाभाष्यकारेण वार्त्तिकमिदं प्रत्याख्यातम्। अतः अत्र आक्षेपः भवति यत् मातृणां, पितृणाम् इत्यादौ णत्वं कथं सिध्यतीति।

### ५.१०.२ योगविभागेन समाधानम्

मातृणां, पितृणाम् इत्यादौ णत्वं कथं सिध्यतीति आक्षेपसमाधानार्थं महाभाष्यकारेण 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रे योगविभागः स्वीकृतः। तथाहि योगविभागं स्वीकृत्य 'व्यवाये' 'अट्कुप्वाङ्नुम्भिः' चेति सूत्रद्वयं

क्रियते। तत्र ‘व्यवाये’ इति प्रथमसूत्रे ‘रषाभ्यां नो णः समानपदे’ इति पूर्वसूत्रात् रषाभ्याम्, नः, णः चेति पदत्रयमनुवर्तते। तेन प्रथमसूत्रार्थो भवति व्यवाये च रषाभ्यां नो णो भवतीति। तेन रश्रुतिसामान्यनिर्देशादेव णत्वं सिध्यति यतो हि रेफात् परः यः अज्भागस्तेन व्यवायेऽपि णत्वं सिध्यति। प्रथमसूत्रेणैव व्यवायेऽपि णत्वे सिद्धे ‘अट्कुप्वाङ्नुम्भिः’ इति द्वितीयं सूत्रं नियमार्थं क्रियते। तत्र नियमो हि ‘एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैः’ इति। अत्र ये अक्षरसमाम्नाये पठ्यन्ते अकारादयः, ये च तैः गृह्यन्ते आकारादयः ते सर्वे एव आक्षरसमाम्नायिकाः। तदुक्तं महाभाष्ये – ‘एवं तर्हि योगविभागः करिष्यते – रषाभ्यां नो णः समानपदे। ततो व्यवाये। व्यवाये च रषाभ्यां नो णो भवतीति। ततः अट्कुप्वाङ्नुम्भिरिति। इदमिदानीं किमर्थम्? नियमार्थम् – एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति’।[१७] इति।

### ५.१०.३ समीक्षणम्

अत्र योगविभागः स्वीक्रियते चेत् ‘रषाभ्यां णत्वे ऋकारग्रहणम्’ इति वार्त्तिकस्य आवश्यकता नास्ति। वार्त्तिकं विनापि योगविभागेन णत्वसिद्धिः भवति। अत्र काशिकाकारेणोक्तम् – ‘ऋवर्णाच्चेति वक्तव्यम्। तिसृणाम्। चतसृणाम्। मातृणाम्। पितृणाम्। रश्रुतिसामान्यनिर्देशात् सिद्धम्। ऋवर्णभक्त्या च व्यवधानेऽपि णत्वं भवतीति क्षुभ्नादिषु (८.४.३९)

नृनमनतृप्नोतिग्रहणं ज्ञापकम्। अथवा ऋवर्णादपि णत्वं भवतीत्येतदेवानेन ज्ञाप्यते'[१८] इति। नागेशभट्टेनात्रोक्तं- 'भाष्ये तु 'रषाभ्या'मिति सूत्रे 'ऋवर्णान्नस्ये'त्यस्य प्रत्याख्यानाय 'व्यवाये' इति योगं विभज्य 'अड्कुप्वाङ्नुम्भि'रित्येतत् 'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यै'रित्यर्थकं व्याख्यातम्। तदा तु 'आदर्शेने'त्यादौ प्राप्तिरेव नेति बोध्यम्।'[१९] इति।

### ५.११. स्तोः श्चुना श्चुः (पा.सू. ८.४.४०)

त्रिपदात्मकेऽस्मिन् सूत्रे स्तोः इति षष्ठ्यन्तं पदम्। श्चुना इति तृतीयान्तं पदम्। श्चुः इति प्रथमान्तं विधेयबोधकं पदम्। अस्य सूत्रस्य अर्थो भवति – सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः इति। उदाहरणं यथा – हरिश्शेते, रामश्चिनोति, सच्चित्, शार्ङ्गिञ्जय इत्यादि।

'शि तुक्' (पा.सू. ८.३.३१) इत्येकं तुक्-विधायकं सूत्रमस्ति। द्विपदात्मकेऽस्मिन् सूत्रे शि इति सप्तम्यन्तं पदम्। तुक् इति प्रथमान्तं विधेयबोधकं पदम्। 'नश्च' (पा.सू. ८.३.३०) इति पूर्वसूत्रात् नः इति पञ्चम्यन्तं पदमनुवर्तते। 'हे मपरे वा' (पा.सू. ८.३.२६) इति सूत्रात् वा इत्यव्ययपदमनुवर्तते। किञ्च सूत्रमिदं पदस्य इत्यधिकारे वर्तते। तेन सम्पूर्णं सूत्रं भवति – पदस्य नः शि तुक् वा इति। सूत्रस्यास्य अर्थो भवति – शकारे

परे पदान्ते विद्यमानस्य नकारस्य विकल्पेन तुगागमः स्यादिति। अयं तुगागमः कित् अस्ति। अतः 'आद्यन्तौ टकितौ' इति परिभाषया अयं तुगागमः नकारस्य अन्त्यावयवो भवति। उदाहरणं यथा – भवाञ्छेते इत्यादि।

### ५.११.१ आक्षेपः

प्रकृतसूत्रेण पदान्तस्य नकारस्य तुगागमो भवतीति उच्यते चेत् कुर्वन् शेते इत्यादौ नकारस्य तुगागमे कृते, णत्वं कथं न भवतीति आक्षेपः उदेति। तथाहि कुर्वन् शेते इत्यवस्थायां प्रकृतसूत्रेण तुगागमे कुर्वन् त् शेते इति जाते तकारः नकारस्यैव अवयवोऽस्ति इति स्वीकृत्य, कुर्वन्त् इति सम्पूर्णः शब्दः पदसंज्ञकः जातः। तेन कुर्वन्त् इत्यस्मिन् पदे विद्यमानः नकारः पदान्ते नास्ति, अतः तस्य 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (पा.सू. ८.४.२) इत्यनेन सूत्रेण णत्वं प्राप्नोति। किञ्च 'पदान्तस्य' (पा.सू. ८.४.३७) इत्यनेन सूत्रेण निषेधोऽपि न सम्भवति पदान्तत्वाभावात्।

### ५.११.२ योगविभागेन समाधानम्

कुर्वन् शेते इत्यादौ नकारस्य तुगागमे कृते, णत्वं कथं न भवतीति आक्षेपसमाधानार्थं महाभाष्यकारेण योगविभागः स्वीकृतः। तथाहि

योगविभागः स्वीक्रियते चेत् सूत्रद्वयं सम्पद्यते। तत्र 'स्तोः श्चुना' इति प्रथमं सूत्रम्। 'श्चुः' इति द्वितीयं सूत्रम्। तत्र 'स्तोः श्चुना' इति प्रथमसूत्रे 'न भाभूपूकमिगमिप्यायीवेपाम्' (पा.सू. ८.४.३४) इति सूत्रात् न इति अव्ययपदमनुवर्तते। 'रषाभ्यां नो णः समानपदे' (पा.सू. ८.४.१) इति सूत्रात् णः इति प्रथमान्तं पदमनुवर्तते। तेन सम्पूर्णं सूत्रं भवति – स्तोः श्चुना णः न इति। प्रथमसूत्रार्थो भवति – श्चुत्वे कर्तव्ये णत्वं न स्यादिति। अर्थात् यदि णत्वं तथा च श्चुत्वम् इत्येतौ युगपद् प्राप्नुतः, तर्हि णत्वापेक्षया श्चुत्वमेव प्राधान्येन करणीयमिति बोध्यम्। तेन कुर्वन् त् शेते इत्यत्र आदौ तकारस्य श्चुत्वे कृते, ततश्च पुनः नकारस्यापि श्चुत्वे कृते कुर्वञ्च्छेते इत्यादि इष्टं रूपं सिध्यति। अर्थात् नकारस्य अनिष्टं णत्वं न भवति। 'श्चुः' इति द्वितीयसूत्रे 'स्तोः श्चुना' इति प्रथमं सूत्रमनुवर्तते। तेन स्तोः श्चुना योगे श्चुः भवतीति सिध्यति। तदुक्तं महाभाष्यकारेण – 'अयं तु खलु शितुक्छत्वार्थं नियोगतः पूर्वान्तः कर्तव्यः। तत्र कुर्वञ्ञ्च्छेते कृषञ्ञ्छेत इति 'रषाभ्यां नो णः समानपद' इति णत्वं प्राप्नोति। नैषः दोषः – श्चुत्वे योगविभागः करिष्यते। इदमस्ति 'क्षुभ्नादिषु च'। क्षुभ्नादिषु न णकारो भवति। ततः – 'स्तोः श्चुना'। स्तोः श्चुना सन्निपाते न णकारो भवति। ततः 'श्चुः'। श्चुश्च भवति स्तोः श्चुना सन्निपाते।'[२०] इति।

**५.११.३ समीक्षणम्**

यद्यपि कुर्वन् शेते इत्यत्र प्रकृतसूत्रेण प्राप्तः तुगागमः पदद्वयाश्रितः अस्ति, णत्वं तु केवलम् एकपदाश्रितमस्ति, अतः तुगागमापेक्षया णत्वम् अन्तरङ्गकार्यमस्ति। तेन 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनया परिभाषया तुगागमरूपं बहिरङ्गकार्यं णत्वस्य कृते असिद्धं भवति, तेन तुगागमे कृतेऽपि णत्वं नैव सम्भवति। तथापि अत्र योगविभागः आवश्यकः। यतो हि त्रिपाद्यामन्तरङ्गपरिभाषा न प्रवर्तते। किञ्च यथोद्देशपक्षे योगविभागस्य आवश्यकता वर्तते एव। काशिकाकारेणापि अत्र योगविभागः स्वीकृतः। तदुक्तं काशिकायां – 'नकारस्य पदान्तस्य शकारे परतो वा तुगागमो भवति। भवाञ्च्छेते। पूर्वान्तकरणं छत्वार्थम्। यद्येवं कुर्वञ्च्छेते इत्यत्र नकारस्यापदान्तत्वाद् णत्वं प्राप्नोति। तत्र समाधिमाहुः 'स्तोः श्चुना श्चुः' (८.४.४०) इत्यत्र योगविभागः क्रियते णत्वप्रतिषेधार्थं, स्तोः श्चुना णकारो न भवतीति, ततः श्चुरिति।'[२१]

१ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, त.बो., पृ.सं. ८४
२ तदेव, पृ.सं. ३४०
३ तदेव, पृ.सं. ४८९
४ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. २१
५ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ४९९
६ तदेव, पृ.सं. ४९९
७ तदेव, पृ.सं. ५३१
८ वै.सि.कौ., सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री, प्रथमभागः, पृ.सं. ४५७
९ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ५३५
१० काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. १३६
११ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, द्वितीयभागः, पृ.सं. ५३५
१२ तदेव, पञ्चमभागः, पृ.सं. ३३०
१३ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ६९४
१४ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. ११३
१५ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ५६७
१६ व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, पञ्चमभागः, पृ.सं. १९०
१७ तदेव, षष्ठभागः, पृ.सं. २११
१८ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ९०९
१९ ल.श.शे, सम्पा. बालशास्त्री, द्वितीयभागः, पृ.सं. १००
२० व्या.म.भा., सम्पा. भार्गवशास्त्री जोशी, षष्ठभागः, पृ.सं. १६६
२१ काशिका, सम्पा. विजयपालो विद्यावारिधिः, पृ.सं. ८८८

* * *

# उपसंहारः

**‘महाभाष्यदिशा योगविभागसमीक्षा’** इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। अस्मिन् उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र व्याकरणसम्प्रदायानां सामान्यपरिचयः प्रदत्तः। तदनन्तरं पाणिनीयव्याकरणस्य परिचयः प्रदत्तः। तत्र आदौ त्रिमुनीनां परिचयः आलोचितः। तदनन्तरं सूत्रक्रमः प्रक्रियाक्रमश्च संक्षेपेण आलोचितः। महाभाष्यग्रन्थस्य परिचयं दत्त्वा अन्ते च सूत्राणां भेदाः आलोचिताः। ‘पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषु उपायेषु योगविभागः’ इत्यस्ति मम शोधप्रबन्धस्य प्रथमोऽध्यायः। अस्मिन् अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः अष्ट मुख्या उपायाः वर्णिताः। ते हि – संज्ञाकरणम्, अनुबन्धकरणम्, स्थान्यादेशभावः, सिद्धासिद्धव्यवस्था, उत्सर्गापवादभावः, अन्तरङ्गबहिरङ्गभावः, ज्ञापनम्, प्रश्लेषश्च। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः। ‘समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा’ इत्यस्ति मम शोधप्रबन्धस्य द्वितीयोऽध्यायः। अस्मिन् अध्याये समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागः समीक्षितः। तानि सूत्राणि हि – ‘सह सुपा’ (पा.सू. २.१.४),

'तृतीया तत्कृतार्थेन गुणवचनेन' (पा.सू. २.१.३०), 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' (पा.सू. २.१.३६) चेति। समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागं समीक्ष्य प्रत्ययाधिकारस्थानां त्रयोदशसूत्राणां योगविभागः आलोचितः। तानि सूत्राणि हि – 'श्लिष आलिङ्गने' (पा.सू. ३.१.४६), 'सुपि स्थः' (पा.सू. ३.२.४), 'तौ सत्' (पा.सू. ३.२.१२७), 'लृट् शेषे च' (पा.सू. ३.३.१३), 'अनद्यतने लुट्' (पा.सू. ३.३.१५), 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः' (पा.सू. ३.४.२), 'युष्मदस्मदोरन्यतरस्यां खञ् च' (पा.सू. ४.३.१), 'तस्मिन्नणि च युष्माकास्माकौ'(पा.सू. ४.३.२), 'संज्ञायां कुलालादिभ्यो वुञ्' (पा.सू. ४.३.११७), 'विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्' (पा.सू. ५.१.२४), 'तत्र च दीयते कार्यं भववत्' (पा.सू. ५.१.९६), 'किमिदम्भ्यां वो घः' (पा.सू. ५.२.४०), 'एतदोऽन्' (पा.सू. ५.३.५) चेति। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता। शोधप्रबन्धस्यास्य तृतीयोऽध्यायः 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति। अस्मिन् अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः। तानि सूत्राणि हि – 'अज्झनगमां सनि' (पा.सू. ६.४.१६), 'जनसनखनां सञ्झलोः' (पा.सू. ६.४.४२), 'यस्य हलः' (पा.सू. ६.४.४९),

'अयामन्ताल्वाय्येत्न्विष्णुषु' (पा.सू. ६.४.५५), 'एरनेकाचोऽसंयोगपूर्वस्य' (पा.सू.६.४.८२), 'उतश्च प्रत्ययादसंयोगपूर्वात्' (पा.सू. ६.४.१०६), 'अल्लोपोऽनः' (पा.सू. ६.४.१३४), 'आतो धातोः' (पा.सू. ६.४.१४०), 'आत्मनेपदेष्वनतः' (पा.सू. ७.१.५), 'षड्भ्यो लुक्' (पा.सू. ७.१.२२), 'णलुत्तमो वा' (पा.सू. ७.१.९१), 'णेरध्ययने वृत्तम्' (पा.सू. ७.२.२६), 'आर्धधातुकस्येड् वलादेः' (पा.सू. ७.२.३५), 'उपदेशेऽत्वतः' (पा.सू. ७.२.६२), 'बहुवचने झल्येत्' (पा.सू. ७.३.१०३), 'ह्रस्वस्य गुणः' (पा.सू. ७. ३.१०८), 'ऋदृशोऽङि गुणः' (पा.सू. ७.४.१६),'हलादिः शेषः' (पा.सू. ७.४. ६०) चेति। शोधप्रबन्धस्य चतुर्थोऽध्यायः 'पदाधिकारस्थानां योगविभागानां समीक्षा' इति। अध्यायेऽस्मिन् सप्तसूत्राणां योगविभागः आलोचितः। तानि सूत्राणि हि – 'सामान्यवचनं विभाषितं विशेषवचने' (पा.सू. ८.१.७३), 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (पा.सू. ८.२.४), 'झलां जशोऽन्ते' (पा.सू. ८.२.३९), 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (पा.सू. ८.२.४२), 'रायो हलि' (पा.सू. ७.२.८५), 'विभाषा पृष्टप्रतिवचने हेः' (पा.सू. ८.२.९३), 'कुप्वोः ≍क≍पौ च' (पा.सू. ८.३.३७) चेति। तेषु 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यस्य पदाधिकारस्थस्य सूत्रस्य योगविभागः 'एकः पूर्वपरयोः' (पा.सू. ६.१ .८४) इत्यस्मिन् सूत्रभाष्ये आलोचितः महाभाष्यकारेण। 'अवशिष्टानां

योगविभागानां समीक्षा' इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागः अत्र समीक्षितः। तानि सूत्राणि हि – 'अदसो मात्' (पा.सू. १.१.१२), 'तृतीयासमासे' (पा.सू. १.१.३०), 'न पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु' (पा.सू.१.१.५८), 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' (पा.सू. २.३.१७), 'कृत्यानां कर्तरि वा' (पा.सू. २.३.७१), 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (पा.सू. २.४.२), 'उपसर्गादृति धातोः' (पा.सू. ६.१.९१), 'अमि पूर्वः' (पा.सू. ६.१.१०६), 'कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्य-कम्बलो दासीभाराणां च' (पा.सू. ६.२.४२), 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (पा.सू. ८.४.२), 'स्तोः श्चुना श्चुः' (पा.सू. ८.४.४०) चेति। एवञ्च मम शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागाः आलोचिताः। तेषु बहुत्र योगविभागं स्वीकृत्य समस्यायाः समाधानं क्रियते चेदेव समीचीनम्। यथा 'ऋदृशोऽङि गुणः' (पा.सू. ७.४.१६) इत्यत्र योगविभागः स्वीक्रियते चेदेव वरम्। महाभाष्यकारेण योगविभागं स्वीकृत्य तच्छेषपक्ष एव स्वीकृतः। यतो हि इकः इति पदोपस्थितिपक्षे इकः विशेषणविशेष्यभावस्य कामचारात् न हि कश्चिदपि पक्षे नियमः स्यात्। तेन गौरवदोषः स्यात्। तथाहि तत्र

प्रकृतषष्ठ्यन्तपदोपस्थितषष्ठ्यन्तपदयोर्मध्ये विशेषणविशेष्यभावः कामचारात् भवति। अर्थात् गृह्यमाणषष्ठ्यन्तपदेन इकं विशेषयितुम्, अथवा उपस्थितषष्ठ्यन्तेन इका गृह्यमाणं षष्ठ्यन्तपदं विशेषयितुं स्वतन्त्रता विद्यते। यथा – 'मिदेर्गुणः' (पा.सू. ७.३.८२) इत्यत्र गृह्यमाणषष्ठ्यन्तं मिदेः इति पदं विशेषणं तथा इकः इति उपस्थितषष्ठ्यन्तपदं विशेष्यम् इति स्वीक्रियते। तेन सूत्रस्यार्थो भवति – मिदेः अङ्गस्य इको गुणो भवति शिति प्रत्यये परे इति। परन्तु 'जुसि च' (पा.सू. ७.३.८३) इत्यत्रोपस्थितं षष्ठ्यन्तं पदं विशेषणं तथा गृह्यमाणषष्ठ्यन्तम् अङ्गस्य इति पदं विशेष्यमिति स्वीक्रियते। तेन सूत्रार्थो भवति – जुसि च प्रत्यये परे इगन्तस्य अङ्गस्य गुणो भवतीति। एवं लक्ष्यानुसारम् इकः इति पदं कुत्रचित् विशेषणं भवति कुत्रचिच्च विशेष्यं भवति। परन्तु कुत्र विशेषणं भवति कुत्र च विशेष्यं भवतीति नास्ति कोऽपि नियमः। तेन विशेषणविशेष्यभावस्य कामचारात् गौरवदोषः सिध्यति। अतः अत्र योगविभागं स्वीकृत्य तच्छेषपक्ष एव स्वीकार्यः। एवमेव 'तृतीयासमासे' (पा.सू. १.१.३०) इत्यत्रापि योगविभागः स्वीक्रियते चेदेव वरम्। तथाहि 'विभाषा दिक्समासे बहुव्रीहौ' (पा.सू. १.१.२८) इति सूत्रात् समासे इति पदमनुवर्तते तथापि 'तृतीयासमासे' इति सूत्रे समासे इति पदस्य ग्रहणं तृतीयासमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात् तदर्थं कृतमिति प्रतिपादितं

सिद्धान्तकौमुद्याम्। ननु यदि तृतीयासमासपदं तृतीयासमासार्थपदबोधकमिति स्वीक्रियते तर्हि समुदाये अर्थात् मुख्ये तृतीयासमासे सर्वनामसंज्ञायाः निषेधः न स्यात्। तेन मासपूर्वाय इत्यादौ तृतीयासमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञायां मासपूर्वस्मै इत्यनिष्टं रूपं स्यात्। अत्रोच्यते – वाक्यभेदेन मुख्ये समासे निषेधः भवतीति। तथाहि तृतीया इति प्रथमं वाक्यम्। अत्र तृतीया इति लुप्तषष्ठीकं पदमस्ति। 'विभाषा दिक्समासे बहुव्रीहौ' इत्यस्मात् सूत्रात् समासे इत्यनुवर्तते। अत्रानुवर्तमानं समासपदं प्राथमकल्पिकसमासपरमस्ति। अर्थात् तृतीया इति प्रथमवाक्यद्वारा मासपूर्वाय इत्यादौ मुख्यसमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञायाः निषेधो भवति। 'समासे' इति द्वितीयं वाक्यम्। अत्र तृतीया इति अनुवर्तते। अत्र समासे इत्यस्यार्थः अस्ति समासार्थवाक्ये इति। तेन द्वितीयवाक्यस्यार्थो भवति – तृतीयासमासार्थवाक्ये सर्वादिगणपठितशब्दानां सर्वनामसंज्ञा न भवतीति। तेन 'तृतीया' इति प्रथमवाक्येन प्राथमकल्पिकसमासे अर्थात् मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधः, 'समासे' इति द्वितीयवाक्येन च समासार्थवाक्ये अर्थात् विग्रहे सर्वनामसंज्ञायाः निषेधो भवति। अतः मासपूर्वाय देहि, मासेन पूर्वाय देहि इत्यादौ न कुत्रापि दोषः। तथापि अत्र योगविभागः क्रियते चेदेव वरम्। यतो हि अनुवर्तमानस्य

समासपदस्य समासार्थवाक्यबोधकत्वस्वीकारे न कापि हानिः। अतः समासार्थवाक्यबोधनार्थं पुनः समासपदग्रहणस्य आवश्यकता नास्ति। अपि च पुनर्गृहीतस्य समासपदस्य समासार्थवाक्यबोधकत्वस्वीकारे प्राथमकल्पिकसमासे अर्थात् मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधः न भवति। मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधार्थं पृथक्तया वाक्यभेदस्य आवश्यकता भवति। वाक्यभेदश्च योगविभागं विना न सम्भवति। अतः योगविभागेन उभयत्र सर्वनामसंज्ञायाः निषेधः क्रियते चेदेव वरम्। एवमेव 'किमिदम्भ्यां वो घः' इत्यत्र यद्यपि किमिदम्भ्यां परस्य वतुपः वकारस्य घविधानसामर्थ्यादेव एतद् ज्ञायते यत् किमिदम्भ्यां परं वतुप्रत्ययो भवतीति। तथापि अत्र योगविभागः स्वीक्रियते चेदेव वरम्। यतो हि योगविभागस्वीकारे स्पष्टप्रतिपत्तिर्भवति। किञ्च अत्र घकारादेशविधानसामर्थ्यात् वतुप्रत्ययस्य अनुमानं क्रियते चेदपि तत्र वतुप्रत्ययः कस्मिन् अर्थे अनुमीयते इति आक्षेपः पुनः मनसि उदेति। अर्थात् अत्र अर्थस्यापि अनुमानं करणीयम्। तदपेक्षया योगविभाग एव उचितः। किञ्च योगविभागस्वीकारे कोऽपि सन्देहो न भवतीति मे मतिरिति शिवम्।

* * *

# परिशीलितग्रन्थपञ्जी


अमरसिंहः। *अमरकोषः*। सम्पा. शिवदत्तदाधिमथः वासुदेवलक्ष्मणशास्त्री पणशीकरः। दिल्ली : चौखाम्बा संस्कृत प्रतिष्ठान, २०१७ (पुनर्मुद्रणम्; १९८१ प्रथमसंस्करणम्)।

आचार्यः, के. वि. रामकृष्णः। *भूषणसारतत्त्वप्रकाशिका*। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०१०।

आचार्यः, रामचन्द्रः। *प्रक्रियाकौमुदी* (*प्रकाश*व्याख्यासिहता)। सम्पा. पण्डितश्रीमुरलीधरमिश्रः। वाराणसी : सम्पूर्णानन्द कृष्णदास अकादमी, २०००।

आचार्यः, सत्यनारायणः। *Research Methodology*। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०१२।

आप्टे, वामनशिवरामः। *संस्कृत-हिन्दी-कोशः*। दिल्ली : मोतीलाल बनारसीदास पाब्लिशार्स् प्राइभेट् लिमिटेड्, २००७।

उपाध्यायः, गोकुलनाथः। *पदवाक्यरत्नाकरः*। सम्पा. नन्दिनाथः मिश्रः। वाराणसी : वाराणसेयसंस्कृतविश्वविद्यालयः, १८८२।

*ऋक्तन्त्रम्* (सामवेदीयम्)। सम्पा. सूर्यकान्तशास्त्री। लाहोरः : मेहर चाद लक्ष्मण दासः, १९३३।

कल्हणः। *राजतरङ्गिणी*। सम्पा. रामतेजशास्त्री। काशी : पण्डित पुस्तकालयः। १९६०।

*काठकसंहिता*। सम्पा. श्रीपादशर्मा भट्टाचार्यः। मुम्बई : वसन्तश्रीपादसातवलेकरः, १९४३। पि.डि.एफ.।

किशोरचन्द्रपाढी। *पाणिनीयव्याकरणे योगविभागविमर्शः।* दिल्ली: भारतीय बुक कार्पोरेशन, २००१।

कुमारिलभट्टः। *तन्त्रवार्त्तिकम्* (मीमांसासूत्रीयशाबरभाष्यटीका)। सम्पा. गङ्गाधरशास्त्री। वाराणसी : मेसर्स. ब्रज बि. दास एवं को., १९०३

कौण्डभट्टः। *बृहद्वैयाकरणभूषणम्*। सम्पा. श्रीमनुदेवः भट्टाचार्यः। वाराणसी : चौखम्बा अमरभारती प्रकाशन, १९८५।

कौण्डभट्टः। *बृहद्वैयाकरणभूषणम्*। सम्पा. श्रीमनुदेवः भट्टाचार्यः। वाराणसी : चौखम्बा अमरभारती प्रकाशन, १९८५।

कौण्डभट्टः। *वैयाकरणभूषणसारः* (*तत्त्वदर्शिनी*व्याख्योपेता)। सम्पा. सूर्यनारायणः शास्त्री। तिरुपतिः : श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, २०१६।

कौण्डभट्टः। *वैयाकरणभूषणसारः* (*प्रभादर्पण*युतः)। वाराणसी : आदर्शग्रन्थमाला, १९४७।

कौण्डभट्टः। *वैयाकरणभूषणसारः* (*सावित्री*व्याख्योपेतः)। सम्पा. आद्याप्रसादः मिश्रः। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९८८।

कौण्डभट्टः। *वैयाकरणभूषणसारः* (*सुबोधिनी*व्याख्योपेतः)। सम्पा. चन्द्रिकाप्रसादः द्विवेदी। वाराणसी : चौखबा संस्कृत-प्रतिष्ठान, २०१३।

गङ्गाधरकरः। *शब्दार्थसम्बन्धसमीक्षा*। कलिकाता : यादवपुरविश्वविद्यालयः, २०१५।

गदाधरभट्टाचार्यः। *व्युत्पत्तिवादः* (*विद्वन्मनोरमा*व्याख्योपेतः)। सम्पा. हरेकृष्णः शतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०११।

गदाधरभट्टाचार्यः। *व्युत्पत्तिवादः* (हिन्दीव्याख्योपेतः)। सम्पा. वैद्यनाथः झा। जयपुरम् : हंसप्रकाशनम्, २००१।

चलपतिः, प्यदिपतिवेङ्कटः। *सिद्धान्तकौमुदीरीत्या चन्द्रिकाया विमर्शः* (पूर्वार्धप्रकरणम्)। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०११।

जगदीशः। *शब्दशक्तिप्रकाशिका*। सम्पा. धुनधीराजः शास्त्री। वाराणसी : चौखम्बा संस्कृत संस्थानम्, २००२।

जयकृष्णशर्मा। *शब्दार्थसारमञ्जरी* (हिन्दीव्याख्योपेता)। सम्पा. डा. रमेशचन्द्रः पण्डा। वाराणसी : काशी-हिन्दू-विश्वविद्यालयः, १९९७।

जयकृष्णशर्मा। *सारमञ्जरी* (सटिप्पणी सानुवादा च)। सम्पा. डा. रवीन्द्रनाथः शास्त्री। कलकाता : रामकृणिमशन इन्सटीट्यूट आप कलचारइरिप्रतिष्ठानम्, १९९७।

ताताचार्यः, रामानुजः। *शाब्दबोधमीमांसा* (चतुर्थः भागः)। देहली : राष्ट्रिय-संस्कृत-संस्थानम्, २००८।

*तैत्तिरीयसंहिता*। सम्पा. अनन्तशास्त्री। मुम्बई : वसन्तश्रीपादसातवलेकरः, १९५७। (द्वितीयसंस्करणम्)।

दण्डी। *काव्यादर्शः*। सम्पा. योगेश्वरदत्तशर्मा। दिल्ली : नाग पब्लिशार्स, १९९९। (प्रथमसंस्करणम्)।

दत्तात्रेयमूर्तिः, गण्टिसूर्यवेङ्कटः। *परिभाषेन्दुशेखरीयायाः वाक्यार्थचन्द्रिकायाः परिशिलनम्*। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०११।

नागेशभट्टः। *परमलघुमञ्जुषा* (*बालबोधिनी* हिन्दीव्याख्योपेता च)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०११।

नागेशभट्टः। *परमलघुमञ्जूषा* (*किरणावलीटी*कोपेता हिन्दीव्याख्योपेता च)। सम्पा. आचार्यलोकमणिः दाहालः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

नागेशभट्टः। *परमलघुमञ्जूषा* (*वंशीटी*कोपेता)। वाराणसी : चौखम्बा विद्या भवनम्, २००८।

नागेशभट्टः। *परिभाषेन्दुशेखरः* (*तत्त्वप्रकाशिका*समलङ्कृतभूतिभूषितः)। सम्पा. गोविन्दशर्मा। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००१।

नागेशभट्टः। *परिभाषेन्दुशेखरः* (*सुबोधिनी*-हिन्दीव्याख्योपेतः)। सम्पा. श्रीविश्वनाथः मिश्रः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१४।

नागेशभट्टः। *बृहच्छब्देन्दुशेखरः*। सम्पा. सीतारामशास्त्री। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९६ (प्रथमसंस्करणम्)।

नागेशभट्टः। *लघुशब्देन्दुशेखरः* (कारकप्रकरणम्)। सम्पा. तेजपालः शर्मा। वाराणसी : तारा प्रिंटिंस वर्क्स, २००२।

नागेशभट्टः। *लघुशब्देन्दुशेखरः* (*सुबोधिनी*व्याख्योपेतः)। सम्पा. विश्वनाथः मिश्रः। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१२।

नागेशभट्टः। *लघुशब्देन्दुशेखरः* / सम्पा. बालशास्त्री। वाराणसी : चौखम्बा सुरभारती प्रकाशन,, २०१३।

नागेशभट्टः। *लघुशब्देन्दुशेखरः* / सम्पा. सत्यनारायणमूर्तिः। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २००८।

नागेशभट्टः। *वैयाकरणसिद्धान्तमञ्जुषा* / सम्पा. कालिकाप्रसादः शुक्लः। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९७७।

नागेशभट्टः। *वैयाकरणसिद्धान्तमञ्जुषा।* सम्पा. माधवशास्त्री भाण्डारी। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, १९९४।

नागेशभट्टः। *वैयाकरणसिद्धान्तमञ्जूषा।* नई दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्, २००६।

नागेशभट्टः। *वैयाकरणसिद्धान्तलघुमञ्जुषा।* सम्पा. आचार्यश्रीरामप्रसादत्रिपाठी। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९९०।

नारायणभट्टः। *प्रक्रियासर्वस्वम्* (तृतीयभागः)। सम्पा. वि. ए. रामस्वामिशास्त्री। त्रिवन्द्राम् : द्य सुपारिन्टेन्डेन्ट गवर्मैन्ट प्रेस, १९४७।

पञ्चाननः विश्वनाथः। *कारिकावली*। सम्पा. अनन्तशास्त्री। बोम्बे : तुकाराम जावजी, १९१६।

पतञ्जलिः। *महाभाष्यम्* (तृतीयखण्डम्)। सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, १९८८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *महाभाष्यम्* (द्वितीयखण्डम्)। सम्पा. शिवदत्तशर्मा रघुनाथशास्त्री च। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, १९८८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *महाभाष्यम्* (नवाह्निकम्)। सम्पा. चारुदेवः शास्त्री। दिल्ली : मोतीलालबनारसीदास, १९९४ (द्वितीयसंस्करणम्)।

पतञ्जलिः। *महाभाष्यम्* (नवाह्निकम्)। सम्पा. रुद्रधरझाशर्मा। वाराणसी : चौखम्बा संस्कृत सीरीज्, १९९९।

पतञ्जलिः। *महाभाष्यम्* (नवाह्निकम्)। सम्पा. हरिनारायणः तिवारी। वाराणसी : चौखम्बा-विद्याभवनम्, १९२५।

पतञ्जलिः। *महाभाष्यम्* (प्रथमाध्यायः)। सम्पा. गुरुप्रसादः शास्त्री। दिल्ली : प्रतिभाप्रकाशन, १९९९।

पतञ्जलिः। *महाभाष्यम्* (षष्ठखण्डम्)। सम्पा. दधिरामशर्मा। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, १९८८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (१-५ आह्निकानि)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१३ (द्वितीयसंस्करणम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (६-९ आह्निकानि)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१३ (द्वितीयसंस्करणम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (चतुर्थखण्डम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (तृतीयखण्डम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (द्वितीयखण्डम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (पञ्चमखण्डम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१८ (पुनर्मुद्रितम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (प्रथमखण्डम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०२१ (पुनर्मुद्रितम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (षष्ठखण्डम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१८ (पुनर्मुद्रितम्)।

पाणिनिः। *अष्टाध्यायी* (आङ्गलानुवादसहिता)। अनु. एस. सि. वसुः। वाराणसी : सिन्धुचरणबोसः, १८९७।

पाणिनिः। *अष्टाध्यायी*। सम्पा. श्रीगोपालदत्तपाण्डेयः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११ (पुनर्मुद्रितम्)।

पाणिनिः। *पाणिनीयशिक्षा*। सम्पा. मनोमोहनः घोषः। क्याल्काटा : भूपेन्द्रलालः ब्यनार्जी, १९३८।

पाणिनिः। *पाणिनीयशिक्षा*। सम्पा. विद्यासागरदामोदरमहतः। दिल्ली : मोतिलाल बनारसीदास, २००२ (पुनर्मुद्रणम्; १९९० प्रथमसंस्करणम्)।

*पाराशरोपपुराणम्* (अष्टादशाध्यायः)। सम्पा. कपिलदेवत्रिपाठी। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९०।

पुरुषोत्तमदेवः। *कारकचक्रम्*। सम्पा. तपनशङ्करभट्टाचार्यः। कलिकाता : संस्कृत पुस्तक भाण्डार, २०११।

भट्टाचार्यः, गिरिधरः। *विभक्त्यर्थनिर्णयः*। सम्पा. जीवनाथः मिश्रः। वाराणसी : चौखम्बा संस्कृत वुक डिपो, १९०१।

भट्टाचार्यः, भवानन्दसिद्धान्तवागीशः। *कारकचक्रम्*। सम्पा. ब्रह्मशङ्करः शास्त्री। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, १९४२।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (अव्ययीभावान्ता)। सम्पा. सदाशिवशर्माशास्त्री। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, १९३४।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (*रत्नप्रभो*पेता)। सम्पा. सभापतिः शर्मोपाध्यायः। वाराणसी : वाणीविलास प्रकाशनम्, १९९७।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (*शब्दरत्न*सहिता)। सम्पा. पण्डितसदाशिवः शर्मा शास्त्री। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, १९९१।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* - उत्तरार्द्धा (*तत्त्वबोधिनी-बालमनोरमा-शेखर*व्याख्यात्रयविराजिता)। सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१२।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* - पूर्वार्द्धा (*तत्त्वबोधिनी-बालमनोरमा-शेखर*व्याख्यात्रयविराजिता)। सम्पा. श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो. बालशास्त्री। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१२।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (कारकविभक्तिप्रकरणम्)। सम्पा. अयोध्यानाथसान्यालः शास्त्री। कलिकाता : संस्कृत पुस्तक भाण्डार, १४१८।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (चतुर्थभागः)(*बालमनोरमा-तत्त्वबोधिनी*टीकोपेता)। सम्पा. गिरिधरः शर्मा परमेश्वरानन्दः शर्मा च। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (तृतीयभागः) (*बालमनोरमा-तत्त्वबोधिनी*टीकोपेता)। सम्पा. गिरिधरः शर्मा परमेश्वरानन्दः शर्मा च। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (द्वितीयभागः) (*बालमनोरमा-तत्त्वबोधिनी*टीकोपेता)। सम्पा. गिरिधरः शर्मा परमेश्वरानन्दः शर्मा च।

वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः) (*बालमनोरमा-तत्त्वबोधिनीटी*कोपेता)। सम्पा. गिरिधरः शर्मा परमेश्वरानन्दः शर्मा च। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (प्रथमोंऽशः)। सम्पा. बालकृष्णशर्मापञ्चोलिः। दिल्ली : मोतीलालबनारसीदास, १९६६।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (वैदिकी प्रक्रिया)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१४ (द्वितीयसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (*श्रीधरमुखोल्लासिनीटी*कोपेता)। सम्पा. लक्ष्मीशर्मा। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१६।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (समासप्रकरणम्)। सम्पा. तपनशङ्करः भट्टाचार्य्यः। कलकाता : चौधुरी प्रेस, २०१८।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः* (द्वितीयभागः)। सम्पा. पण्डितगोपालशास्त्री नेने। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, १९९१।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः* (प्रथमभागः)। सम्पा. पण्डितगोपालशास्त्री नेने। वाराणसी : चौखम्बा संस्कृत सिरीज अफिस, १९९०।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः* (प्रथमाध्यायप्रथमपादे प्रथमद्वितीयतृतीयाह्निकानि)। सम्पा. श्रीपादसत्यनारायणमूर्तिः। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०११।

भर्तृहरिः। *महाभाष्यदीपिका* (त्रिपादी)। सम्पा. सरोजा भाटे। पुना : भाण्डारकर ओरियेन्टाल् रिसर्च् इन्स्टिटिउट्, १९८६।

भर्तृहरिः। *वाक्यपदीयम्* (*प्रतिभा*हिन्दीव्याख्योपेतम्)। सम्पा. सत्यनारायणः खण्डुडी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१४ (पुनर्मुद्रितम्)।

भर्तृहरिः। *वाक्यपदीयम्* (ब्रह्मकाण्डम्)। सम्पा. आचार्यः वामदेवाचार्यः। वाराणसी : चौखम्बा कृष्णदास अकादमी, २००० (तृतीयसंस्करणम्)।

भर्तृहरिः। *वाक्यपदीयम्* (ब्रह्मकाण्डम्)। सम्पा. विष्णुपदः भट्टाचार्यः। कलकाता : पश्चिमबङ्ग राज्य पुस्तक पर्षद्, २००७।

*मुण्डकोपनिषद्*। सम्पा. ब्रह्मचारिमेधाचैतन्यः। कलिकाता : दण्डिस्वामी दामोदरः आश्रमः, २००८।

*मैत्रायणीसंहिता*। सम्पा. श्रीपादशर्मा भट्टाचार्यः। मुम्बई : वसन्तश्रीपादसातवलेकरः, १९४२।

यास्कः। *निरुक्तम्* (दुर्गाचार्यकृतवृत्तिसहितम्)। सम्पा. विनायकगणेशः आप्टे। पुने : आनन्दाश्रमसंस्था, १९२१।

युधिष्ठरः मीमांसकः। *संस्कृत साहित्य का इतिहास* (प्रथमभागः)। आजमेर : भारतीय प्राच्यविद्या प्रतिष्ठान, २००७ (प्रथमसंस्करणम्)।

रामकृष्णमाचार्यः। *भूषणसारतत्त्वप्रकाशिका*। सम्पा. हरेकृष्णः शतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०१०।

राममनोहरमिश्रः। *भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा*। वाराणसी : सम्पूर्णानन्द-संस्कृत -विश्वविद्यालयः, १९८३।

वर्णी, रामप्रकाशः। *पातञ्जल महाभाष्य (नवाह्निक) की व्याख्या में कैयट और शिवरामेन्द्र का तुलनात्मक अध्ययन*। दिल्ली : परिमल पब्लिकेशन्स्, २०१८।

वामनजयादित्यौ। *काशिका* (*भावबोधिनी* हिन्दीव्याख्योपेता च)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : तारा प्रिंटिंग वर्क्स, १९८५।

वामनजयादित्यौ। *काशिका*। सम्पा. विजयपालो विद्यावारिधिः। सोनीपत : रामलाल कपूर ट्रस्ट, २०१३।

वामनजयादित्यौ। *काशिकावृत्तिः* (चतुर्थभागः)। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : तारा पाब्लिकेशन्स, १९६७ (प्रथमसंस्करणम्)।

वामनजयादित्यौ। *काशिकावृत्तिः* (द्वितीयभागः)। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : प्राच्यभारतीप्रकाशन, १९६५ (प्रथमसंस्करणम्)।

वामनजयादित्यौ। *काशिकावृत्तिः* (पञ्चमभागः)। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : तारा पाब्लिकेशन्स, १९६७ (प्रथमसंस्करणम्)।

वामनजयादित्यौ। *काशिकावृत्तिः* (प्रथमभागः)। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : प्राच्यभारतीप्रकाशन, १९६५ (प्रथमसंस्करणम्)।

वामनजयादित्यौ। *काशिकावृत्तिः* (षष्ठभागः)। सम्पा. स्वामिद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लः च। वाराणसी : तारा पाब्लिकेशन्स, १९६७ (प्रथमसंस्करणम्)।

साहुः, सोमनाथः। *पाणिनीयपदव्यवस्था*। सम्पा. हरेकृष्णशतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०११।

Abhyankar, Kashinath Vasudev. *A Dictionary of Sanskrit Grammar*. Ed. B. J. Sandesara. Baroda : Oriental Institute, 1961 (1st Ed.).

Apte, Vaman Shivrama. The Student's Sanskrit-English Dictionary. New Delhi : Rastriya Sanskrit Sansthan, 2010.

Bhate, Saroja. *Pāṇini*. Delhi : Sahitya Academy, 2002.

Cardona, George. *Pāṇini and His Works and Its Traditions*. Delhi : Motilal Banarasidas, 1997.

Halder, Gurupada. *Vyākaraṇ(a) Darśaner(a) Itihās(a).* Kolkata : Sanskrit Book Depot, 2006 (rpt.;1st ed. 1340 BS).

Mukhopadhyaya, Govindagopal. A new Trilingual Dictionary. Calcutta : Sanskrit Book Depot, 2011.

*New Catalogus Catalogorum (Vol. 10)*. Ed. Dr. K. Kunjunni Raja. Madras : University of Madras, 1978.

Patañjali. *Vyākaraṇa-Mahābhāṣya.* Ed. F. Kielhorn. Bombay : Government Central Book Depot, 1st ed. 1880

Vasu, Srisa Chandra, *The Astādhyāī of Pānini* (Vol-1&2), Delhi: Motilal Banarasidass, 2009.

https://archive.org/

https://sa.wikisource.org/wiki/

https://sanskritdocuments.org/scannedbooks/

* * *